No. ९४१६

Title चिन्तामणि प्रकाश:

Author ×

Extent १८३ Age ×

Subject न्याय शास्त्रं

चिन्तामणिप्रकाशः

१४१७

पत्राणि
238

पत्रे १८१

[illegible] ४४८८

॥ ॐ नमः कालै॥ उपोद्घातेन प्रसंगेन वा संगत्याह॥ नन्विति मूलं· पक्षान्तु म इति· सत्यस्थलसामानाधिकरण्य
मादाय सिद्धसाधनमिति मूले व्याप्यत्वपर्यन्तं· यद्यप्यनुभवाप्रवेशो ज्ञानपदप्रवेशोप्यन्यथाख्यातिसिद्धान्ते च
तथाप्यनुभवत्वस्याखंडतया न दोषः· हेतौ यद्यपि धर्मत्वादिरेव सम्यक्· न च प्रमेयत्वे व्यभिचारः· सर्वं रजत
मिति ज्ञानमादाय तत्रापि साध्यसत्वात्· तथापि रजतार्थिप्रवृत्तिविषयत्वव्याप्यताप्रत्र रजतत्वप्रकारकानुभ
वविषयत्वव्याप्यत्वं साध्यं· तस्य चाकेवलान्वयितया व्यभिचारित्वमेव हेतोरजतार्थिपदसार्थकत्वाय साध्ये रज
तार्थिपदं· समव्याप्तेति· यद्यपि प्रवृत्तविषय तद्रजतवृत्तिधर्मविशेषे विषमव्याप्तमिदं तथापि रजतार्थिप्रवृत्ति
विषयरजतेतरावृत्तित्वे उपाधौ तात्पर्यं· यत्तु साधनाव्यापकत्वाय मात्रपदमिति· तन्न· तत्तुन्नित्वे तद्भिन्नान्त
तस्याप्यव्यापकत्वात्· प्रांचस्तु· उपाधिदाताप्रकृते मीमांसकस्तस्य च स्वरूपासिद्धिवारकं सार्थकमेव विशेषण
मेवं च यद्दे साधनाव्यापकत्वाय मात्रपदमिति वदन्ति· रजतार्थिताऽन्यप्रवृत्तिविषयेति मूलं· रजतेच्छाऽन्यप्र

वृत्तिहेतुनिरूपितविषयतावृद्दित्यर्थोतोनशुक्तिवृत्तिविषयतायांप्रमेयत्वप्रकारिकायांव्यभिचारः अरजं
नेतिमूलं· यत्रप्रकाशीन्न तद्धर्मेकदापिनारोपः - - तद्वारणायारजतविषयेतिविशेषणं· ज्ञानपदंतुसंपा
तायातं· विषयतात्त्वेति· एतेनप्रमेयत्वादौसाध्याव्यापकमिदंनव्यत्वासेवसाध्याभेदइतिनिरस्तम्· रजतावृत्ति
त्वंरजतमात्रावृत्तित्वमित्यर्थः इतितुप्रांचः· ज्ञानत्वेनकार्यतावच्छिन्नहेतुतयाप्रवृत्तिहेतुत्वंफलज्ञानेस्त्येवात
उक्तंप्रवृत्तित्वावच्छिन्नेति· फलज्ञानंतूपायेच्छायामिति· तथाचान्यथासिद्धंफलज्ञानंप्रवृत्ताविति भावः· अत्रतु
क्तिप्रवृत्तिविशेषणमिति· शुक्तिःप्रवृत्तिविशेषणमितित्यपपाठः· नन्विष्टेत्यलग्नकतापत्तेरिति भावः· शुक्तिःप्रवृ
त्तिविशेषणंरजतार्थितारजत्वविशेषणंवसिद्धसाधनवारणायेत्यर्थइत्यप्याहुः· नचस्वाश्रयाभेदरजतत्वस
मवायान्यतरसंबंधएवप्रतियोगित्वज्ञानान्तरसंबंधस्यानप्रतियोगित्वप्रकारकत्वमितिवाच्यं· लोहितःस्फटिक
इत्यादौलौहित्याप्रकारकतापत्तेरिति· अत्रक्रमः· इष्टप्रवृत्तिविषयभेदधीविरोधीष्टतावच्छेदकप्रकारकज्ञानत्वं

जनकतावच्छेदकमतोनकोपिदोषइति॰न्यांवस्तुतइच्छाप्रकारप्रकारकधीत्वेनजनकत्वमिच्छाप्रकारस्यसंसर्गो
परउतत्वंतादात्म्यारोपेचरजनमितिनकाप्यनुपपत्तिरिति॰वस्तुतइति॰नचसाधनव्यापकत्ववारणार्थमेवतत्त्व
१ दोपादानमितिवाच्यं॰स्वरूपासिद्धिवारणार्थस्यतथापिव्यर्थत्वापातादिति॰तन्नेति॰नन्तुक्तानद्भूयेकथमतिप्रसंगः
धर्मत्वाविषयेधर्मित्वाविषयत्वापातादितिचेन्न॰धर्मत्वधर्मित्वविषयत्वसमानाधिकरणधर्मवत्त्वेनतात्पर्यात्॰ता
नत्वंचतत्रैवधर्मइतिनकाप्यनुपपत्तिरितियद्यपिविषयत्वंसमूहालंबनेपिदंडत्वांशेविशिष्टधीत्वादितित
वि द्धर्मत्वादिविषयत्वंवाच्यंतथाचनोक्तस्थलेषुतद्धर्मविषयत्वमितिप्रसंगाभावादुक्तविशेषणवैयर्थ्यंतथापिसमा
नाधिकरणतयाऽगृहीतेत्यादिनातदेवोपलक्षितमितिनदोषः॰पुरोवर्त्यगृहीतासंसर्गेति॰एवंचपुरोवर्त्यगृही
तासंसर्गभेदप्रतियोगित्वेष्टतावच्छेदकनिरूपितत्वधीविषयत्वाभावस्यप्रमेयार्थिप्रवृत्तावपिसत्त्वान्नाव्याप्ति
रितिध्येयम्॰नचैवमपितद्भेदप्रतियोगीदंरजतमितिज्ञानाद्भुक्तौप्रवृत्तिर्नस्यात्तत्रतद्भेदासंसर्गग्रहे॰त्यपारव्या २

स्यापत्तेरितिवाच्यं॰ पुरोवर्त्तिसांकांदृत्वेदज्ञानाभावेपुरोवर्त्तिनीष्टत्वेदव्यवहारप्रयोजकज्ञानाभावेवातात्पर्यं॰
आकांक्षावपदार्थान्तरंसाधकविन्निष्ठतिकविन्नेतिफलबलादितिसंक्षेपः॰ अगृहीतत्वेदज्ञानद्वयस्येतिप्र
वृत्त्यापत्तेः॰ प्रतिबंधस्येतिशेषः॰ प्रत्ययाइतिमूलं॰ निश्चयात्मानइतिशेषः॰ अन्यथापूर्वोपस्थितोपनयध्रौव्येवि
रुद्धकोटिविषयत्वात्संदेहरूपत्वेनस्यादितिभावः॰ केचित्तु॰ प्रत्ययाः प्रवर्त्तकाइतिशेषः॰ केचित्तुप्रत्ययादितिपाठस्त
त्रप्रवृत्तिरितिशेषः॰ एकदेतिमूलं॰ त्वमव्याप्तत्वेनेकेति॰ रजतएववेदंरजतंकिंचिद्रंगमित्यत्रातिव्याप्तिवारणायस्वतं
त्रेति॰ भेदाग्रहसंशयोद्भवद्धियतद्भतिशेषः॰ तेननसत्संपनुपपत्तिः॰ एकदेति॰ विशेषणफलमाहयुगपदितिमूलं॰ यु
गपद्भूतयस्मृत्यनुभवादिति॰ तदुपगमेन्यथाख्यात्यापत्तिरितिभावः॰ पदस्मृताविवेति॰ तद्धर्मत्वाविषयत्वात्तत्त्वमस्त्वमिति
भावः॰ नहिस्वातंत्र्यमन्याविशेषणत्वमात्रमितिद्धवितथाठः॰ मनुगमएव॰ यत्रनहीतिमूलस्यस्तत्रनायमुक्ताख्यातस्थात्स्वार्थ
संशयइत्यन्तमेकोग्रंथः॰ ननुज्ञानमसहवर्त्त्यपिहेतुरेवानुमितौ॰ किंचप्रवृत्तिसामग्रीबलवत्त्वाद्भेदाग्रहःसहवर्त्त्यपिस्या

दत आह । वस्तुतइति । वस्तुतस्तु रजतं तद्देश्य युगपत्स्मर्यते तच्च युगपन्नदापन्निरत आह । यदेव वा तच्चेति मूलं ।
तार्किकास्तु सिद्धांतेन्दूषणमेवेदं वक्ष्यति चतुष्के प्रवृत्त्याघापत्तिरिति । अन्यथा नवापीति इतो मूलं । न च मयान्यथाख्यात्यु
3 पगमान्नत्र च तद्भेदज्ञानान्न संशयः स्यादिति वाच्यं । द्वारज्ञाने रजतरंगयो रंगरजतज्ञाने संशयः स्यादित्यच तात्पर्यं । बा
धोऽन्यथाख्यातावितिनेत्याग्रहपदे संविद्विरोधं शंकते तदीयतेति । समूहेति । धर्मधर्मिणोर्वानापन्नोऽनयीयज्ञानस्य समूहा
लंबनत्वादिति भावः । प्रतीतिस्वभावमाह । यस्मिन्निति । अन्यस्मिन्नन्यधर्मवैशिष्ट्यं न भासत इति प्रतीतिस्वभावइत्य
र्थः । विषयमिति पुरोवर्त्तिनि रजतत्वाभावाद्रजतत्वस्य ज्ञानाकारस्योपगमादित्यर्थः । दोषाजन्यत्वं स्वरूपनियामकं
यदि तत्राह भ्रमादिति । ज्ञातं चेत्तत्राह नापीति । साकारेति । यद्यपि प्रसज्य नञि नञा नमिति स्यात् । पर्युदासे समासा
पत्त्याऽसानादिति । तथापि नानुयायि येऽविनिवर्त्त्य मासानियमादिदमवसेयं । यतः ख्यातिरन्यथा नेष्यात्ततो यथार्थेति योजना ।
पदे विकल्पमयादाह । ज्ञानत्वमिति । इत आलोकः । ननु सत्यज्ञानेति । सत्यज्ञानतन्यावृत्त्योग्यपि न प्राथमिकत्वनियमइत्य

पि बोध्यं। अवच्छेदकं विनेति। न चावच्छेदकत्वज्ञानं नोपजीव्यमिति वाच्यं सह कार्यकल्पनापत्तेः। अन्वयव्यभिचारेणं
हि तत्कल्पनमन्वयव्यभिचारश्च कल्पितावच्छेदकावच्छिन्ने सति कार्यानुदय इत्यवच्छेदकत्वकल्पनं प्रथममावश्य
कमिति भावः। कथमन्यथा गृहीतस्यैवेति। गृहीतस्य पत्यद्रूपस्य चक्रादेः धर्मांतरकल्पनाकारणतांतरकल्पनाधर्म्यंत
रेणावच्छेदकीकृतेन दंडादिनोपपत्तेरित्यर्थः। प्रथममिति। यद्यप्यन्यथापि न नियमोऽगृहीतकारणताकज्ञानस्यैव प्रवर्त्त
कतया तत्कारणताग्रहस्य प्राथमिकत्वनियमे मानाभावात्तथापि ज्ञानप्राथमिकत्वेन मीमांसकेन स्वप्रकाशतोपगमे
न च प्राथमिकत्वेनास्याभिधानात्। अन्यथा हेतुत्वाभावे चक्रसत्त्वे फलाभावे चक्राभावाद् हेतुतापत्तेरिति। हेतुत्वाभा
वे चक्राभावफलाभावे चक्राभावाभावादहेतुतापत्तेरिति क्वचित्कः पाठस्तत्र चक्राभावाभावत्वेन हेतुतापत्तेरित्य
र्थः। तेनेष्टापत्तिरिति भावः। किं वा संसर्गाग्रह इति। न च विशिष्टधीप्रतिबंधकज्ञानाभावत्वेनानुगमो लाघवेन विशि
ष्टधीत्वेन जनकत्वादिति। यद्यप्यधिकमिति न्यायादवच्छेदककल्पनं न युज्यते तत्कल्पनं हि तत्पर्याप्त्यधिकरणत्वक

ल्पनमत एव तादृशासत्त्वेऽन्वयव्यभिचारात् तत्सहकारिकल्पनं तथाप्यवच्छेदकत्वकल्पनमस्तु पञ्चाद्यं न तु तत्कल्पनप्र
मात्वमपीति न दोषलेशः इति॰ वस्तुतो जनकज्ञानं विघटयत इतिन्याप्याद्विशिष्टज्ञानाजनकत्वेऽपदज्ञानं प्रतिबंधक
मेव न स्यादिति संक्षेपः॰ वस्तुत इति॰ न च धर्मत्वाद्यविषयत्वेनाविशिष्टज्ञानत्वं स्यादपि स्वर्गजनकमिति दृष्ट्याऽपूर्वसंग्र
हात्॰ इदं परमवधेयं॰ अनुभवत्वासिद्धावप्यथाख्यातिसिद्धावपि तद्घतीत्यादिव्यावर्त्त्येन सिध्यतीति॰ अनन्वितेति॰
यदि वृद्धा युवानः शिशवः कपोताः पतंति सर्वे युगपद्यथांतः॰ खले तथामी मसहिताः पदार्थाः परस्परेणान्वयिनो भवंति
इत्यादिनानन्वितानामेवान्वयस्तदा समूहस्मरणमेव यदि वावांतरवाक्यार्थबोधपूर्वको महावाक्यार्थबोधस्तदा
नीलो घटो गेहे इत्यादौ नीलघटयोः समूहस्मरणं कदाचित्कदाचिद्व्यस्मरणाद्यं नीलघटान्वयेऽवच्छेदकं महावाक्यार्थधीका
ले समूहस्मरणनियम एवेति समुदायार्थ इति दिक्॰ शाब्दाभासेतीत्यारभ्य निर्वाहादित्यवधेयमित्यंतं प्रथमे पाठस्त
तइंद्रियेतीत्यादि॰ अन्यथा मीलक्रमानुरूपत्वानुपपत्तेरिति॰ न च नेदाग्रहात्स्मरत्वानुपपत्तेरिति मूलं॰ यद्यपि वक्ष्य ४

धावनं व्यर्थं इमे रंगरजते इति समूहालंबनादेव युगपत्प्रवृत्तिनिवृत्त्युपपत्तेस्तथापि प्रत्येकं रंगं न वा रजतं न वेति सं
शयः स्यादिति मीमांसकं प्रत्यापादयितुं चतुष्कधावनमकारीति तत्रैव युगपत्प्रवृत्तिनिवृत्त्यापादितेइति· वस्तुतो
ह्रिक एव तात्पर्यं· चतुष्के पुरोवर्त्तिग्रहीतासंसर्गभेदप्रतियोगितयोपस्थितत्वात्तयोर्युगपदापादनानुपपत्तेरित्यव
धेयम्· ज्ञानमितिमूलं· फलाक्षज्ञानं च भिन्नविषयतया न प्रवर्त्तकं किं त्विष्टसाधनताज्ञानेनान्यथासिद्धमिति भावः· विशेष्य
सन्निकर्षत्वेनेति· यद्यपि द्रव्यप्रत्यक्षत्वावच्छिन्ने लाघवेन संयोगत्वेन हेतुत्वं न च प्रत्यक्षतिरज्ञायां व्यभिचारस्तस्या ज्ञानत्व
यत्वान्नचाज्ञानाबुद्धौ व्यभिचारो रजतस्य प्रतियोगिनस्तटस्थज्ञानविषयत्वेप्यज्ञानबुद्धविषयत्वान्नचानुव्यवसाये व्यभि
चारो न च तत्रापि तटस्थधीविषय एव तदिति वाच्यं· प्रामाण्यस्य तद्घटितत्वाऽरस्य तदविषयत्वापातादिति वाच्यं· गुरुमते
नुव्यवसायस्याप्यनुपपत्तेन संयोगाव्यभिचार सत्त्वात्· तथापि लाघवेन प्रवृत्तौ विशिष्टधीहेतुत्वे व्यवस्थिते न मस्यफल
एव व्यभिचारसंभव इति दिक्· यन्नगुरुणोक्तमनुमेयमानारोपसंयोगसत्वान्नान्यथा बाध इति तत्र प्रतिज्ञाति विशेषण

ख्याति १

विशेष्यसंबंधजन्यतावच्छेदकंसाक्षात्त्वंलाघवात्तत्प्रमात्वमितिरूपमनुरूपमानारोपसंतत्त्व इतिदिक्॥ इदंतुप्रतिभा
ति॥ सामान्ययोगजवारणाय लौकिकत्वेआवश्यकेक्रमः कार्यतावच्छेदकानवच्छिन्नएवेति॥ अखंडस्येतिमूलस्यविवरण
5 मखंडतासत्त्वइति॥ निरालंबनमित्यस्यविवरणमसद्घालंबनमिति॥ विशिष्टस्यासत्त्वमतइति॥ ज्ञाननिष्ठायद्विशेष्य
तातन्निष्ठात्यंताभावप्रतियोगिनाप्रकारेणावच्छिद्यतेतद्धर्मिकरणप्रकारकमित्यस्यवैशिष्ट्यज्ञानेमानाभावइति
भावः॥ विशेषणविशेष्यान्येति॥ नचस्वरूपसंबंधाव्याप्तिः विशेषणत्वविशेष्यत्वान्येनरूपेणाविशिष्टधीविषयत्वस्यत
स्यतद्घ्यात्तत्समूहालंबनत्वेदायतथाविषयत्वंसंबंधसिद्धमितिभावः॥ ननुपरंनीलमेवेतात्वत्रामप्यायात्विस्यपर्यान्तरवारण
याविशिष्टव्यावृत्तेति॥ विशेषणत्वागोचरबुद्धिजनकत्वंनीलंनेतिनोक्तदोषइतिभावः॥ नीलस्यनीलाविशिष्टधीरूप
इति॥ यद्यपिनीलाभाववज्ञानंनीलविशेषणत्वगोचरमेव॥ तथापिप्रतियोगीयन्मतेनाभावधीविषयस्तन्मतेनेदं॥ विशि
ष्टधीजनकत्वंविशेषणत्वगोचरधीत्वाश्रयजनकत्वंनचपरमाणुनीलंतथेतिनाणुनीलविषयतयाऽव्याप्तिरं॥ ननुरू ५

पेरसाभाव इति प्रतीत्या गुणस्वरूपस्यापि संबंधत्वं कल्प्यतमेवास्तीत्यत आह गुणागुण्यात्मकस्वरूपस्येति· नहि गुण
स्य तथा स्वरूपसंबंधत्वेन तस्य कल्पितमिति भावः· अन्यथा बाधव्यभिचाराद्यापत्तेरिति· अनुमितिमादायेति शेषः· प्र
सक्तेः पदमपि लौकिकप्रत्यक्षपरं अन्यथा तत्राद्वस्यापातादिति· यत्तु सत्त्वमपि विशेषणं व्यभिचारवारणाये
ति तन्न· लौकिकपदेनैव तद्वारणायेदिति केचित्तन्न· दोषादसन्निकृष्टमेव भासत इति मते ज्ञानप्रत्यासत्त्युपनयत्वेन
तस्यापि लौकिकत्वादिति दिक्· मैवमिति· इदमुपलक्षणं पुरुषस्य दण्डसमवायित्वे पुरुषनाशे दण्डनाशापत्तिः सम
वायिनाशे समवेतनाशात्· संयोगप्रत्यक्षविशेषणप्रकृते गौरवादित्यपि बोध्यम्· अनुगततेति· ननु तावद्विशिष्टधी
व्याप्त्यत्वमनुगतं न कार्यतावच्छेदकं· न च स्फुटतरविवेकप्रकारान्तररहितसंबंधिद्वयात्मकविशिष्टबुद्धित्वं· इदं चोपेय
मेवान्यथा युतसिद्धसंबंधिद्वयविषयकबुद्ध्यपेक्षया वैलक्षण्यानुपपत्तेरिति तद्वैलक्षण्यं प्रकारान्तरदुर्वचमप्युक्तरी
त्यैव निर्वाच्यमिति वाच्यं· तद्वैलक्षण्यं विषयगतं जातिरूपं वा नाद्यः· समवायसिद्धिं विना वक्तुमशक्यत्वात्तस्य· न चायु

6 तसिद्धसंबंधिद्वयरूपविषयनिबंधनं तत्. नित्यसंबंधात्मकस्याघटितसिद्धत्वस्य समवायासिद्धावाप ततोऽसिद्धेः स्फु
टतरविवेकप्रकाशारहितत्वं च घटज्ञानावच्छिन्नत्वादिव्यावृत्तं च जुमद्याकारमेव. नापि संयोगसंबंधाविशेषणकज्ञानमात्र
विषयकलौकिकविशिष्टबुद्धित्वं घटज्ञानमितिप्रत्यक्षेऽनुमितौ वातिप्रसंगात्. नांत्यः प्रत्यक्षत्वव्याप्यत्वेपि चाक्षुषत्वादिना
संकरप्रसंगात्. अयुतयुतविषयकसमूहालंबनवृत्तितयाऽव्याप्यवृत्तितापाताच्च. किंच तादृशविषयबुद्धिषु तादृशा
विषयकप्रत्यक्षत्वमपि न कार्यतावच्छेदकं मानाभावाद्गौरवाच्च ज्ञानत्वेवा कारणतावच्छेदकं किं समवायत्वं विषयत्वं वा आ
द्ये समवायत्वस्य नित्यसंबंधत्वस्यैव लाघवेनावच्छेदकत्वे गुणादीनामेव तेन रूपेणानुगतानां जनकत्वे तथापि मानाभा
वः. अन्त्येपि गुणादीनामेव तथा जनकत्वमस्तु इति समवाये तथापि मानाभावएव. न चानुगतसंबंधत्वस्याभावः. तव
तामपि तुल्यत्वात्. अन्यथानुगतव्यापकतावच्छेदकानुपपत्तेः. एतेन संबंधत्वस्य विषयत्वादिगर्भस्येत्यपास्तं. व्यापकता
वच्छेदकत्वेनावश्यवाच्यत्वात्. न चातिप्रसंगः. अयुतसिद्धसंबंधिरूपविशेषसामग्याविरहादेवोपपत्तेः. वस्तुतस्तु ला ६

घवात्सत्वविशिष्टविषयकलौकिकप्रत्यक्षत्वं कार्यतावच्छेदकं विशेषणसंबंधत्वसंबंधत्वं वा जनकतावच्छेदकं । तत्का
र्यकारणभावादेवात्र वृत्तिनाप्रयोजकत्वं । न च यत्सामान्ये यत्सामान्यमिति न्यायाद्विशेषयोरपि तथात्वं । तर्हि तद्विशिष्ट
प्रत्यक्षे तद्विशेषणसंबंधत्वेन हेतुतास्तु न तु तेन तेन रूपेणानंतसामग्रीकल्पनापातात् कार्यस्यान्यथैवोत्पपत्तेश्च
त्तिदिक् । अत्र भ्रमः । बाधकं विनाकृतविशिष्टबुद्धित्वं कार्यतावच्छेदकं ज्ञानस्य परसमवेतत्वे वा दुषत्वं स्यादिति बा
धकमित्यप्रसंग एव तत्र । लाघवाच्चैकसमवायसिद्धिरिति दिक् । अनुगतस्य भावकार्यादेरिति । न चैतावता ध्वंसभा
वव्यावृत्तसंबंधसिद्धावपि भाव एव स्वरूपसंबंधो ध्वंस एव समवायोऽस्त्विति वाच्यं । तत्राभावत्वेनानुगमसंभवा
दत्र च तदभावादित्याकर एव स्फुटत्वात् भावत्वस्य गगनादिसाधारणत्वादिति भावः । गुणादिविशिष्टबुद्धय इति ।
न चाकल्पिततया स्वरूपसंबंधस्य तेन सिद्धसाधनाभावे कथं नार्थांतरं । किं च समवायस्यापि संबंधत्वमन्यैव कल्प्यं तद्
रं स्वरूपाणामेव तदस्तु । लाघवात् । एवं चोक्तलाघवेनाभावस्थले संयोगमात्रबाधे समवायकल्पनं पूर्वमपि स्वरूप

वेंसंबंधकल्पनं भवत्येवेति समवायबाधोत्तरकल्पनीयस्येत्याद्यप्ययुक्तमेवेति वाच्यं· स्वरूपद्वयसंबंधत्वापे
7 क्षयैकसंमवायकल्पने विशिष्टबुद्धित्वावच्छिन्ने लाघवादिति· किंच यदि समवायो न तदा किं कारणनाशाद्भाव
कार्यनाश उपेयतां तथा च कस्यचिदाश्रयस्य नाशात्कार्यस्य नाशो भवति कस्यचिच्च नेत्यसत्त्वादिकार्यव्यावृत्तः स
मवाय एव लाघवात् जातिवदखंडश्चोपेयतेवच्छेदकोऽत एव नाभावसाधारण्यं· तथात्वे तत्त्वेनैव सिद्धेः अत एव नै
वं नित्ययोः समवाय एवं सिद्धेदित्यपास्तं· सर्वत्र च विशिष्टधीनियामकानतिप्रसंगकसमवायस्यैवावच्छेदकत्वा
त्· स च समवायः कारणमिति तत्समवायिकारणमुच्यत इति· अत एवाभावेप्यस्तु समवायो न चोन्मज्जनापत्तिः अ
न्यभावत्वस्य तद्धर्मावच्छेदकस्य कल्पयितुमुचितत्वादित्यपास्तमुपजीव्यविरोधापातादिति· समवायानंगीकारे
समवायिकारणादिव्यवस्थानं स्यादित्यपि वदंति· तद्वाजंत्विति· न च निरूपधित्वमेव विपक्षबाधकं अत एव तत्र तिरि
क्तेति विशेषणं प्रक्षिप्यातिरिक्तसंबंधसाधनमप्येवं स्यादिति निरस्तं· तत्र विपक्षबाधकाभावादिति वाच्यं· ऽव्यवि ७

शेषणविशेष्यकबुद्धित्वस्योपाधित्वसंभवादिति· निर्विषयत्वाभावमात्रविषयकेति· न चेदानीमाकाशमित्यत्र तथापि
व्यभिचारः लौकिकप्रत्यक्षत्वस्य हेत्वर्थत्वात् पदसंकोचेन तागासिद्ध्यभावादिति· न चैवं निर्विषयत्वेत्यर्थे· यत्रात्मज्ञा
ने विद्यमाने आत्मा ज्ञानवानिति धीः घटसमवायो नास्त तद्दोषात् किंतु विषयविषयिभावस्तत्र व्यभिचारवारणार्थ
त्वात्· तदेतदुक्तं प्रमात्वस्य हेतौ विवरणाच्चैतत्पदलभ्यमेवेति न चैवं यथार्थसमवायविशिष्टबुद्धौ च न व्यभिचारः सम
वायत्वस्यायोग्यतयाऽभावघटितत्वाच्च लौकिकत्वाभावमात्रविषयत्वयोर्हेतुविशेषणयोरभावात्· न चैवं सम
वायत्वविशिष्टसमवायविषयकरूपविशिष्टबुद्धौ स्वरूपासिद्ध्यापत्तिः समवायस्य संसर्गमर्यादयाभानेन सम
वायत्वाविषयकत्वात्· एवं दोषाद्रूपघटसमवायाभानेसंबंधालकरूपघटसंबंधविषयके प्रत्यये व्यभिचारप्र
संगात्· दोषाभावे सति वर्तमानस्य योग्याभावविषयकबुद्धित्वादित्यत्र तात्पर्यं· वनेसिंहनाद इदानीमाशोकोमित्यादौ
घाताऽयोग्यतया च नाकाशायां व्यभिचारो नेति दिक्· क्वचिदपि यः संबंधिनि स न संबंधस्तद्विषयत्वं साध्यं· समवा

यश्च तथा गुणाद्यावितिन व्यभिचार इत्युपाध्यायाः। इतरनिरूपणेतिमूलं। ननु भूतले घटाभाव इति बुद्धौ तथापि
व्यभिचारः। न चेतरनिरूपणानिरूप्यमात्रविषयकबुद्धित्वं विवक्षितं इतरनिरूपणनिरूप्यसमवायविशेषतयाऽ
8 सिद्ध्यापत्तेरिदानीमाकाशमित्यादौ तत्राद्वस्याश्चेति। न। इतरनिरूपणानिरूप्यमात्रविशेषणविशेष्यविष
यकलौकिकप्रत्यक्षत्वस्य विवक्षितत्वादिति दिक्। ननु संयोगादौ संबंधत्वस्यैकस्य व्यापकतावच्छेदकस्याभावात्
कथं व्याप्तिग्रह इत्यत आह। संबंधश्चेति मूलं। संबंधिद्वयप्रत्यक्षत्वादिति मूलं। ननु शरीरात्मसंयोगे व्यभिचारः। किं
च सत्त्वागुणत्वादेस्तद्वाचकशब्दस्य च प्रत्यक्षे तत्संकेतस्याप्रत्यक्षत्वेन व्यभिचारः वैयधिकरण्यं चेति चेन्न। एकेंद्रि
यजन्यलौकिकप्रत्यक्षसंकेतान्यसंबंधिद्वयकत्वादित्याशयात्। आत्मसंयोगस्यायोग्यत्वेपि एकेंद्रियजन्यसंबंधि
द्वयप्रत्यक्षरूपसहकारिविरहादप्रत्यक्षत्वमित्यप्याहुः। न चैकस्यैव संबंधस्य क्वचिद्योग्यत्वं क्वचिदयोग्यत्वमिति वा
च्यं अवच्छेदभेदेनाविरोधादिति। भट्टाः प्रत्यवतिष्ठते। नन्विति मूलं। यद्यपि तन्मतेनाभावः प्रत्यक्षस्तथापि परीत्यदमुक्तं। य

पटाभावाभावस्य वैशिष्ट्येन संबंधेन तत्त्वस्वीकारे सोपि घटाभावोपि तेनैव संबंधेन तत्त्वया स्वीकार्यः वैशिष्ट्यस्यैक
त्वाभ्युपगमादित्यर्थः॰ यद्यपि घटाभाववतीत्यत्र नैव तत्त्वमंगीकारयितुं शक्यते तथाप्येवमपि तन्निर्वहतीत्यदोष इति॰ अ
भावस्यत्वेत्विति॰ न च तद्घटाभाव एव तद्घटेन तस्य नष्टत्वादिति वाच्यं॰ उरायकल्पने मानाभावात्॰ कालविशेषसंस
र्गिणैवाभावेन प्रतीत्युपपत्तेः॰ किंचाभावः प्रतियोग्येव घट इत्यन्योन्यो वा॰ नाद्यः घटस्याभावसमानकालस्य तत्त्वानाशात्वापे
गान्नान्त्यः घटतदभावयोः परस्परविरहरूपतानापत्तेः एवं त्रिगुणयोरिव परस्परविरोधितामात्रं स्यादिति॰ तदभिधानं
च क्वचिदेकदेशिमतेनेति भावः॰ ननु यथा स्वरूपयोः कदाचित्संबंधत्वं न प्रतियोगिसत्त्वकाले तथा वैशिष्ट्यस्यापि कदाचि
त्संबंधत्वं न प्रतियोगिसत्त्वदशायामिति तुल्यं॰ न च संबंधिद्वयभिन्नसंबंधेन कादाचित्कसंबंधत्वमिति कल्प्यमप्रयो
जकत्वात्॰ एवं च यथैकस्य संबंधत्वकल्पने लाघवं तथैककादाचित्कसंबंधत्वकल्पनेप्यर्थान्तरमपि स्वरूपसंबंधेन न भ
वति समवायदेवप्रतीतिकादाचित्कत्वानुपपत्तिः कालिकानस्यैवेत्यत आह वस्तुत इति॰ ननु तन्मतेपि विशेषणं विषयो भवति न

परं विशेषणसत्त्वाप्यपेक्षितान्यथाऽन्यथा माऽन्यथामयोरविशेषेणैव प्रतीतिः स्यादत आह। वयं त्विति। ध्वंसनाशे घटोन्म
ज्जनापादनमेवेति। ननु तस्य घटस्य कथमापादनं सद्वत्तदा तज्जनकप्रागभावस्याभावात्। किं च लाघवेनाभावविशिष्ट
९ बुद्धित्वावच्छिन्ने सिद्धे वैशिष्ट्ये तद्वारणार्थं भावत्वं विशेषणं नाश्यतावच्छेदकतानन्तु कल्पितवैशिष्ट्यबाधः उपजीव्यविरो
धात्तत्प्रामाणिकत्वेन फलमुखगौरवस्यादोषत्वात्। अन्यथा लाघवेन कारणनाशत्वेन नाशकत्वमवधारितमिति निमि
त्तकारणं लुप्येत वैमानाशेन पटनाशात्। तत एव च ध्वंसस्य कारणकोपि न स्याद् घटादिवैतत्सर्वोनुभववशात् समवायः
कारणविशेषणं तदा लाघवेन सिद्धे वैशिष्ट्ये वैशिष्ट्यान्यत्वमपि विशेषणमस्तु। किं च द्रव्यत्वावच्छिन्नगुणत्वावच्छिन्ना
न्वयनिरूपितसंबंधत्वगौरितिधीविषयसंबंधत्वादिना निरुक्तसमवायत्वावच्छिन्नसमवायविशिष्टनाशो वा नाश
सं कोस्तु। न चैतदपेक्षया नित्यसंबंधत्वं लघिति वाच्यं। नित्यत्वस्य ध्वंसाप्रतियोगित्वरूपतया ध्वंसत्वस्य जन्याभावत्वरूपत
या लाघवाभावात्। एवमप्यत्यन्ताभावे तदपवादकाभाव एव च अत एवाभावसमवायेपि नैतद्बाधकं। किं च जातिव ९

दखंडः समवाय एक एवेति किं तद्धर्मसमवायत्वनिर्वचनेनेति संक्षेपः। अत्राहुः। अनुगमकेनेपि ध्वंसनाशापाद
नमेवानिष्टं। किं चेत्याद्यपि न। प्रथमं समवेतत्वेऽवच्छेदकत्वे कल्पिते उपजीव्यबाधेन समवायस्यैव बाधकल्पना
त्। एवमप्यत्यंताभाव इत्याद्यपि न ध्वंसत्वस्य विशेषणतयाऽभावत्वावच्छेदेन संबंधत्वकल्पनादिति। किं च जातिव
दित्याद्यपि न। निर्विकल्पकोपस्थितिकारणत्वग्रहासंभवेन नित्यसंबंधतावच्छिन्नस्यैव समवायस्यावच्छेदकत्व
स्यांगीकरणीयत्वात्। न च तथापि तदुपस्थितिप्रकारेण तत्त्ववच्छेदकमिति वाच्यम् अतिप्रसक्तरूपोपस्थितेः कारणत्व
स्य तथाप्यशक्यत्वादिति दिक्। रूपस्य विशेषणत्वपक्षे दोषमाह रूपेति मूलं। उपलक्षणत्वपक्षे स एवातिप्रसं
ग इत्याह। अन्यथेति मूलं। यद्वा तत्स्वरूपमात्रसंबंधरूपत्वं। रूपारूपसंबंधरूपत्वं वा आद्ये रूपेति। अंत्ये अ
न्यथेति। तथा सति स एवातिप्रसंग इति भावः। अतीतेति मूलं। तथा च लिंगत्वमाद्येव तत्र ज्ञानानुमितिरिति भावः।
गौरवादिति मूलं। अन्यत्र विशेषणसंबंधस्य स्वरूपसत एव विशिष्टधीहेतुत्वदर्शनादिति भावः। अयं भा

वः ज्ञाततात्त्वमसाध्यत्वे ज्ञातत्वव्यवहारस्य बाधानंतरं न ज्ञात इति व्यवहारापत्तिरतीतादावज्ञातत्वापत्तिश्च
तथा सति व्यवहारविरोध इति दिक्॥ अत एव स्वरूपसंबंधविषयत्वेन प्रमात्वमुपपादयति· अतीतादाविति
16 मूलं· तादात्म्यधियं प्रमाणमुक्त्वा नीलघटयोः सामानाधिकरण्यधियं प्रमाणमाह तथैवेति मूलं· आर्थमुक्त्वा शा
ब्दमपि सामानाधिकरण्यं मानमाह· एवमिति मूलं· नन्वेवमुपचारः क्वापि न स्यादत आह मुख्यात् इति मूलं· स्या
दिति मूलं· प्रत्यभिज्ञाविरहापाताच्चनेष्टापत्तिरिति भावः· ननु तर्हि शुक्लत्वादिजातिग्रहायैव समवायोऽस्त्वि
त्यत आह शुक्लत्वादाविति मूलं· नन्वत्यंतभिन्नाभ्यामिति· इदमुपलक्षणं प्रत्यक्षपरं प्रतिनोपन्यासार्हमित्य
तोऽर्थापत्त्युपदर्शनमित्यपि बोध्यं· उपाध्यायास्तु प्रतियोगिविशेषघटिताभाववृत्तिधर्माव्याप्यधर्मत्वादित्यर्थः·
अत्यंताभावत्वमन्योन्याभावत्वं यत्तथैवेति प्रतियोगिविशेषघटिताभाववृत्तिधर्मव्याप्यत्वाच्च न द्रव्यत्वाभावत्वा
दौ व्यभिचार इति· न· प्रागभावघटात्यंताभावान्यतरत्वे व्यभिचारात्· अत्यंताभावत्वे दृष्टान्त इति· अत्यंताभाव १०

त्वस्य नित्याभावत्वव्याप्यत्वादिति भावः· हेतावभावपदं स्वरूपकथनाय· नित्येति वा मूलं· नित्याभावेत्यर्थः·
अत्र सिद्धसाधनमाह तस्यैवेतीति· ननु सिद्धसाधनं रूपामान्योन्याभावमादाय वाच्यं तमादाय च सिद्धसाधनं
प्रागेव परिहृतं· न ह्येककालावच्छेदेन रूपामतदन्योन्याभावयोर्घटे वृत्तिरन्यथा नोक्तस्थलमादाय तेन
सिद्धसाधनमिति भावो न विरोधापत्तिरिति· अत्र प्रतिभाति· संयोगवदन्योन्याभावोऽव्याप्यवृत्तिरिति मता
वष्टंभेनैतत्· यद्वा रूपत्वसत्त्वावच्छेदेन गुणभेदतदंत्याभावौक्त इत्यविवादं· तथा च तादृशसामान्यान्योन्या
भावमादाय सिद्धसाधनपरीहारेप्युक्तादृशगुणान्योन्याभावमादाय सिद्धसाधनाभिधानमविरुद्धमेव
तिदिक्· यद्वेति तथा च स्वस्वाभावो न यद्वृत्त्यवच्छेदकधर्मसमानाधिकरणत्वमुपाधिर्वाधस्यानुमानदूषणमि
ति भावः· ननूपाधेः पक्षे साध्याव्यापकत्वमित्याशंकते· न वेति· पूर्वपक्षिमते पक्षे साध्यवदुपाधेरपि विद्यमान
त्वान्न तदव्याप्तिरित्याह· तेरपीति· विशेषणयोः प्रतिस्वं नानात्वेनेति· अत्र प्रांचः तत्तद्विशेषणतात्त्वस्याननुगत

त्वेपि विशेषणतात्वावच्छेदेनैव कल्पनं॰ न च विशेषणतात्वानुगतधर्माभाव एव दोषः स्वरूपसंबंधात्मक
स्य विशेषणतात्वस्य सत्वादन्यथा षोढाप्रत्यासत्तिपरिगणनविरोधापातात्॰ विशिष्टप्रत्ययजनकयोग्यत्व
रूपस्य तस्य स्वयमेव निरुक्तत्वादन्यथात्मसंयोगस्यापि तत्संयोगत्वेन तत्कल्पनेन नयनघटसंयोगस्याप्य
॥ हेतुत्वापत्तेरिति॰ तथा च यद्विशेषणतानातिरिक्ता तदेव परं समवायकल्पनं नान्यथा॰ न चैवं वायोरूपव
त्वधियोपि प्रमात्वापत्तिस्तदभावानवच्छिन्नसमवायस्य तत्प्रत्यासन्नितया वायोः समवायस्वरूपसंबंधत्वा
न्नवच्छिन्नत्वात्॰ विशेषणतासत्वे संबंधविषयतानुमितौ तद्विषयतापपन्नो समवाय एव न स्यादिति॰ अत्र ब्रूमः॰ वा
योः समवायसत्वेऽभावानवच्छिन्नत्वस्यापि तत्र संबंधसत्तया आपाद्यतया पूर्वनरूपप्रतीतिप्रमात्वापादनं तदवस्थ
मेव विशेषणताविरहे॰ न चैवं समवायासिद्ध्यापत्तिः॰ कारणनाशेन कार्यनाशोजनकतावच्छेदकत्वेनाभावव्याप्
त्तस्यैव कल्पलाघवेन साधितत्वादिति दिक्॰ न च लाघवादनुपलंभमात्रमिति॰ तथा चानुपलब्धौ तव योग्यतावि ११

शेषणं मम स्वग्राह्येति विनिगमकाभावस्तुल्य एवेति । किं चेन्द्रियसंबद्धविशेषणतेन्द्रियविशेषणतयोः पश्चा
द्भावश्चाभावप्रत्यक्षजनकयोरेवं कार्यतावच्छेदकं भिन्नं तत्पक्षे मम तु न तथेति लाघवमपीति भावः । न च तदपि
निर्वहतीति वक्ष्यत इति । अयं भावो यथेन्द्रियसन्निकर्षः साक्षात्कारकारणं कल्पित इति विशेषणरूपेण तस्यैव हे
तुत्वमुचितमित्युच्यते । तथा सामान्यतोऽसंसर्गाग्रहो हेतुः कल्पित इति विशेषणरूपेणानुपलब्धिरेव हेतुरस्तु विनिग
मकाभावान्न च योग्यानुपलब्धिविषयत्वेनाभावस्य योग्यतयाऽजनकतावच्छेदिकानुपलब्धिः कथं हेतुः स्यादिति वा
च्यमुक्तरूपवत्त्वविरोधादिति । यद्वा प्रतियोगिसत्त्वविरोधीति । ननु सामान्यसामग्र्या बाधकत्वेऽनेन रूपेण गुण
त्वेमानाभावः । न चाभावप्रत्यक्षमात्वाकस्मिकत्वापत्तिः । गुणान्तरसत्त्वादेव तदभावात् । न च गुणदोषाभ्याम
न्यथासिद्ध्या सामान्यसामग्र्येव मास्त्विति वाच्यं प्रसंजनगर्भायास्तस्या आवश्यकत्वादन्यथाऽसंसर्गाग्रहोऽपि हेतु
र्न स्यादिति तत्र प्रतिभाति । यत्सामान्ययोरित्यादिन्यायेनयमपि विशेषसामग्री गुणान्तरस्य गुणान्तरानपवादकत्वा

डुक्तान्यथासिद्धिरपि न भवतीति दिक्॥ नन्वेवं नान्योन्याभावः प्रत्यक्षः स्यात्प्रतियोगिसत्त्वविरोध्यनुपलब्ध्यभा
वात्तदधिकरणे प्रतियोगिसत्त्वाद् अत एव तादात्म्यतया प्रतियोग्यनुपलब्धिरस्त्येवेत्यपास्तं तथापि तस्य तदवि
१४ रोधित्वात्॥ न चेदं संसर्गाभावप्रत्यक्षसामग्रीनिर्वचनमिति नाव्याप्तिर्दोषः अत एवोत्पाद्यग्निमयं घविरोधादि
ति॥ अत्र केचित् तादात्म्यतया प्रतियोग्यनुपलब्धिरन्योन्याभावप्रत्यक्षे संसर्गितया तदनुपलब्धिः संसर्गाभावग्र
न हे च हेतुर्नैवमननुगमः प्रत्येकमेव हेतुत्वादिति॥ अत्र ब्रूमः॥ आरोप्यसंबंधावच्छिन्नप्रतिसत्त्वविरोधिनी तत्सं
बंधावच्छिन्नानुपलब्धिर्विवक्षिता॥ न चास्या अन्योन्याभावादौ व्यभिचार इति॥ उपाध्यायास्तु उपलंभसामा
न्याभावोऽभावप्रत्यक्षमात्रे संसर्गितयोपलंभाभावग्रहे तादात्म्यतयोपलंभाभावश्चान्योन्याभावग्रहसामग्री
यां सामान्ये यत्सामान्यमिति न्यायादिति तन्न॥ एवं सति तत्तोपरान्योन्याभावाप्रत्यक्षतापत्तितादवस्थ्यात्सा
मान्यसामग्रीविरहादिति॥ अत्रोपलंभाभावः प्रत्यक्षाभाव इति॥ अयं भावः न ह्युपलंभसामान्याभावः कार १२

णंपीतत्वेशंखेप्रत्यक्षेणश्वैत्यसंसर्गेस्थितेतत्तादात्म्येवानुमानाद्रूप्यमाणेस्थितेतान्योन्याभावःश्वैत्यसंसर्गाभाव
स्यप्रत्यक्षतोनगृह्येत·नचाभावत्वमेप्रत्यक्षोपलंभाभावोनुपलंभमात्रमभावप्रमासामग्र्यातिवायुंगुंजा
पुंजेवह्नित्वमादुक्तस्पर्शानुमितौतदुपलंभसामान्याभावाभावेपित्वचाप्रमारूपोक्तस्पर्शाभावग्रहोत्पाद
त·त्वमात्वमरूपस्याभावप्रत्यक्षात्मककार्यस्यानुगतस्यनिरुक्तेनाननुगतेनोपलंभाभावेनानिर्वाहाच्च·ननु
प्रतियोग्यधिकरणगोचरसत्वप्रत्यक्षविषयत्वाभावएवानुपलंभोस्तु·तत्रचाधिकरणगोचरतादात्म्यरूप
सत्वप्रत्यक्षविषयत्वाभावस्तादात्म्याभावग्रहेधिकरणगोचरसंसर्गित्वरूपसत्वप्रत्यक्षविषयत्वाभावस्तुसंस
र्गाभावग्रहइति·न·एवंवायोरूपाभावःप्रत्यक्षोनस्याद्वायुगोचरसत्वप्रत्यक्षविषयत्वस्याप्रसिद्ध्यारूपेतदभा
वासंभवात्·नचरूपाभावएवतत्प्रसिद्धिस्तद्धिप्रतिचंप्रतितत्कारणसत्त्वेनतत्साधयतस्तच्चैवतत्प्रसिद्धि
मुपजीव्यतत्सत्त्वोपन्यासस्यानर्हत्वात्·अन्योन्याश्रयप्रसंगात्तत्प्रसिद्धौतत्कारणसत्त्वसिद्धिस्तत्सिद्धौच

तत्प्रसिद्धिरिति। अत एव प्रतियोग्यधिकरणगोचरतादात्म्यप्रत्यक्षविषयत्वाभावस्तादात्म्याभावग्रहेऽधिक
रणप्रतियोग्युपलंभाभावस्तु संसर्गाभावग्रहे हेतुरित्यपास्तं। न चास्यार्थोऽधिकरणप्रतियोगिसत्त्वप्रत्यक्षविषय
त्वं प्रसिद्धमिति वाच्यं एवमप्यभावप्रत्यक्षमात्रकारणीभूतानुपलंभानिर्वचनाद्वक्ष्यमाणरीत्या तदिंद्रियकर
णत्वस्याव्यापकत्वे तच्चाप्यप्रसिद्धेश्च। न चाधिकरणप्रतिसंसर्गप्रत्यक्षविशेष्यत्वाभावस्यापि शाश्वततादात्म्या
13 भावाप्रत्यक्षतापत्तेः प्रतियोगिसंसर्गप्रत्यक्षाप्रसिद्धेश्च। न चाभावग्राहकउपलंभसामान्याभाव एव तत्र च संशयवि
पर्ययावपि प्रतियोगिनोऽधिकरणप्रतियोगिसंशयविपर्ययसत्त्वेऽभावानिश्चयात् तौ च मानसौ पित्त्वाद्देपि प्रसिद्धाविति
वाच्यं। मानसेऽस्वैत्यप्रत्यक्षे चक्षुषा तदभावप्रत्यक्षापत्त्या मंडूकवसाक्तनयनजन्योरगत्वप्रत्यक्षे त्वचा तदभावाप्रत्यक्षत्वा
पत्त्या च तदिंद्रियकरणकत्वस्याव्यापकत्वे चक्षुषापि शाखान्योन्याभावप्रत्यक्षे प्रसिद्ध्यभावस्य च तुल्यत्वात् तस्माद
धिकरणप्रत्यक्षरूपप्रतियोग्युपलंभाभाव एव हेतुर्वाच्यस्तच्चाधिकरणप्रतियोगिसत्त्वविरोधी यो भवति सोऽभा १३

वप्रमां जनयति तदन्यस्तु दोषसहितोऽभावभ्रमं जनयतीति साधूक्तं नापि पूर्वाभावाभावः प्रत्यक्ष इति दिक्॥ प्रत्य
क्षे धिकरणप्रतियोगीति॥ अभावग्राहकत्वाभिमतेंद्रियजन्यप्रत्यक्षत्वमित्यर्थः॥ तेन मानसस्यैतत्प्रज्ञाने न चाक्षुषस्यै
तच्चाविरोध इति भावः॥ प्रत्यक्षं चानाहार्यबोध्यं तेनारोप्यनिषिध्यत इत्युपगमादाहार्यारोपस्य विद्यमानतयाक
थमेतस्याः कारणत्वं॥ न च यथार्थत्वं प्रत्यक्षविशेषणं विषयाबाधेनाभावभ्रमस्य लतद्धेतुः प्रमात्वान्ता दृशप्रतियो
गित्वमेपि तदभावप्रत्यक्षानुदयाच्चेति निरस्तं भवति॥ न च व्यधिकरणप्रत्यक्षमादाय दोषस्तत्तद्रूपीयत्वस्या
पि प्रत्यक्षविशेषणत्वात्॥ यद्यपि घटवत्कपाला नाहार्यप्रत्यक्षाग्रिमक्षणे घटध्वंसस्य प्रत्यक्षमेवं न स्यान्त
थापि यः कालोऽभावाधिकरणत्वेन गृह्यमाणस्तत्कालावच्छिन्नो यः प्रतियोगिसंसर्गविषयत्वाभावस्य सत्वान्ना
नुपपत्तिरिति प्रतिभाति॥ एवं शब्दस्याप्यभावरतिम्फलं॥ ननु श्रोत्रैकधीकरणं व्यापारवतस्तथात्वादस्य च तदभा
वान्न च शब्द एव तथा प्रतियोगितध्वंसयोरेकत्वाजनकतया शब्दध्वंसप्रत्यक्षेतस्याव्यापारत्वात् न च शब्दध्वंस एव १४

व्यापारः प्रागभावप्रत्यक्षे तथाप्यनुपपत्तेरिति॰न॰श्रोत्रमनःसंयोगस्य श्रोत्रकर्णशष्कुलीसंयोगस्य वा तथा
त्वादिति॰तावन्मात्रस्य ज्ञातित्वइति॰तथा च भावत्वसहितं तल्लक्षणं ज्ञातित्वप्रयोजकमिति भावः॰एतेन यत एव न
ज्ञातिरभावोऽत एव तदापादनं बाधस्यापादनेनुगुणत्वादिति मूलदूषणं निरस्तं बोध्यं॰अभावसमवायकल्पन
15 मिति॰ननु गुणकर्मादीनामपि भावत्वमनुगमकमस्त्येवेति किं विनिगमकं॰किंच यदि सामान्यतया ध्वंसत्वविहा
याभावत्वावच्छेदेन स्वरूपसंबंधत्वकल्पनेन तदा प्रमेयत्वावच्छेदेनैव तत्कल्पनामिति समवायापलापापत्तिरि
ति॰अत्रेदं तत्त्वं॰भावत्वेन संबंधतावच्छेदकं गगनादावपि गतत्वान्न च गगनमपि स्वगुणसंबंध एवेति कथमति
प्रसंगः॰सत्यं न त्वाधेयतालक्षणसंबंधाधिकरणं गगनं अभावत्वं च भवत्येव तथेति वैषम्यादिति॰एतेन प्रमे
यत्वमिव सामान्यमप्यभावत्वं परित्यज्य गुरुणा ध्वंसत्वेनैव स्वरूपसंबंधत्वमवच्छिद्यते तत्रैव बाधकसत्त्वादि
ति समवायोत्थं ताभावे दुर्वार एव॰किं चैवं सामान्यतया प्रमेयत्वावच्छेदेन समवायकल्पनात् समवायिनाशजन्य १४

इत्यस्ति न च ज्ञानं ज्ञाने घटत्वेन तद्विषयतेत्यत आह निर्विकल्पकेति॰ संबंधिनिर्विकल्पकात्तदीयसंबंधानव
गमे संबंधज्ञानं प्रति संबंधितावच्छेदकप्रकारकज्ञानस्य जनकत्वे कल्प्यमाने संबंधज्ञानत्वापेक्षया ससंबंधिकज्ञान
त्वस्य सामान्यतया विभागादिसाधारणतया तदवच्छिन्नं प्रत्येव जनकत्वात्॰ ससंबंधिकपदार्थस्य संबंधितावच्छेदकनि
रूप्यस्य तद्विन्निवेयत्वमिति व्याप्तिबलात्तद्विन्निवेयत्वमित्यर्थः॰ यद्यपि संयोगपदादिना विषयं विनापि ज्ञानं ज्ञानं॰ तथापि
मध्यमहेतौ तात्पर्यम्॰ न च सोपि दूषितः॰ विनिगमनाविरहेणायावद्विषयनिरूप्यत्वस्यापार्थात्सिद्धेरिति॰ अन्यथेतिमू
लेः॰ पुरोवर्त्तिरजतसमूहालंबनानुव्यवसायवत्पुरोवर्त्तिरजतत्वसंबंधविषयत्वानुध्येयत्वे वानुव्यवसायः स्यादित्यर्थः॰
अत्र तद्वतितत्प्रकारकत्वतद्वैशिष्ट्यज्ञानत्वयोराद्यस्य प्रकारत्वस्यज्ञानसमानत्वादिगर्भतया ऽतिरिक्तत्वाप्रवेशेन ब
हुव्रीहिघटिततया च गौरवमित्यपि मंसा रमिति॰ न च दंडत्ववति दंडसंयोग इत्यस्य दंडप्रमात्वापत्तिस्तत्प्रतियोगित
यातज्ञानत्वस्य तदर्थत्वादित्यवधेयम्॰ दिगिति॰ स्वरूपरूपमन्नावत्त्वं यथानुपपन्नत्वात्पूर्वाज्ञातं प्रकारस्तथा ऽव्यादिष

डित्यादिघटिताभावत्वमेवास्तुप्रकारः स्वरूपस्य प्रकारत्वेऽभेदेन तन्निष्ठताख्ययाननुगत्याकल्प्यात्तन्निष्ठधर्म्मस्यै
वतत्प्रकारत्वात्· तथा चेदमेवान्यं नेगत्योपेयतां· किंच प्रतियोगित्वं यदि स्वरूपं कथं घटवांज्ञातं· किंच स्वरूपप्रकार
त्वेननुगमः· अपि च नानावस्थास्वरूपे तस्यैकत्वात्· न च ज्ञाने एकस्यैव स्मरणे प्रकारत्वादिति· अत्राहुः· विशिष्टधीत्व
15 मनुगतं न कार्यं × गौडास्तु वैशिष्ट्यं धर्मधर्मिताविनासमवायः न ह्येन तदनंगीकारात्· गुरूणां तदतीन्द्रियत्वस्वीकारा
दिति भानं च रजतत्वेनैव रजतस्य येनैव रूपेण यस्योपलंभस्तेनैव तज्ज्ञानादुपनीतबोधे अन्यथाप्रसंगाद् तत एव परमाणु
जन्यं घ्यणुकमित्यादावुपनीतज्ञाने परमाणुत्वेनैव तज्ज्ञानमिति· व्यवसायेत्यादिग्रंथस्य चार्यभावः मिश्रनये ज्ञानलक्षणप्र
त्यासत्तेस्तुल्यत्वादित्यर्थादित्यर्थः· गुरुनये व्यवसायस्वरूपेजनयितव्ये यत्प्रत्यासत्तिस्तस्यास्तुल्यत्वादित्यर्थः· अद्यमते घटा
घटत्वप्रकारकधीविषयइत्यनुमितावेव प्रामाण्यं समुत्खटवासनाव ज्ञाताऽऽसतइति केचित्· वस्तुतस्तु घटनिष्ठघटत्व
प्रकारकज्ञाततात्वेन घटप्रमाजन्यत्वानुमानं· न च हेत्वसिद्धिः· घटोयं घटत्वेन ज्ञात इत्येवमेव ज्ञाततात्ज्ञानात्· घटोयमि

तिग्रहवत्ज्ञातताप्रत्यक्षेपि घटत्वधीहेतोश्चक्षुःसन्निकर्षस्याभावात्। अत एवाप्रमापि भ्रमेत्यवगम्यते। तथापि घटत्व
वत्त्वधीहेतोर्दोषस्य ज्ञातताप्रत्यक्षेपि दृश्यायामपि सत्वात्तुल्यत्वात्। अत एवाप्रामाण्यं न स्वतस्तज्ज्ञानहेतोस्तदभाववति
तत्प्रकारकत्वस्याज्ञातस्याग्रहात्। दोषस्याज्ञानिवत्तदानामपि तज्ज्ञानप्रतिबंधकत्वात्। इत्थं च व्यवसायरूपेत्यस्य व्यवसा
यस्वरूपे साप्रत्यासत्तिः संबंधः व्यापकताकोटिप्रवेशालक्षणस्य वैशिष्ट्यांशे तुल्यत्वात्प्रमाजन्यत्वस्येवानुमानादित्यर्थः
दिक्। प्रामाण्यस्येति मूलं। प्रमायां यस्याखंडस्योपस्थितिरपेक्ष्यते भ्रमेपि तस्यैव तथापेक्षणाच्चाखंडस्य प्रामाण्यस्यानु
व्यवसायपूर्वं प्रमायामप्युपस्थितिः किंतु व्यवसायोपनीतं तद्वत्त्वमादाय तत्प्रकारकत्वं ज्ञाने ग्राहकसामग्र्या बोध्यत इत्य
र्थः। तावच्छेदकं किंतु घटत्वादिविशिष्टधीत्वं। अभाववत्त्वस्य लेवन कल्प्यते। तज्ज्ञानं विना विरहत्वविशिष्टधीविलंबाभा
वात्। इच्छात्वविशेषणकधीत्वावच्छेदेन तज्ज्ञानजनकत्वं कल्पितमिति तदज्ञानेन तद्विशिष्टधीः संभवति तु नो केति विघेत्या
घ्यपि न। अभावविरहत्वं प्रतियोगित्वमिति विरहत्वागमादाय स्वरूपमभावांशाच्छवत्वांशात एवेति स्वरूपाज्ञातत्वयोर

पपत्तेरिति· किंचस्वरूपेत्वपिनवृतस्मृतिरेवव्यक्तिनिरित्याकारदर्शनेनप्रत्यक्षानुगमइष्टापत्तेः· इत्यादिषड्विंशा
दे: प्रवृत्तिनिमित्तत्वेचेद्भूतिरेवनेति· अपिचेत्यपिन· प्रकारेनवस्याःसंभवतितथाहि· अभावत्वमभावःसोपिननिर्वि
16 कल्पकंवेद्यइतिप्रकाशताभावांशोप्यभावत्वंप्रकारएवंतच्चतत्राप्रतीतिर्यथासमवायवान्संबंधसंबंधवानित्यादिप्र
तीतीनांप्रकारत्वेदस्तथाभावांशोऽपरप्रकाराप्रत्तिरितितात्पर्यं· किंचाभावत्वंस्वरूपमेवप्रकारोऽन्यथाघटाभावाभा
वइत्यत्रघटेकथमभावाभावत्वप्रत्ययः· ननुप्रतियोग्येवाभावत्वमस्तु· विषयेज्ञानमिवविषयत्वमेवंचविशेषणज्ञा
नस्यविशिष्टबुद्धौनव्यभिचारइति· न· प्रागभावध्वंसयोर्वर्त्तमानाभावव्यवहारविरोधापातात्· प्रतियोग्यात्मका
भावस्याविद्यमानत्वादिति· एतेनाभावत्वैकधर्मिकवाज्ञानंप्रकारः अग्निमनुद्धावभावत्वप्रकारइत्येवमप्युपपन्नौवि
शेषणधीहेतुत्वस्यविशेषनिष्ठत्वेगौरवात्· नचैवंप्रथममभावव्यवहारानुपपत्तिरग्निमरूपएवाभावत्वविशिष्ट
प्रत्ययोत्पादेनतद्विशिष्टप्रत्ययाननुभवात्· एवंतत्प्रकारकत्वाद्यग्निमज्ञानएवप्रकारः प्रथमंविषयोविशेष

णतयाविषयविषयिभावः संसर्गमर्यादया भासते· न चैवं वक्ष्यमाणसंशयानुपपत्त्यनुपपत्तिः प्रथमं तत्प्रकार
कबोधाभावेन संशयसंभवादिति वाच्यम्· एवं सति ज्ञानमात्रप्रकारकबोधाभावेन वादेवस्य च तस्यासिद्धेः· किं च प्र
माल्पप्रकारकनिश्चयः प्रथमं मास्तु संसर्गमर्यादयापि तज्ज्ञाने तत्प्रकारकनिश्चयसामग्रीस्यादेव विशेषणधियो
ज्ञातत्वात्· निश्चयसामग्र्यां च संशयानवकाशादिति· किं च स्वरूपत्वेपि कथं प्रकारतानुपस्थितस्य· किं च स्वरूप
स्य किं ग्राह्यमवशिष्यते· वैशिष्ट्यप्रतियोगित्वस्यैव तत्त्वात्· न तलनरूपस्याभावसमूहालंबनवत्प्रतियोगित्व
स्य स्वरूपरूपत्वेपि वैशिष्ट्याप्रत्ययात्तथा च यच्चाभावत्वं स्मृतं तत्र विशिष्टज्ञानमन्यथाज्ञानज्ञानवदभावज्ञा
नमपि नरसिंहाकारमिति निरस्तम्· अभावत्वविशिष्टज्ञानस्थलेनुभवानुरोधेन विशेषसामग्र्यकल्पनस्यैव स
म्यक्त्वात्· अभावस्य च सविकल्पकमात्रवेद्योनुभवानुरोधादभावत्वांतरं च न भासत इत्यनन्यगत्या स्वरूपमेवेति दिक्
पतेन्यथा प्रतियोगिधीजन्यताप्यभावधियो न स्यादभावत्वप्रकारकधीमात्रे तस्या हेतुत्वादन्यथा प्रमेयत्वेनापि ज्ञाने

17 तदापत्तेरत एवाचार्या अतद्व्यावृत्तिवैशिष्ट्यमिति स्वीचक्रुरिति। तदवतार इति मूलं। यदा बाधावतारे सति विन
ष्टपदवस्थायां भ्रान्तेस्तज्ज्ञस्मृतेर्वानुव्यवसायस्तदा बाधादेव तेन भ्रांतिविषयवैशिष्ट्याज्ञानान्न संकरः। यदा च भ्रां
तिविनाश एव तदा तदभावात्तत्रानुव्यवसायाभावान्न संकर इत्यर्थः। अत एवेति मूलं। तस्यान्यत्रान्तिविषये बाधाद
वेत्यर्थः। अस्वप्रकाशा इति मूलं। स्वाविषयत्वेपि स्वव्यवहारजनकत्वमिति गुरुमतेन। स्वप्रकाशा इत्यादि स्वस्वविषयं
ज्ञानमिति मतत्रयायोगम्। वस्तुतो ज्ञानानुपनीतस्येति। मनसानुपनीतस्य भ्रमात्तस्य चक्षुरयोग्यत्वान्न तेन तस्य ग्रह
णमिति दूषणमुपनीतग्रहे च न भ्रमस्यावश्यकत्वमित्यादीत्यर्थः। प्रागुक्तेति। परप्रकाशो बाधानवतारेनुव्यवसायादिना
भ्रमेपि प्रामाण्यस्यैव ग्रहोन्यथा तस्यैव स्वातंत्र्येणोपनये प्रतिबंधकत्वमित्याशयः। नन्विति मूलं। कोटिस्मरणस्या
दिरिति वा अनतद्गुणसंविज्ञानबहुव्रीहिर्वेति बोध्यम्। तेन प्रथमोत्पन्नधर्मिज्ञानस्य स्वाश्रयनाशकतया नानुपप
त्तिः। सामग्री न कारणमात्रमिति। ननु सामग्री बहुकारणमात्रं वा फलायोगव्यवच्छिन्नं कारणं वा। आद्ये परम

षयाः सत्प्रतिपक्षो न स्यान्न हि प्रतिबंधः फलायोगव्यवच्छेदश्चेति· प्रथमे स्थाणुसंशयस्याप्यनापत्तिः प्रतिबंधक
तावच्छेदकाक्रान्तत्वादिति· न· प्रतिबध्याभावातिरिक्तसकलकारणसमवधानस्य सामग्रीपदार्थत्वात्· एतदेवा
ह यथाश्चेति· मैवमिति· नन्वत्र संशयाभावेप्यनिश्चयाभावः· द्विविधरणत्वविषयसंशयसामग्रीसमवधानं चादोषोस्तु·
अतएव किंचेत्याद्यपि न· संशयानुरोधेन दोषस्य कस्यचिदावश्यकत्वादिति· अत्र तार्किकाः संशयस्यानुभवसिद्धत्त
याइष्टापत्तेरशक्यत्वं· अन्यथा सर्वत्रैवेष्टापत्तिकरणापत्तेः· [illegible] द्विविदृणेत्याद्यपि न अतींद्रियदोषकल्पनापेक्षया
स्वातंत्र्येणानुपनायकत्वमात्रकल्पनस्यैव लघुत्वात्· संशयानुरोधेनापि निश्चयसामग्रीविरहस्यैव दोषत्वसंभ
वादिति· ननु व्याप्यदर्शनादिति· लाघवेन व्याप्यदर्शनत्वेनैव संशयप्रतिबंधकत्वमतएव विशेषादर्शनं संशयहेतु
रित्यपि संगच्छते· गंधादिज्ञानस्य पृथक् न प्रतिबंधकत्वे कल्पनं तत्रापि व्याप्यत्वज्ञानानन्तरमेव प्रतिबंधसंभवात्·
व्यावर्तकज्ञानस्य विरोधिधीसामग्रीत्वेन वच्छिन्नत्वेन पृथक् प्रतिबंधकत्वस्य त्वयाप्यनुमतत्वाच्च· कार्यतावच्छेदकक

१४ ल्पनान्तरस्य फलमुखत्वाद्याऽदोषत्वमितिभावः· व्याप्यदर्शनत्वेन प्रतिबंधकत्वे गंधादिधियां पार्थक्येन प्रतिबंधक
मितिगौरवं· तदातद्याप्यत्वधीम्यानुभवबाधिता· नहिस्वोपगमानुरोधेनानुभवो बाध्यः· कथं वा स्वरूपसतस्तैलादेः
कुंकुमगंधव्यंजकत्वस्य तत्संशयप्रतिबंधकस्य च संग्रहः· नहि तदपि व्याप्यं तत्र यागृहीतं वा· कथं वा धूमत्वज्ञानं व्या
प्तिसंशयनिवर्त्तकं· तदा धूमत्वत्वानुपस्थित्या तत्ज्ञानस्यासंभवदुक्तिकत्वात्· व्यावर्त्तकधीप्रतिबंधकत्वानुरोधेन दृष्ट
कल्पनं च न दोषः यावत्यैवानुगम इति न्यायात्· एषां समानप्रकारकधीत्वस्य व्यावर्त्तकधर्मस्य तद्धर्मिकतत्कोटिक
संदेहत्वस्य प्रतिबध्यतावच्छेदकस्य भेदेनादोषत्वात्· फलमुखं च न भवत्येव· नहि विशेषदर्शनप्रतिबंधकत्वकल्प
नस्य प्राथमिकत्वनियमः· अन्यथापि तत्कल्पनासंभवात्· किंच व्याप्यत्वधीत्वेन प्रतिबंधकत्वे साध्याभाववद्व्यापकाभा
वप्रतियोगिमत्त्वधीः प्रतिबंधिका न स्यादिति· ग्राह्यनिरूपितव्यभिचारधीविरोधिसंबंधिमत्त्वधीत्वेन वाच्यमेतदपेक्ष
या च विरोधिधीसामग्रीत्वमेव लघित्वतो पादमेव प्रतिबंधकतावच्छेदकमिति न्यायेनाह तत्सामग्रीत्वस्येति· विज्ञा

षद्दर्शनकाले संशयो भवत्येवान्यथा परामर्शेण संशयस्य निरस्तेस्तर्कवैयर्थ्यं स्यादित्यत्रिश्रेत्याह· यत्त्विति· नच
कार्यसहभूतत्वेनाभावविशेषणं लाघवान्न तु घटयकृत्प्रतिबंधकत्वं गौरवादन्यथावयवज्ञानाभावे तदन्यस्मिन्चास
हभूतत्वविशेषणबाधोऽविशेषणे वा गौरवाभावस्तत्र न तद्विशेषणं· यत्र तु कार्यातिप्रसंगः कारणांतरकल्पनं
तत्र सहभूतत्वं विशेषणमेवेति· किंचान्योन्याश्रयग्रासाभप्रतिबंधकाभावत्वेन कारणता· तथा च तत्र तद्विशेष
णेपि कथमस्य प्रभूतेप्रसंग इत्यादेर्दोषस्यानवकाशः· प्रभूतेप्येवं सहभूतत्वस्यैवोचित्यात्· न च विरोधिज्ञान
सामग्य्रभावकारणता सत्प्रतिपक्षेऽनुमित्यनुत्पादाद्वैदेश्यं कल्प्यतेति वाच्यं· अन्यथा विशेषदर्शन इत्याकरापुरस्का
रापत्तेस्तथा सति कल्पितत्वस्यैव सम्यक्त्वादिति· अत एव ज्ञानाभावातिरिक्तोऽविनश्यदवस्थत्वं विशेषणमित्यपा
स्तमन्यथानुपपत्त्यानुमित्यतिरिक्त एव तत्संभवात्· स्वेतरसिद्धित्वेन वा प्रतिबंधकत्वसंभवादिति· तर्कस्य च नोत्प
न्नशंकानिवृत्त्यै किंत्वपरानुसाध्यायेत्यभिसंधायाह· तत्कालानुत्पत्त्येति· किंच विशेषदर्शनाप्रतिबंधकत्वे संशय

×तार्किकास्तु विशेषदर्शनकालेपि संशयाभावेन सामग्रीप्रतिबंधिका· तथाविपरीतदर्शनकालेपि न च तदानिश्चयाभा×
×वएव नेति तदभावादेव संशयानुत्पत्तिः×

सामग्रीबलवत्त्वेन तदानिश्चयानुत्पत्त्या तदभावसहकृतस्यापि संभवादिति· करादिमति पुरुषज्ञानत्वादिति·
19 न चैतत्प्रामाण्यव्याप्यग्रहोत्तरकालपरं गौरवात् विशेषदर्शनेप्युत्तरसंशय इत्यस्यानुभवबाधितत्वाच्चेति भावः·
नत्वल्प इति· भवता विरोधिनिश्चयतत्सामग्रीव्यावर्तकधर्मधीतत्सामग्रीणां प्रतिबंधकत्वं मम तु न चरमसामग्रीप्रतिबंधि
कामन्यमते प्रतिबंधकाभावस्य सहभावेन जनकतया तादृशव्यावर्तकधर्मधीविरहविरहादेव व्यावर्तकधर्मज्ञानोत्पत्तिका
लेसंशयानुत्पत्तिलाभेन तत्प्रतिबंधकत्वाकल्पनान्न त्वेवं भवतामिति भावः· ननु व्यावर्तकधीसामग्र्येवास्तु प्रतिबंधिका तथा
च ममापि चरममेवास्त्वित्यत आह· तज्जातीयत्वग्रहोत्तरमिति· ननु विरोधिधीसामग्रीप्रतिबंधकत्वेनैव व्यावर्तकधर्मधीसाम
ग्रीलाभात्तथापि ममापि विधैवेत्यत आह· न च व्याप्यदर्शनं विरोधीति· किंतु विपरीतेति· न च विपरीतेति विशेषणे गौरवं प्रति
बंधकधीसामग्रीसामग्र्याः प्रतिबंधकत्वेऽनवस्थापातादिति· विरुद्धारोपेतातीति· यद्येवं यदंशे आरोपस्तदंशे साहचर्यधी
र्हेतुः स्यान्न तु तत्र यत्र कोटौ· किं च यत्र कोट्यारोप एव न· किंतु विरोधस्तत्र मा तत्परः पृथिवी वेति संशयस्तत्र कथं धर्मिधीहे

न वैयर्थ्यसंगवादिति॰ प्रमात्वमेव परंपरासंबद्धं हेतुर्नद्धविषयत्वमपीतित्तत्प्रतिबंदिरपिन॰ मौलत्रितयसाधारण्य
मुत्पादनानुरोधेनप्रथमविज्ञप्तिपर्यौगाहकान्तर्भावोत एवगौरवेणापरिछुष्पन्निविप्रतिपत्यन्तरं च कारेति॰ नचता
ज द्धिकाः समानविषयत्वमतिप्रसंगवारणायान्यत्रैव कल्पितं विषयत्वविशेषणं नत्वत्रैव येन नियतोपस्थिकत्वे समान
विषयत्वमधिकं स्यात॰ अत एव यत्रैव गुरुलघुविषयतासंभवइत्याकरः॰ इयानेव भेदः कारणताज्ञाने नियतानुपस्थि
तिकस्यापि गौरवज्ञानं विनिगमकं॰ हेतौ तु समानविषयत्वे सति नियतोपस्थितिकत्वं गुणात्यन्ताभावात्यन्ताभावहेतुत्व
मपिसमानविषयत्वाविशेषणेविरुद्धं॰ अत एव धूमत्वाकरविरोधोप्यतदाकरप्रतिबंदिकवलितएवेदिदिक्॰ हेतुता
वच्छेदकप्रमात्वत्वानुपस्थित्याप्रमात्वमेव हेतुरितितुरिक्तमेवेति॰ सर्वविषयत्ववतीति॰ यद्यपि सर्वविषयमितिज्ञानेपिस
दीयविद्यमानतयानसर्वविषयत्ववतीत्यादोनप्रसंगः॰ तथापि सर्वविषयत्ववति भगवज्ज्ञाने यदसाधारण्यं तन्मात्र
ज्ञितत्रेत्यर्थः॰ तथाहीति॰ तथाचाकारानुपपत्याज्ञाततालिंगकानुमितावेव प्रामाण्यमुपनीतं भासत इति तात्पर्यमत एव

वाप्रामाण्यमप्युपनीतं भासेतानुमितौ कथं वानुमितावुपनीतभानेनापसिद्धान्त इत्यपास्तं॰ अन्यथेति॰ यदि विष
यं विना विज्ञानग्रहस्तदा न विषयग्रहाय व्यवसायः प्रत्यासत्तिः कल्प्येतेत्यर्थः॰ नवत्तीत्यादिन प्रमापदस्य वृत्तिनि
१० मित्तं स्मृतौ गतत्वादित्यत आह प्रकृत इति॰ ननु तन्निश्चयादेवेत्यत्र तत्पदेन तद्वैशिष्ट्यज्ञानत्वं सन्निहितत्वात्परामर्ष
णीयं तन्निश्चयश्च न प्रवर्तक इत्यत आह॰ तद्विशेष्यत्वेति॰ ननु विषयनिरूप्यमिति मूले वैयधिकरण्यं विषयनिरूप्य
त्वस्य हेतोर्ज्ञाननिष्ठत्वात्साध्यस्य विषयगतत्वात्॰ वित्तिवेद्यो विषय इत्यपि न साध्याविशेषापत्तेरत आह विषयाविष
येति॰ तथा च विषयाविषयकप्रस्वरूपाविषयत्वं हेतुः विषयविषयतानियतत्वस्य विषयताज्ञानकत्वं साध्यमित्यतो न दो
ष इति भावः॰ ननु विषयाविषयज्ञानाविषय इत्यत्र ज्ञानपदं प्रत्यक्षपरं ज्ञानपदादिना विषयं विनापि ज्ञानज्ञापनात्
तथा च प्र इ मतेनुमितित्वस्य व्याप्यत्वान्नेयं युक्तिरत आह॰ व्यवसायेति मूलं॰ नन्वनुमितौ स्वप्रकाशेऽव प्रत्यासत्त्युपवर्णन
विरोधोऽत आह व्यवसायविषयताया इति॰ ननु संबंधितावच्छेदकेसादियुक्त्या घटधीग्रहकाले घटत्वेन ज्ञायमान

संशयानुपपत्तेरिति·प्रकृत इति शेषः·तथा च पूर्वं प्रामाण्याज्ञाने प्रकारत्वगर्भसाध्ये सिद्धसाधनशंकापि दुर्लभा निर्णयस्तुकु
त्रेति भावः·रसत्वं च दूषणं प्रसक्त्योन्निरिति तदिंद्रिययोग्यसामान्यत्वेन सावाच्या·योग्यता च तदिंद्रियजधीविशेष्यत्वं न किंतु तदिं
द्रियजधीविषयत्वमेव लाघवात्·एवं च संशयानुपपत्तेर्विरोधानुपपत्तेरित्यर्थ इत्यन्ये·तन्नार्क्किकमन्यमतमपास्तं·विरोध
निरासकापाविक्तकतदिंद्रियजन्यप्रतीतिविशेष्यत्वस्यैव क्षमत्वात्·सामान्यधीजन्यकाले तावता नियमतोंगीकारे मानेभावा
दिति दिक्·ज्ञातासन्निहितत्वेन बीजं प्रतिभाति·परत्वं संयुक्तसमवायेन घटे गृहीतं तमुपस्थापयति समवायेन गृहीतं पटमिति यि
नसंबंधेन गृहीतमाश्रयं तमुपस्थापयतीत्यनुगतानतिप्रसक्तनियामकानुरोधेन तथैव कल्पनमिति·स्वरूपसतः सामान्यस्य प्र
त्यासन्नित्वं न ज्ञातस्येति ज्ञातो भवता ज्ञातमिति वाच्यं·सामान्यस्यासन्नित्वं न तु सामान्यतया ज्ञातस्येति त्वयोद्भावनप्रकरणस्यानुमा
नपक्षिकाविरोधापत्तेरिति·तथा सति सामान्यतयेत्यस्य व्यर्थत्वादिति·एतेन स्वरूपसतः सामान्यस्यासन्नित्वे घटान्तरस्वरूपस
त्वासामान्यप्रत्यासत्त्या तन्निर्णयसंभवात्संशयानुपपत्तिवत् ज्ञातप्रमात्वप्रत्यासन्नित्वेपि ज्ञानांतरे तत्संशयो न स्यादिति ध्वस्तं·

यदि च घटघटत्वज्ञानानन्तरं घटत्वविशेषणकघटविशेष्यकप्रत्यययोः कादाचित्कत्वानुरोधेनादृष्टं वा नियामकमन्यत
२१ रसामग्री वा प्रतिबंधिका यथा तथात्रापि तत्स्वरूपसत्सन्निधेपि जलत्वमदोषस्य सामान्यप्रत्यासत्तिजज्ञानाप्रतिबंधकत्वेन सं
देहापत्तिरित्यपि जलत्वं· न च स्वरूपसत्सन्निधेः कदाचिन्निर्विकल्पकापत्तिरिष्टत्वात्· सप्रकारकधीजनकस्वभावत्वाद्वा· यदेव च
पूर्वोपस्थितं तदेव प्रकारो न तु प्रत्यासत्तिरेवेति निरस्तम्· कोडीनतत्वादिति· प्रमापदेन स्वजन्यज्ञानविषयताप्रापितत्वादि
त्यर्थ इत्येके· तद्वतितत्प्रकारकज्ञानत्वरूपप्रमात्वघटकज्ञानत्वग्रहकाले प्रमाया ग्रहीतत्वादित्यर्थ इति कश्चित्· तन्न· तथा
सति सार्वत्रिकत्वे क्वचिदिति विरोधादिति· प्रामाण्यान्तरः· प्रामाण्याश्रयान्तरे· मध्यमपदलोपेन· तथा च प्रामाण्याश्रयीभूतज्ञा
नान्तरप्रयुक्तं सिद्धसाधनं स्यादित्यर्थः· अत एव योगिज्ञानेनेति· यद्यपि युक्ततादशायां साक्षात्कारे न भावनापेक्षा तथापि
युंजानतादशायां विच्छिन्नासाप्रयोजिकेवेति· ननु तद्भावनायाः साक्षात्कारजनकत्वेन तावतां पूर्वमज्ञानेन तदनुपपत्त्या·
सार्वज्ञ्यानुपपत्तेरात्मगोचरभावनाया विश्वविषयकसाक्षात्कारजनकत्वं तथा च ज्ञानज्ञानानपेक्षणात्कथं न सिद्धसाधनमिति

निश्चयत्वेन कार्यतैव न भवति· किंतु तत्प्रकारकधीत्वेन तथात्वविशेषणज्ञानादिघटितसामग्र्या तत्प्रकारकधीस्तथात्वान्यादृश
ज्ञाने आपादकाभावः· संशयनिश्चयात्मकवैजात्यानुरोधेन कारणवैजात्यावश्यकत्वादिति· किंच विरोधाविषयज्ञानत्वावच्छि
न्ने विरोधिविषयधीसामग्र्यास्त्वं प्रतिबंधकतावच्छेदकभेदेपि स्यात्को विरोधः· नन्वेवं घटमात्रविषयकज्ञानत्वावच्छिन्नेपट
मात्रविषयकज्ञानत्वावच्छिन्ने तदुभयधीत्वावच्छिन्नसामग्रीत्रयं स्यादन्यथा समूहालंबने केवलविषयकज्ञानापत्तेः संशय
काले केवलपटादिविषयकज्ञानापत्त्या तत्सामग्रीवदिति· ननु तत्कारणजातस्य भेदेपि विरोधज्ञानं भिन्नमेव प्रतिबंधकं
स्यादत आह· धर्मी त्वनुपाध्यायाः· विषयमाहात्म्यादीति· परिमाणभेदादिरूपतयेत्यर्थः· उत्कटत्वं या व्याप्यवृत्तिजातिरिति·
न च जात्यंतरव्याप्यवृत्तित्वेऽपसिद्धांतः· न हि संयोगादिवदव्याप्यवृत्तित्वं स्वीकुर्मो येनैवमुपालंभः· किंतु विषयनिरूप
त्वं· अत एव संशयत्वमानसत्वव्याप्यजातिरित्युपायः· किंच धर्मिधीसामग्रीत्वापेक्षया धर्म्मिधीत्वेन [illegible]संकरापत्ति
हेतुत्वे लाघवं· धर्मिधीसामग्र्याः परामर्षादिरूपतया तज्जन्यत्वे संदेहस्योभयसामग्रीजन्यत्वे जातिसंकरापत्तिश्चेतिदिक्·

उक्तेवंसतिस्यात्तथाप्यदृष्टजनितकोटिस्मृतेरपिसंशयजनकतापत्त्यासमानधर्मवद्धर्मिधीजकोटिस्मृतित्वेनजनकत्वं
22 वाच्यंतथाचोन्नयकोटावेवजनकत्वं· नचाकस्मिकस्मरणजनकत्वेपीष्टापत्तिः· नह्यदृष्टजनितकोटिस्मरणमपिप्रमेयोपा
यविरोधात्· नचैवंधर्मिधियोन्यथासिद्ध्यापत्तिरिष्टत्वान्नचविनिगमनाविरहः· विशेषणधियःसामान्यतःकारणत्वस्य
कल्पितत्वेनविशेषतस्तस्यहेतुत्वेलाघवेनतत्रैवावच्छेदककल्पनान्नतुवैपरीत्यंगौरवात्· एतेनधर्मिज्ञानंनवस्तुहेतुस्तथा
पिकेनरूपेण· नकोटिस्मारकधर्मिज्ञानत्वेनतथासत्यजनकतापत्तेस्तज्ज्ञानस्यधर्मिधीत्वेनजनकताधर्मिधीजनितको
टिस्मरणत्वेनव्यापारतेतिनवति· परंतुधर्मिधीकोटिस्मरणानंतरंयत्रविरोधज्ञानंतत्रसंशयानुत्पादापत्तिरितिनि
रस्तं· किंचैतदपिन· यत्रचकचनयद्विशेषयोरित्यादिनासंशयत्वावच्छेदेनत्वमत्वावच्छेदेनवातत्कल्पनादिति· तथाचविरु
द्धैककनिश्चयसामग्रीद्वयमेवयदाविरोधज्ञानानवच्छिन्नंतदासंशयंजनयति· नत्वतिरिक्तासंशयसामग्रीतथाचात्रेदान्न
प्रतिबध्यप्रतिबंधकभावइतिभावः· ननुयदानप्रतिबध्यप्रतिबंधकव्यवस्थातदासंशयकालेकुतोननिश्चयः· नच

नन्वेवं विशेष्यज्ञानमपि विशिष्टधीत्वावच्छिन्नप्रयोजकं स्यादिति चेन्न दाकस्मिकत्वनीत्या वा विशिष्टज्ञानस्यान्वयव्यतिरे
काभ्यां वा नान्यो विशेषणज्ञानीयाभ्यां ताभ्यां तयोरनन्यथासिद्धेर्न प्रथमो ऽसंसर्गाग्रहेणैव तद्विच्छेदात् न च विशिष्टधीमा
त्रे तन्न कारणं निर्विकल्पकेपि हेतुत्वादिति वाच्यं बाधस्य समानप्रकारकधीमात्रप्रतिबंधकतया निःप्रकारकज्ञाने तदभा
वस्याहेतुत्वाद्विशेषणधीहेतुत्वेन तन्निरासाच्च अभाववविशिष्टबुद्धौ वाष्पे धूमभ्रमोत्तरधूमवत्वसामान्यबुद्धौ न तत्व
मूर्त्तत्वयोरात्ममनसोर्ग्रहानंतरं मूर्त्तत्वसमानाधिकरणमूर्त्तत्वसामान्यबुद्धौ व्यभिचारः न च विशेषणधीरपि तथा
सामान्यतः प्रतियोगिरूपविशेषणधियस्तत्र सत्वात् विशेषणधीत्वेनैव जनकता फलोपधानसहकारिसमवहितकारण
स्य स्मृतेरेव सालोकन्नन्त्वाम्नातातार्किकलिखनं कारणतावच्छेदकावच्छिन्नानुभवे फलोपधानबाधकाभावेन न प्रत्यमावहती
त्युपेक्षितं सारशास्त्रकारैरिति अत्र न हि विरुद्धकोटिधीमात्रं संशयः पीतः शंख इति ज्ञानस्यापि तत्वापत्तेः अत एव ज्ञासमानत्वं विरु
द्धत्वविशेषणमपास्तं तथा च यत्र कोट्योर्विरोधः संसर्गस्तु ज्ञानं संशयः एवं विरोधे ज्ञासमानेपि तस्यासंसर्गत्वाद संशय

त्वं स्यादिति प्रतिभाति॰ ज्ञानत्व वैशिष्ट्यं चेति॰ एतद्व्रज्ञानत्वज्ञातेः स्वविशिष्टज्ञानसामग्रीसन्निविष्टत्वरूपतीव्रसंवेगिताप
23 दे॰ यदि चेच्छादो ज्ञानत्वस्य भस्त्वद्विषयत्वांशे प्रमात्वनियमो बोध्य इति॰ तन्मत इति॰ नच विशिष्टवैशिष्ट्यधीत्वेनानु
व्यवसायस्य तथापि तदपेक्षा विशेष्ये विशेषणमित्यादिना तत्संभवादिति॰ भ्रमसाधारणत्वादिति॰ नच भ्रमो वैशिष्ट्यावि
षयकं ज्ञानं न विशिष्टविषयकमिति वाच्यं भेदाग्रोपविशिष्टविषयत्वस्यापि संभवात् इति॰ तथापीति॰ नच तत्प्रकारक
त्वे संशयाभावाद् भ्रमा एव संशयोपि तदभावत्वसंशयपर्यवसन्न एव॰ स च तद्वत्त्वनिश्चयप्रतिबध्य एवेति वाच्यं॰ व्यव
सायोत्तरं भ्रमा एव संशयोपि तदभावत्वसंशयपर्य्यवसन्न एव नापत्त्यात तन्निश्चयस्य विशिष्टतद्वत्त्वसंशयाविरोधि
त्वादिति॰ तस्मादिति॰ ननु परस्परविरहरूपत्वं नास्त्येव॰ तद्विरहव्याप्यत्वेनाज्ञानात्तदपि न॰ ज्ञानमात्रप्रतिबंधकत्वेचा
तिप्रसंगः॰ यदि तु ग्रावच्छेदकधीत्वेन प्रतिबंधकत्वमेवमुपाध्यायमतेप्यविरोध एवेति प्रतिभाति॰ ननु विशेषदर्शनेपि
भ्रमादिजनकपित्तादिवद्दोषो नानुभूयते येन तत्सत्त्वेपि संशयः स्यान्न वा तीव्रियोपी स्याह॰ न हीति॰ भ्रमत्वेतिमूलं॰

केति विशेषणादानेपदसंकोचः पदसंकोचे तद्विशेषणादानमित्यन्यतरत्रस्वाछंद्यमित्यर्थः। ज्ञानपदादिनाप्रामाण्या
व ग्रहणात्स्वविषयकत्वं विशेषणं देयमित्यपि ज्ञेयं। अगृहीतेति मूलं। यथार्थत्वेसतीति विशेषणमवदेयम्। अतएवेति।
विशिष्टज्ञानत्वमित्यस्य वैशिष्ट्यविषयकत्वपरत्वाभावादित्यर्थः। यद्यप्यगृहीतेति मूलं। यथार्थत्वेसतीति विशेष
णादरपि परस्परनिरूपितधर्मत्वधर्मित्वावगाहित्वमर्थ इति वैशिष्ट्यविषयकत्वएव पर्यवसानमित्यग्रिमग्रंथालग्न
कत्वं तदवस्थमेव तथापि परस्परनिरूपितत्वभागमादायाग्रिमग्रंथो योज्य इति भावः। नच विशिष्टमिति। नच प्रमात्वा
वच्छिन्नव्यापकतावत्त्वमनुमेयमित्यर्थः। ज्ञातता विशेषेति। प्रमापितेत्यर्थः। तथेति। घटत्वप्रकारकधी विशेष्यत्यर्थः।
तथा च तेति। घटत्वप्रकारकेत्यर्थः। घटत्ववैशिष्ट्यवद्विषयकत्व इति। घटत्ववद्विशेष्यकत्व इत्यर्थः। प्रकारकत्ववद्वि
शेष्यत्वस्यापि समानवित्तिवेद्यत्वादिति भावः। ज्ञाननित्यत्ववदिति। यद्यपि सर्गादिकालीनद्व्यणुकादिपदतया तत्स्व
वन्नित्यलक्षणनित्यत्वस्य पर्वतीयत्वस्येव पक्षधर्मताबलात् सत्वेपि न व्यापकतावच्छेदकप्रकारत्वनियमहानिस्त

चि॰प्र॰म॰

२५

घापि लाघवलत्वस्य ध्वंसाप्रतियोगित्वरूपनित्यत्वादेः प्रकारतयेदं द्रष्टव्यं॰ ननु तत्र लाघवमिव नेह तत्बोधकम
स्त्वात्यत आह॰ अन्यथेति॰ यदि विषयं विनापि ज्ञानग्रहः इत्युपेयं तदा विषयांशेऽव्यवसायरूपज्ञानस्य प्रत्यासन्निता
प्रकारत्वांशे च समानवित्तिवेद्यता न कल्प्येतेत्यर्थः॰ समवायेनेति॰ तादात्म्येनेत्यर्थः॰ व्यभिचारादिति॰ ज्ञानादाविति शे
षः॰ आत्मना सह ज्ञाततायास्तदायनियामकसंबंधविशेषानंगीकारे नियताधिकरणकं ज्ञानं न सिध्येदित्याह॰ निय
तेति॰ तद्वति तत्प्रकारकज्ञानत्वादि न प्रमापदप्रवृत्तिनिमित्तं॰ स्मृतावपि गतत्वात्॰ तच्च प्रमाव्यवहाराभावादित्यत
आह॰ प्रकृत इति॰ तन्निश्चयादेवेतत्र सन्निहितस्यैव तद्वैशिष्ट्यज्ञानत्वस्य तत्पदेन परामर्षशंकां निराकरोति॰ तद्वद्वि
शेष्यकत्वादाविति॰ ज्ञानत्वमेव तदिति॰ ज्ञानत्वमेव यथार्थत्वनियतमिति तदेव प्रामाण्यमस्तीत्यर्थः॰ तस्येति॰ ज्ञानत्वस्य इ
तरव्यावर्तकत्वेपि निष्कंपप्रवृत्त्युपयोगित्वाभावेन प्रकृते विचारणीयत्वाभावादित्यर्थः॰ ननु विषयनिरूप्यमिति मूले
वैयधिकरण्यं विषयनिरूप्यत्वस्य हेतोर्ज्ञाननिष्ठत्वात्साध्यस्य च विषयगतत्वात्॰ न च ज्ञानवित्तिवेद्यो विषय इत्यस्य

विषयविन्निवेष्यं ज्ञानमित्यर्थस्तथा च सामानाधिकरण्यमहेतुस्समिति वाच्यं। साध्याविशेषापत्तेरित्यत आह। विष ता×क
याविषयेति। तथा च विषयाविषयकज्ञानाविषयत्वं हेतुः विषयविषयकतानियतस्य विषयकज्ञानत्वं साध्यमि
ति नोक्तदोषद्वयावकाश इति भावः। ननु विषयाविषयज्ञानाविषय इत्यत्र ज्ञानपदेन प्रत्यक्षं वक्तव्यं ज्ञानप
विषय दादिनाऽनिरपेक्षेण ज्ञानज्ञापनात्। तथा च न द्दमते ऽनुमितिग्राह्यत्वान्नेयं युक्तिरित्यस्वरसात्। टीकाद्दृश्य
माणस्वरसाद्वा व्यवसायेति मूलं। तदप्यसंगतं। अनुमितौ स्वप्रकाशत्वे च ज्ञानप्रत्यासत्त्युपर्णनविरोधादित्यत आ व
ह। व्यवसायविषयतया इति। प्रथमां युक्तिं दूषयति। न चेति। द्वितीयां दूषयति। व्यवसायेति। न चैवेति। ज्ञानग्रहणका
ले यावद्विषयग्रहानियमेन य एव विषयो न भासते तत्रैवेत्यर्थः। ननु संबंधितावच्छेदकत्वादिना घटज्ञानग्रहणकाले
घटस्य घटत्वेन रूपेण ज्ञायमानतास्तीत्येतावन्मात्रमायाति। न तु ज्ञानग्रहणे घटत्वेन रूपेण घटो विषय इत्यपी
त्यत आह। तन्निर्विकल्पकादिति। संबंधिनिर्विकल्पकात्तदीयसंबंधानवगमे संबंधज्ञानं प्रतिबंधितावच्छेदकप्रका सं

रकसंबंधिज्ञानस्यजनकत्वे कल्प्यमाने संबंधज्ञानत्वापेक्षया ससंबंधिकज्ञानत्वस्य सामान्यतया विनागादिज्ञान
साधारणतया तदवच्छिन्नं प्रत्येव जनकत्वकल्पनात् ससंबंधिकपदार्थस्य संबंधितावच्छेदकावच्छिन्ननिरूप्यत्वे यद्य
न्निरूप्यमिति व्याप्तिबलात्तद्भित्तिविषयत्वमित्यर्थः॰ यद्यपि प्रत्यक्षे तद्भित्तिविषयत्वं नान्यत्र संयोगो गुण इत्यादिशाब्दादि
संयोगप्रतीतौ संबंधिनो विषयत्वाभावात्॰ तथापि व्यवसायेत्यादिमध्यमयुक्तावेव तात्पर्यम्॰ न च तत्रापि दोषादंत्त
दत्त एवेति वाच्यं॰ यावद्विषयनिरूप्यत्वस्य विनिगमनाविरहेणाप्यसिद्धेः॰ अत एवाह मूले तुल्यत्वादिति॰ गुरुमते
व्यधिकरणप्रकारकज्ञानासत्त्वादाह॰ अत एवेत्यादीति॰ अथ तद्वत्त्वमित्यग्रिमग्रंथेन तन्मते संगच्छते तन्मते ऽनु
मितिविषयत्वादित्यत आह॰ वादिनश्चय इति॰ समानेति॰ समानवित्तिवेद्यातिरिक्तविशेषणस्यैव विशिष्टबुद्धौ पूर्वज्ञाना
पेक्षा न तु सर्वस्येत्यर्थः॰ न चेति॰ प्रागभावध्वंसवेत्यर्थः॰ इति दिगिति॰ यद्यपि द्व्यादिषु द्वान्योन्याभावव्यक्तिरेकाऽभावत्वमि
त्युच्यते तत्र चाभावत्वं सदपि प्रतीतौ न विषयः व्यक्त्यैक्येनैवाननुगमनिरासे तत्प्रवेशे मानाभावात्॰ स्वात्मकस्यैव प्रवेशा

अभावत्वप्रकारकज्ञानएवतदपेक्षणात्. तथापिसामान्याप्रकारकाभावएवप्रतियोगिज्ञानापेक्षा. २ ज्ञान।

क्षा. तथाचज्ञानवस्था. नापिप्रतियोग्यादिज्ञानापेक्षा तएवनाभावेनिर्विकल्पकमितिमतेनेदं. वस्तुतःसप्रकार
कविंचित्प्रतियोगिज्ञानस्यापेक्षितस्यसत्वात्. समाधिसौकर्य्यणेवेदमुक्तम्. ननुतथापिप्रतियोगित्वंस्वरूपसंबंधा
त्मकमितिनयुक्तं तथासतिपूर्वज्ञातस्यैवप्रकारतापत्तेरितिचेन्न. अभावविरहात्मकत्वंहिप्रतियोगित्वंतत्रविरह
त्वभागःस्वरूपात्मकः अभावांशश्चपूर्वाज्ञातइत्यादायपूर्वाज्ञातत्वस्वरूपात्मकत्वयोरुपपत्तेरिति. तद्विशेष्यत्वे
ति. वस्तुगत्याऽरजतत्ववान्नविशेष्यइतिग्रहाभावादित्यर्थः स्वेत्पेति. यत्रप्रथमतएवबाधस्तत्रबाधोनभ्रांतिविना
शासंभवादितिभावः. मूलेस्वप्रकाशइत्यादिकंपरप्रकाशेइत्यतःपूर्वप्राभाकरमतेबोद्धव्यम्. तत्रचप्राचीनप्राके
णरमतेस्वयमविषयोऽज्ञातेपिस्वस्मिन्व्यवहारप्रवर्त्तनमेवस्वप्रकाशत्वं. अर्वाचीनप्राभाकरमतेस्वविषयकत्व
मेवतदितिमयमाशंकितं. ज्ञानेति. ज्ञानमनुपनीतमज्ञातंयत्रतादृशस्यतद्वतितत्प्रकारकत्वस्यस्वातंत्र्येणज्ञानने
रपेक्ष्येणग्रहणाशंकैवनभवति. स्वरूपसंबंधात्मकविशेष्यत्वादेर्ज्ञानस्वरूपपर्य्यवसायितयाज्ञानाग्रहेग्रहा

वि·प्र·म·
५८

संभवादित्यर्थः·मनसेति च मानसज्ञानस्यालात्तिप्रायेण·यद्वा·मनःपदेन ज्ञानं लक्ष्यते·तथा च मनसो ज्ञानस्य ब
हिर्ज्ञाननैरपेक्ष्येण स्यात् तं ज्ञानं च बुद्धिविशेष्यकत्वादिग्रहसामर्थ्यात्·स्वप्रकाशो ज्ञानत्वं नास्मत एवेत्यत आह·विषयेति·अत्र
मव्याप्तत्वमिति मूलस्य क्रियाविशेषणपरतेति परमार्थः·तेन त्वमव्याप्तत्वं यथा स्यात्तथा न गृह्णीयादित्यर्थः·व्याप्तिवा
रात·आह कसामग्र्या त्वमेपि गतत्वादित्ययो मूलस्येति तत्वं·ननु प्रत्यक्षरूपे संशये सन्निकर्षो जनकः न तु लैङ्गिकेपी
त्यतो लिंगं चेति मूलं·यद्यपि लैङ्गिकसंशयपक्षेपि परज्ञानापेक्षास्त्येव तथापि वस्तुस्थित्यनुरोधात्तस्येत्याद्युक्तम्·य
द्वा धर्म्मिसन्निकर्षस्य धर्म्मिज्ञापकत्वेन रूपेण संशयजनकतया प्रत्यक्षे धर्म्मिज्ञापकं ज्ञानं तादृशं लिंगमेव संशयजनक
मस्त्वित्याशंकायां लिंगं चेत्यादि·संदिग्धस्य लिंगस्य संशयजनकत्वमस्त्येवेत्यत आह·निश्चितस्येति·पूर्वमप्रामाण्येति·
यद्यपि धर्म्मिज्ञानानन्तरं अप्रामाण्यस्मरणेपि तदव्यवहितत्वमेव तत्समवधानं·अन्यथा इदं ज्ञानमप्रमेत्यत्रापि ग्रह
णस्मरणात्मककमिकज्ञानद्वयसत्वादाद्येन ग्रहणेन प्रामाण्यग्रहणापत्तेः·तथापि अनुव्यवसायात्मकधर्म्मिज्ञाने

प्रथमतोऽस्त्वेवचिरकालेनस्मृतेनतत्रधर्म्मिणिप्रामाण्यसंशयेमूलकारेणोज्ञानस्यात्·तत्रप्राथमिकधर्म्मिज्ञानस्या
प्रामाण्यग्राहकसामग्र्यसमवहितत्वेनप्रामाण्यविषयकत्वेनतन्मूलकधर्म्मिस्मरणस्यापिप्रामाण्यविषयकत्वप्रसं
गादितिभावः·गुरुमतेऽप्येवंशंकासमाधानेध्येये·यद्वाएतदस्वरसादेवाह·विवेति·असंसर्गेति·प्रमात्वतदभाव
कोटिकसंशयेप्रमात्वाभावासंसर्गाग्रहः·प्रमात्वाग्रहपर्य्यवसितोदोषान्तरंविनाकथमित्यर्थः·ननुचशंखेऽपीतत्वासं
सर्गाग्रहोयथादोषंविनैवतथात्रापिस्यादित्यतआह·शंखेति·तत्रापिपित्तलक्षणदोषप्रयुक्तत्वादसंसर्गाग्रहस्ये
त्यर्थः·व्याप्यदर्शनकाले·व्याप्यदर्शनोत्पत्तिकाले·नन्वेतावतासंशयंप्रतिव्याप्यदर्शनस्यप्रतिबंधकत्वमायातुन
तुविरोधिनिश्चयसामग्र्याइत्यतआह·तस्येति·साक्षादेव·व्याप्यदर्शनत्वेनैव·ननुसंशयविपर्ययोत्तरप्रत्यक्षेव्या
प्यत्वप्रकारकज्ञानस्यकारणत्वमेवतत्रमानमित्यतआह·यदेवहीति·तथाचसंशयविपर्य्ययोत्तरप्रत्यक्षमात्रेव्या
प्यत्वप्रकारकंज्ञानंनकारणमितिभावः·तच्चैवापोद्बलकमाह·अतएवेति·आलोकसमवधानकाले·आलोकसमव

धानोत्पत्तिकाले· प्रतिबंधकसामग्र्या इत्यादिकमुक्तं निराकरोति· मणीति· ज्ञानात्मकेति· विपरीतनिश्चयेत्यर्थः· अ
त एव ग्राह्याभावनिश्चयसामग्र्या इति स्वयमेवाग्रे वर्णयिष्यति· भूतले घटाभाव इति ज्ञानानन्तरं घटाभाववद्भू
तलमिति प्रत्यक्षस्थले व्यभिचारादाह· प्रत्यक्षेतर इति· प्रत्यक्षमितरदस्मादिति बहुव्रीहिः· तेन सर्वनामकार्याभावः·
एवं· पक्षविशेषणकानुमितिस्वीकारे· व्यापकतापरामर्शस्यानुमितिजनकत्वे पक्षविशेषणिकानुमितिः स्यादित्येव बाध
कं· तद्धि पक्षविशेषणकानुमितिस्वीकर्तृणां निष्टमिति भावः· व्यापकतापरामर्श एव हेतुरिति नियमे पक्षविशेष्यिका
कदाप्यनुमितिर्न स्यादिति तत्र बाधकमित्याह· कदापीति· दिगर्थस्तु· अन्वयव्यतिरेकाभ्यामनुमितौ व्याप्यव्यापकसा
मानाधिकरण्यधीर्हेतुस्तथा च तदनुरोधेन व्यापकत्वमपि सामानाधिकरण्यघटितमेव निर्वाच्यमिति व्याप्यपक्षया
व्यापकत्वे लाघवाभावाद्व्यापकपरामर्श एव हेतुरित्यवधारणमसंगतमिति· व्याप्यदर्शनोत्तरकाल इत्यस्य विवरणं
विपरीतदर्शनकाल एवेति· विपरीतदर्शनकाले चेति क्वचित्पाठः· तदा स एव क्षणः· व्याप्यदर्शनोत्तरकालत्वेन विपरीत

विपरीतनिश्चयाधिकरणक्षणत्वेन वा विवक्षित इत्युपाधिभेदमात्रेण वा शंकः॰ आकर इति॰ प्रतिबंधकाभावस्य का
र्य्यसहभूतत्वेन जनकत्वाभावे सत्युत्पत्तिकाले दाहापत्तिरित्यस्य मूलव्यक्तत्वादित्यर्थः॰ ननुअत्रतेपि विपरीतनिश्च
यतत्सामग्र्यभावयोः कारणत्वे गौरवमित्याशंक्याह॰ अत्रतेवेति॰ व्याप्यदर्शनकाले॰ व्याप्यदर्शनोत्पत्तिकाले॰ तथाच
प्रामाणिकं गौरवमिति भावः॰ तदपीति॰ व्याप्यदर्शनोत्पत्तिकाले संशयो नोत्पद्यत इत्यपीत्यर्थः॰ अग्रिमग्रंथेति॰ तद्ग्रंथ
स्योत्पत्तिस्थितिक्षणसाधारणत्वादिति भावः॰ किंचेति॰ तज्जातीयत्वग्रहकाले न संशय इति सामान्याकारेण तज्जा
तीयत्वग्रहोत्पत्तिकालेपि संशयसंभवादित्यर्थः॰ निर्णयसामग्रीत्वावच्छेदेन संशयविरोधिनः सर्वस्योत्पत्तिक्षणे सं
शयविरोधित्वं न तत्पत्तिक्षणे तथाच निर्णयसामग्रीभूतायास्तज्जातीयत्वधियोपि उत्पत्तिक्षणे संशयाप्रतिबंधक
त्वमिष्टमेव कथमनिष्टत्वेनापादितमित्याशंक्याह॰ नचाचेवेति॰ ननु तज्जातीयत्वग्रहस्य निर्णयाजनकत्वे निर्णयसा
मग्रीत्वेन व्याप्यत्वग्रहसाधारणीभूतस्य प्रतिबंधकता न स्यादित्याशंक्याह॰ नचेति॰ ननु निर्णयसामाग्र्या उत्पत्तिक्षणे सं

शयप्रतिबंधकत्वं यथा तथा दृष्टयोगेव तज्जातीयत्वग्रहस्याप्युत्तरदूषणएवप्रतिबंधकत्वममेष्टमित्याशंक्याह॥ नवेति॥
तज्जातीयत्वग्रहस्यापितत्तरदूषणेसंशयप्रतिबंधकत्वेसकललोकसिद्धतदुत्पत्तिदूषणेसंशयानुत्पादस्यत्वयावचन
मात्रेणत्यक्तुमशक्यतयातन्निर्वाहायतत्सामग्र्याप्रतिबंधकत्वेकल्पनीयेभावद्वयकारणतायांगौरवमित्याह॥ नत्तु
ल्यइति॥ तज्जातीयत्वज्ञानकाले॥ तज्जातीयत्वज्ञानोत्पत्तिकाले॥ तत्सामग्रीमात्रस्यप्रतिबंधकत्वान्नगौरवमितियदि
तत्राह॥ तज्जातीयत्वेति॥ प्रतिबंधकसामग्र्याःप्रतिबंधकत्वादितियथाश्रुतेपूर्वोक्तदोषमाशंक्यनिराकरोति॥ नवेति॥ सा
द्यादिति॥ ग्राह्याभावावगाहित्वप्रयुक्तविरोधाभावादित्यर्थः॥ अत्रवदन्ति॥ विशेषदर्शनघटितसामग्रीयदिनप्रतिबंधि
कातदापुरुषत्वादिनिश्चयोत्पत्तिदूषणेसंशयोपपत्तिरित्यवार्थः॥ साधुः तथाहि॥ यत्रतत्रदूषणमुक्तं॥ प्रतिबंधकाभावस्यका
र्यसहभूतत्वेनजनकतयातत्कालीनानुत्पत्तिः॥ पुरुषत्वनिश्चयप्रयुक्तैवेति॥ तत्र॥ मण्यादिप्रतिबंधकाभावानामेकेन
रूपेणनजनकता॥ येनसामान्यकारणतायांसहभूतत्वप्रवेशःसंगच्छेत॥ किंचसिसाधयिषाविरहसहकृतसिद्ध्यभावा

त्मकप्रतिबंधकाभावस्यनानुमितिसमयेसत्त्वमितिसहकृततत्त्ववादिनापिज्ञानातिरिक्तप्रतिबंधकाभावस्यैवतथात्व
नियमोवाऽस्तुतथाचप्रत्यक्षेतज्ज्ञानस्यैवप्रतिबंधकत्वादयुक्तमेतत्·यत्रविशेषदर्शनोत्पत्तिकालेसंशयस्वीकारेऽनुभव
विरोधग्रंथविरोधोद्भावनं·तन्न·पूर्वक्षणेसंशयस्वीकारेतस्मिन्क्षणेसंशयानुत्पादस्यअस्मदाद्यनवधार्यत्वात्·क्षण
स्यदुर्लक्षत्वात्·ग्रंथस्यचव्याप्यग्रहेसंशयेनतज्जातीयत्वग्रहसामग्र्यभावस्यकारणत्वेनयज्ञैरेवमुक्तं·तदयुक्तं·तज्जा
तीयत्वग्रहोत्पत्तिकालेसंशयोत्पत्तिर्मिश्रैस्तत्तदप्रसक्तेरिति·अत्रेदंतत्त्वं·प्रतिबंधकाभावस्यकार्यसहकृतत्वेनहेतुत्व
मित्यस्यसहकृतत्वंस्वरूपयोग्यतालक्षणकारणत्वावच्छेदकमितिनार्थः तथासतिकिंचिदाहसमानकालीनस्यमणि
प्रागभावस्यदाहान्तरजनकत्वापत्तेः तत्तद्व्यक्तिसमानकालीनत्वेनकारणत्वेऽनन्तकारणतापत्तेः·किंतुफलोपधाना
वच्छेदकं·तथाचान्याभावत्वावच्छिन्नकारणताकानांफलसमानकालत्वेसत्येवफलोपधानमितिसामान्यतएवकल्प्यते·
स्वरूपयोग्यतावच्छेदकत्वपक्षेऽपिप्रत्येकंतत्तत्कार्यंप्रतितत्तत्प्रतिबंधकाभावस्यकारणत्वेगृहीतेमण्युत्पत्तिकाले

उद्बोधोत्पत्तिकाले च प्रतिबन्धकाभावेन सहकृतत्वेन विशेषकारणतानामवच्छेदो वा तदीयसामग्र्यभावो वा कारणमिति द्व
यमपि गौरवाद्दिष्टायसामान्यत एवञ्चान्याभावत्वगर्भधर्मावच्छिन्नकारणतानिरूपितकार्यत्वसहकृतत्वसिद्ध्यभावान्यस्य
स्वकारणाभावसमुदायस्य जनकत्वमिति कल्प्यते। एकस्याः कारणतायाः कारणतान्तरावच्छेदकत्वे तथाभावादिति। कि
ञ्च नियन्तृपरामर्शात्मकसत्प्रतिपक्षे द्वितीयेन प्रथमपरामर्शस्य कार्यं कदा प्रतिबध्यं। न तावत्तद्वितीयोत्पादक्षणे तद
त्तया प्रतिबन्धानङ्गीकारात्। नाग्रिमक्षणे तदासिद्धसाधनादिति यं घपर्यालोचनया कार्यसहकृतस्यैव जनकत्वमिति।
वस्तुतो यदि प्रतिबन्धकविरोधिसामग्र्या न प्रतिबन्धकत्वं तदा विशेषदर्शनस्य प्रतिबन्धकत्वेऽपि तत्सामग्र्या न तथेति विशे
षदर्शनोत्पत्तिकाले संशयापत्तेरिति मूलार्थः। तत्र च ज्ञानलक्षणप्रतिबन्धकाभावस्य कार्यसहकृतत्वेन जनकत्वाभा
व एवास्तिमतः। न च विशेषदर्शनसामग्र्यपि ज्ञानात्मिकेत्यनवस्थापत्तिरिति वाच्यं। न हि तत्र ज्ञानमात्रे पर्याप्तत्वं सामग्री
त्वं किन्तु कारणत्वचकेऽप्तीति दिक्। अपेति मूलं। धर्मीन्द्रियसन्निकर्षस्य विरोधिनिर्णयसामग्रीत्वेन प्रतिबन्धकत्वं न घटते।

संशयसामग्र्यभावस्य निर्णयसामग्र्यन्तर्गतिस्य तदा सत्त्वादित्यर्थः· विरुद्धोनीति· नवमते धर्म्मिज्ञानमेव प्रामाण्यग्रहा
त्मकमिति धर्म्मिज्ञानाज्ञानयोः संशयसामग्री न संभवति प्रतिबंधकसत्त्वात्कारणाभावाच्च· नन्वाव तत्त्वयुक्तो धर्म्मी
क ड्रियमत्त्रिर्षस्य न निर्णयसामग्र्यां त्वासाव इति त्वांप तादंडूषणमिति प्रचष्टकार्यः· अथ विरुद्धारोपसामग्रीद्वयसमा
जादेवेतियाऊं· ननु संशयसामग्रीतत्तद्भयारोपएको भवतीत्ययुक्तं· सत्प्रतिपक्षवत्परस्परप्रतिबंधेन सामग्र्योरजनक
त्वापत्तेरित्याशंक्याह मूलं· न त्विति· अविरोधादिति मूलं· संशयलक्षणफलदर्शनादिति भावः· नन्वतिरिक्तैव संश
यसामग्री धर्म्मिज्ञानाघटिता सैव धर्म्मिसन्निकर्षस्य निर्णयसामग्र्यात्वेविहन्यादित्याशंक्य मूलं नञोभयेति· उभया
रोपसामग्रीपदेन धर्म्मिज्ञानाघटितासंशयसामग्री विवक्षितं· एत — — — एपनुरोधेन व्याख्यातं· वस्तुतस्तु· विरुद्धो
भयारोपसामग्र्यां उभयमेव संशयसामग्रीत्वव्यवस्थनिर्णयस्यांशस्य प्रतिबंधकत्वमभेदादसंभावितमित्याह· वि
रुद्धेति· अपरांशसामग्र्याः प्रतिबंधकत्वेपरिहरति· न त्विति· अविरोधादिति· मम मूलालंबन एकनिर्णयसामग्र्याः

वि·प्र·भ·
30

परांशानिर्णयाविरोधादित्यर्थः· मिलितप्रतिबंधकत्वं निराकरोति· नचोभयेति· प्रत्येकेतिमूलं· तथाचांशात्तो
भेद इत्यर्थः· यद्वा अतिरिक्तैवसंशयसामग्रीति· निराकरणार्थं नचोभयेत्यादिपूर्ववद्बोध्यम्· इत्यतआत आहेति·
इदंच प्रथमव्याख्यायां· द्वितीयव्याख्यायांतु एकांशनिश्चयसामग्रीविरोध्यपरांशनिश्चयविरोधिनी संभवत्येव·
समूहालंबनेतु न परस्परविरोधोंशयोः· मिलितप्रतिबंधकत्वमपि संभवत्येव रूपान्तरेण प्रतिबंधकस्य रूपान्त
रेण जनकत्वसंभवादित्यस्वरसादाह· धर्म्मिज्ञानं वेतीति· आरोपान्तरेपि· संशयभिन्नेपि· विशेषणगोचरान्वयव्यति
रेकयोरेव बाधकाभावे सामान्यतः कार्यकारणभावग्राहकत्वादिति भावः· धर्म्मिधीसामग्रीत्वेनानुगमप्रथमोप
स्थितधर्म्मिधिय एव कारणत्वं स्यादित्यस्वरसादाह· किंचेति· यन्निष्ठेति· सहचारग्रहस्य वान्वयस्य सहचरितधर्म्मि
णो वान्वयस्येत्यर्थः· अन्वयः सहचारो भूयात्सहचारग्रहः· इदमुपलक्षणं· भूयः स्वाधिकरणेषु सहचारग्रह इ
त्यपि द्रष्टव्यम्· आरोपनियमः· आरोपविषयनियमः· निरंशोज्ञानेऽव्याप्यवृत्तिधर्म्मासंभवादाह· तादृशेति· भूयः

सहचरितधर्म्मककोटिविषयकत्वमित्यर्थः॰परव्याख्यानमनूद्यनिराकरोति॰प्रत्यक्षरूप इति॰अप्रामाण्यस्ये
ति॰ननुप्रामाण्यंघटत्ववत्त्वघटितमप्रामाण्यंचघटत्वाभावघटितमितितज्ज्ञानयोःपरस्पराभावविषयकत्वम
स्त्येव॰नचैकावच्छेदेनघटत्वंघटत्वाभाववत्त्वंचनगृहीतंतादृशयोश्चग्रहयोर्विरोधोऽन्यथाकुत्रचिद्घट
त्वंकुत्रचिद्घटत्वाभाव इतिज्ञानयोरपिविरोधापत्तेरितिवाच्यं॰घटत्ववद्विशेष्यकत्वंघटत्वाभाववद्विशेष्यकत्वं
चगृहीतज्ञानयोरेतज्ज्ञानविशेष्यत्वावच्छेदेनघटत्वतदभावविषयकत्वसंभवादिति॰उच्यते॰एवमपिनान
योर्विरोधःविशेष्यत्वस्यावच्छेदकत्वापरिस्फुरणात्तत्सामानाधिकरण्यमात्रस्यचविशेष्यभेदेप्युपपत्तेः
क्वचिद्घटत्वंक्वचिद्घटत्वाभाव इतिवदविरोधात्॰नचैवंघटत्ववद्विशेष्यकत्वतदभाववद्विशेष्यकत्वयोर्विशेष्यै
क्याग्रहेविरोधाभावात्संशयकोटित्वमपिकथमितिवाच्यं॰विरुद्धत्वक्रमेणएकमात्रविशेष्यकत्वेसतिघटत्वव
द्विशेष्यकत्वंतथात्वेसतिघटत्वाभाववद्विशेष्यत्वंचकोटिद्वयमादायवासंशयसंभवादितिसंक्षेपः॰तद्विरुद्धेति॰

वि॰प्र॰म॰ 31

तद्विरुद्धतयाप्रतीतेरित्यर्थः॰ दुर्ग्रहत्वादिति॰ यद्यपि दुर्ग्रहत्वेपि वस्तुत्वस्त्येव॰ तथाप्येतादृशाप्रतिबंधकल्पने
ञ्चाप्यन्वयव्यतिरेकाभ्यांनस्यादित्यत्र तात्पर्यं॰ शंकास्पदमपीति॰ अप्रतीतेश्शंकानुदयादिति भावः॰ नत्विति॰ घट
त्ववद्विषयकत्वविषयकत्वं व्यवसायगतेन घटत्ववद्विषयकत्वेन विनापि संभवति॰ घटत्वसंसर्गारोपात्मक
व्यवसायेऽनुव्यवसायगृहीतघटत्ववद्विषयकत्वाभावात् तद्विषये घटत्वाभावादित्यर्थः॰ यद्विघटत्वारोपे
घटारोपआवश्यकस्तदागंधादिसंसर्गारोपतदाह्यर्थः॰ यदनुव्यवसायविषयः स्यात्तं अयेणेतिशेषः॰ घटवि
षयकत्ववैशिष्ट्यमिति घटत्वोपलक्षितधर्म्मिविषयकत्ववैशिष्ट्यमित्यर्थः॰ नतद्विषय इति॰ अत्रापि तु पनय
नेरपेक्षेणेतिशेषः॰ विषये घटानवेति॰ इदं ज्ञानं घटविषयकं नवेत्यर्थः॰ तथा च घटत्वोपलक्षितधर्म्मिविषय
कत्वमात्रेऽनन्यथासिद्धत्वं मूलेऽभिप्रेतमिति भावः॰ इहेति॰ यद्यपि प्रामाण्यं विनापि दर्शनादित्यस्य विषयगत
घटत्वं विनापि संभवादिति पर्य्यवसितोर्थः॰ तथाच न तु घटत्वविशेष्यकत्वरैमित्यादिशंकापि सन्नत एव पर्य्यवस

न्नातथापि एकत्र घटविषयकत्वमादाय शंकितं परत्र घटविशेष्यकत्वमादायेति भेदः॰ विषयसंज्ञायान्यथा
नुपपत्या॰ स्वीकर्त्तव्य इति शेषः॰ साऽनुपपत्तिः॰ विशेषेति॰ विपरीतदर्शनेसतीत्यर्थः॰ एवमग्रेपि विशेषपदं वि
परम्॰ अग्रिमग्रंथाविरोधायेति॰ रजतमहं जानामीत्यग्रिमग्रंथे विशिष्टवैशिष्ट्यावगाह्यात्मविशेष्यकज्ञाने
छरवात् ज्ञानमित्याकारकं द्वितीयं ज्ञानमत्र नानुव्यवसायपदेन ग्राह्यमित्यर्थः॰ विशेषणेति॰ यद्यपि विशिष्टवै
शिष्ट्यबोधे विशेषणतावच्छेदकज्ञानत्वग्रहापेक्षास्त्येव तन्मतेपि॰ तथापि ज्ञानत्वग्रहस्य स्मरणादिरूपस्य सं
भवान्नानुव्यवसायोमध्ये नियमतोपेक्ष्यत इति भावः॰ अत एवाहेति॰ प्रसाधनार्थमेवाहेत्यर्थः॰ तद्विशिष्टेति॰
सत्वासत्वसाधारणतद्विशिष्टेत्यर्थः॰ स्वातंत्र्येण॰ सत्तानिश्चयजनकतया॰ बहिर्विशेष्यक इति॰ बहिःसत्तानिश्चय
इत्यर्थः॰ ज्ञानानुव्यवसायेज्ञानस्यात्मनो वा विशेष्यत्वापत्त्याद्युक्तस्यानुपपत्तेरिति॰ तदेतदाहान्यथेति॰ ग्राह्यप्रामा
ण्यापेक्षयेति मूलं॰ ग्राह्यं प्रामाण्यं यस्य तदपेक्षयेत्यर्थः॰ तथा च स्वस्याप्यन्यापेक्षयेति दोषो नास्तीति भावः॰ अग्राह्ये

वि·प्र·म·

32

त्तिमरलं· अग्राह्यंप्रामाण्यंयस्याप्रमारूपज्ञानस्यतदपेक्षयेत्यर्थः· तथाचग्राहकस्यापिग्राह्यप्रामाण्यत्वेनेतिप्रा
दिदोषोनास्तीतिभावः· अप्रामाण्येतिमरलं· अप्रमारूपज्ञानापेक्षयापरत्वंप्रमारूपव्यवसायस्यापीतितत्राह्यत्वे
नसिद्धसाधनापत्त्याव्यवसायस्याप्रामाण्यमंगीकार्यंस्यादित्यर्थः· तस्यचाप्रामाण्येतत्प्रामाण्यावगाह्यनुमित्यादेर
प्यप्रामाण्यप्रसंगः· तथाचाप्रमारूपज्ञानापेक्षयानपरत्वमितिभावः· स्वग्राह्येतिक्वचित्पाठः स्वेनग्राह्यंप्रामाण्यं
यस्यतदपेक्षयेत्यर्थः· सर्वासांप्रमानांस्वग्राह्यप्रामाण्यतयाततःपरत्वेग्राहकस्याप्रामाण्यंस्यात्· नतस्यव्यवसाय
स्याप्यप्रामाण्यंस्यात्ततश्चतदेवपरमितिसिद्धसाधनमितिभावः· संशयविषयत्वमिति· तथाचस्वाश्रयक्षणोत्तर
तृतीयक्षणवृत्तिसंशयविषयत्वम्· अप्रामाण्यसंशयाऽन्यसंशयविषयत्वंचसुतरांसर्वत्रदुर्लभमितिभावः· ईश्व
रज्ञाने· ईश्वरज्ञाननिष्ठेसर्ववृत्तिसर्वत्वप्रकारकत्वे· विशेषणमनन्यासेत्यादि· संशयाश्रयविषयत्वपर्यन्तावच्छेदके
संशयविशेषविषयत्वरूपहेतुसाध्यसामानाधिकरण्यग्रहकालेसुतरांपर्यन्तावच्छेदकसाध्यसामानाधिकरण्यं

२५

ज्ञानमित्याशयेन सिद्धसाधनमाशंक्य निराकरोति· प्रामाण्यविशेषितस्येति· भागासिद्ध्यपरीहारादिति· तत्र व
त्वर्थादित्रणवर्त्तित्वात् प्रामाण्यसंशयजन्यत्वाच्च संशयस्य यथोक्तहेतुद्वयाभावादिति भावः· पक्षतावच्छेदकहेतुत्व
भेदनिबंधनसिद्धसाधनशंकायामाह· हेत्वन्तरत्वानन्वयस्येति· ज्ञानेति· पक्षतावच्छेदकहेतुत्वभेदनिबंधनसिद्धसा
धनपरिहारस्य प्रकारान्तरेण ज्ञातत्वादिति भावः· हेतुमेव पक्षतावच्छेदकीकृत्य सिद्धसाधनं प्रसज्य तद्वारणा
य ज्ञानप्रामाण्यपदमिति समाधानं स्फुटत्वादुपेक्ष्यान्यदाह· अव्यावर्त्तकस्यापीति· यद्यपि जन्यपदमव्यावर्त्तक
मित्युचितमजन्यत्वस्य प्रसिद्धेः इह तु ज्ञानप्रामाण्यपदस्य तृतीयक्षणवर्त्तिसंशयविषयीभूतप्रामाण्यादव्यावार
णीया इति· व्यावर्त्तकत्वसंभवस्यैव· तथापि पक्षतावच्छेदकैकोंऽशश्चातः सिद्धसाधनस्यादोषतया तद्वारणे प्रयो
जनाभावात् सप्रयोजनव्यावर्त्तकत्वस्याभावोऽत्र विवक्षितः· प्राचीनमतेति· पक्षतावच्छेदकसाध्यसामानाधिकर
ण्यमात्रावगाहित्वादनुमितेरिति प्राचां भावः· संशयसामग्रीति· तृतीयक्षणवर्त्तिसंशयसामग्रीविशिष्टज्ञानप्रा

चि·प्र·म·
33

माण्यंपदइत्यर्थः ज्ञानप्रामाण्यपदंचात्रापिकल्पेतुपरंज्ञकमंशतःसिद्धसाधनवारकंवेतिध्येयम्· अत्रविप्रति
पत्तावनुमानप्रयोगेचपक्षतावच्छेदकरूपेणापिनार्थान्तरंतुद्वयसिद्ध्यविरोधादितिभावः· वस्तुधीर्विप्रतिमधिकृ
त्याह· नस्वाश्रयग्राह्यमितिमूलम्· नयावत्स्वाश्रयग्राह्यमित्यर्थः· अन्यथा ईश्वरज्ञानादिरूपेणस्वाश्रयेणसर्वे
षांप्रामाण्यानांग्राह्यतयाबाधापत्तेः· एतावतापरपक्षनिराकरणेपिपरतोग्राह्यत्वरूपस्वमतसिद्धिर्नज्ञाते
तिमूलेस्वाश्रयातिरिक्तेत्यादिद्वितीयंसाध्यं· तद्वयथाश्रुतंसिद्धसाधनग्रस्तमतोव्याचष्टेस्वाश्रयातिरिक्तमात्रेति· यावत्स्वा
श्रयग्राह्यत्वेसतिस्वाश्रयातिरिक्तग्राह्यमित्यर्थः· तदाश्रयेति· अप्रामाण्याश्रयेत्यर्थः· अर्थेपिसाध्यसंभवेनेति· घटत्वाद्या
श्रयेयावद्धर्मग्राह्यत्वस्यग्रहणोपहितत्वस्यघटत्वादौयावद्गुरुत्वाद्याश्रयग्राह्यत्वस्यग्रहणयोग्यत्वस्यवगुरुत्वादावभा
वादित्याशयः· प्रमात्वानिति· तच्चवत्वर्थादिदूषणेसंशयानन्तरवारणायद्वितीयेत्यादिविशेषणस्यसार्थकत्वादित्यर्थः· इद
चोपलक्षणंप्रामाण्यसंशयाहितसंशयविषयेएतद्घटरूपादौघटद्वयसंयोगादौचोक्तरीत्यासाध्यासत्त्वेनतद्व्यति

वारवारणायापि विशेषणसार्थकत्वं द्रष्टव्यं॰ सिद्धसाधनापत्त्येति॰ प्रामाण्याश्रयीभूतं यद्घटादिज्ञानं यावत्तज्जन्य
ग्रहणविषयत्वाभावस्य प्राभाकरैरपि स्वीकृतत्वादिति भावः॰ पक्षीकृतमात्रपरत्वमिति॰ अत्र यद्यपि एतद्गुणव
न्निदेवदत्तज्ञानमिति वाक्येन जनिते एतद्गुणवन्निदेवदत्तज्ञानज्ञाने एतद्गुणवन्निदेवदत्तज्ञानत्वं विषयः तस्यैव
प्रामाण्यसंज्ञया हितसंज्ञाय विषयस्य यावत्त्वाश्रयग्राह्यतया व्यभिचारेण तद्वारणाय समभिव्याहृतपरत्वेपि स्व
पदस्य तृतीयद्गुणवद्व्यादिपदं सार्थकं भवत्येव तथापि समभिव्याहृतपरत्वपक्षे शाब्दसामग्र्यप्यर्थसाम्याभावेना
नुमानाप्रवृत्तिमभिप्रेत्यैतदुक्तं॰ अत एवाचार्यचरणैः सर्वनाम्नां वक्ताऽयमन्वय इत्युक्तं॰ नन्वत्र स्वपदं पक्षतावच्छेद
करूपावच्छिन्नपक्षपरं वा घटत्ववति घटत्वप्रकारत्वादिप्रत्येकपरं वा॰ आद्ये सिद्धसाधनं तादृशप्रामाण्याश्रयैर्यावद्भिः
पक्षीकृतस्य कस्यापि प्रामाण्यस्य ग्रहणाभावात्॰ द्वितीये चातः सिद्धसाधनं घटत्ववतीत्यादिप्रामाण्याश्रयैर्यावद्भिः पक्षत्व
वतीत्यादिप्रामाण्यस्य ग्रहणाभावात्॰ न च पक्षतावच्छेदकावच्छिन्नं साध्यमनुमितिविषय इति नोक्तातः सिद्धसाधनं दोष इति वाच्यं॰

चिं·प्र·म·

३५

अत्रसर्वज्ञशब्दादिजन्यज्ञाननिष्ठसर्वत्ववतिसर्वत्वप्रकारकत्वेपक्षतावच्छेदकस्यातिप्रसक्ततयातत्सामानाधिकरण्यावगाहि
न्या एवानुमितेः स्वीकर्त्तव्यत्वादिति· अत्रेदं तत्त्वं· तृतीयक्षणवर्त्तिसंशयविषयीभूतं यत् घटत्ववतिघटत्वप्रकारकत्वादि त
देव पक्षीकर्त्तव्यं· नत्वनन्यासेत्यादिपक्षे विशेषणं देयं· तथा च घटत्ववतिघटत्वप्रकारकत्वं तदाश्रययावज्ज्ञाप्यं न तदाश्रये
तदुत्तरतृतीयक्षणवर्त्तिसंशयविषयत्वात्· घटत्वाभाववतिघटत्वप्रकारकत्ववदित्यादिः प्रयोगः पर्य्यवस्यति·
विप्रतिपत्तावप्येवमेव पक्षसाध्ये निर्वाच्ये· अत एव च विप्रतिपत्तिप्रयोगयोः पक्षतावच्छेदकभेदनिबंधनार्थान्त
रत्वं कापि न· न चैवं मूलोक्तविप्रतिपत्तिव्याख्याने पक्षतावच्छेदकैक्यनिबंधनांशतः सिद्धसाधनोद्धारविरोधः
उक्तः कथं समाधेय इति वाच्यं· सामान्यतः प्रामाण्यपक्षतावच्छेदकपक्षमाश्रित्य तन्मूलावतारात्· अत एव चालो
ककृत्स्मरणरूपस्याश्रयस्योत्पादनावसरे वक्ष्यति स्वपदं च तत्तत्प्रामाण्यपरमिति· यद्वा सर्वपदाद्यप्रतिपाद्यस
कलविषयकज्ञानभिन्नज्ञानप्रामाण्यस्य पक्षतया पक्षतावच्छेदकावच्छिन्नसाध्यकानुमित्याश्रयणात्सत्येकप्रा

माण्यपरत्वे स्वपदस्यांशतः सिद्धसाधनोद्धारो न विधेयः॰ तदभिप्रेत्यैव स्वपदं वेत्यादि वक्ष्यति॰ वक्ष्यमाणप्रकार
त्वगर्भलक्षणाध्येतु यथाश्रुतमेव सम्यगिति॰ विरोधप्रदर्शनार्थ इति॰ साध्यासत्वे हेतोरनुपपत्तिरित्येवंरूपतर्कप्र
दर्शनार्थ इत्यर्थः॰ एतेनेति॰ स्वाश्रयाधिकरणक्षणस्य सामान्यतो विवक्षितत्वेनेत्यर्थः॰ परमते ऽसिद्धिरिति॰ यद्यपि
स्वप्रकाशपक्षे प्रथमक्षण एव स्वाश्रयनिश्चयान्नासिद्धिस्तथापि स्वाश्रयनिश्चयपरत्वे स्वाश्रयानुव्यवसायपरत्व
इत्यर्थः॰ तथा चानुव्यवसायस्य परैरनंगीकारादसिद्धिर्द्रष्टव्या॰ यथाश्रुते स्वाश्रयोत्पत्तिपरत्वे॰ धर्म्मिधीसहितेति॰
स्वतंत्रधर्म्मिधीसहितेत्यर्थः॰ अन्यथा प्रामाण्यादिशरीरनिविष्टधर्म्मिधीसत्वादिति॰ आत्मनीति॰ मनोग्राह्योपलक्षणं॰
अनुभवरूपायाः स्वेच्छायेन सह समूहालंबनात्मकानुभवरूपायाः॰ अन्यत्र मनोऽयोग्यस्मृतिरूपायाः प्रामाण्यकोटि
स्मृत्या सह समूहालंबनात्मकस्मृतिरूपायाः॰ एवंप्रकार इति॰ प्रामाण्याप्रामाण्यस्मृत्युत्पत्तिक्षण एव धर्म्मिणोर्थस्य
तद्वत्तातद्वत्वयोश्च स्मृतेरित्यर्थः॰ अगृहीतासंसर्गेति॰ यद्यपि परस्परनिरूपितधर्म्मत्वधर्म्मित्वानवगाहनान्न विशि

चिं·प्र·म·

35

ष्टज्ञानत्वमुन्नयावगाहनमात्रेणेति प्रागुक्तं तथाप्यसंसर्गाग्रहे धर्म्मस्यान्यधर्म्मितयाऽनुपस्थितौ च धर्मधर्म्मिणोः
परस्परनिरूपितधर्म्मधर्म्मिभावो गृह्यत एवेति नियमादेवमुक्तं· तृतीयदलावच्छिन्नसंशयविषयत्वं घटविषयकत्वे धर्म्मिता
वच्छेदके गुरुमते व्यभिचारि· घटविषयके प्रमानवेति संशयात्· एतद्दलावच्छिन्नदेवदत्तज्ञानमिति वाक्येन ऊनिते एतद्द
लावच्छिन्नदेवदत्तज्ञाने च धर्म्मिणि तृतीयदलावच्छिन्नसंशयविषयतादृशदेवदत्तज्ञानत्ववद्विशेष्यकतादृशदेवद
त्तज्ञानत्वप्रकारकयाऽवच्छिन्नाश्रययाप्युक्तनयमते व्यभिचारित्वमत आह· विषयत्वमिति· ननु प्रथमे न्यायमते व्यर्थता· द्वि
तीये घटज्ञानप्रामाण्यपदलतायां व्यर्थतेत्यस्वरसादाह· यद्वेति· धर्म्यंशे इति· धर्म्मितावच्छेदके धर्म्मिरूपेंऽश इति वा
र्थः· वस्तुतस्तु· घटत्वादिकमपि प्रामाण्यशरीरनिविष्टतया संशयकोटिरेवेत्यर्थे व्यभिचारवारणाय कोटितापर्या
प्त्यधिकरणत्वं विवक्षितमिति ध्येयम्· ननु उक्तरूपदलावच्छिन्नसंशयविषयत्वमेव हेतुरस्तु· किमिति स्वाश्रयाधिकरणद
लेति विशेषणमित्यत आह· स्वाश्रयस्येति· स्वाश्रयाधिकरणदलस्येत्यर्थः· अप्रसिद्धेति· अवधिज्ञानं विनासाव

धिपदार्थज्ञानादिति भावः परिशायकस्य हेतोरप्रवेशो न युक्त इत्यत आह यत्किंचिदिति चतुर्थलक्षणे स्वाश्रय
स्थितिलक्षणापेक्षया अग्रे वक्तव्यदोषेण प्रथमं कल्पं विहाय कल्पान्तरमाह वस्तुत इति संशयसामान्येति स्वाश्रय
विद्यमाने संशयसामान्यसामग्रीमात्राव्यवहितोत्तरक्षणवृत्तिसंशयविषयत्वं हेतुरित्यर्थः प्रथमकल्पे दोषमा
ह यथाश्रुत इति स्वहेत्विति स्वहेतुज्ञानविषयेत्यर्थः तथा च स्वहेतुज्ञानविषययोः समानधर्म्मस्तद्विशिष्टध
र्म्मिविषयत्वनियमादित्यर्थः न च तद्धटविषयकं प्रमानवेत्याकारकः संशयस्तथाप्यनुमानेन किंचिद्दूषणमित्य
स्वरसादाह किंचेति उक्तप्रकारादिति स्मृतिरूपधर्म्मिधियः तृतीयक्षणोत्पादात्स्वतंत्रकोटिस्मृतिधर्म्मिज्ञा
नालकार्यसंशयस्य स्वाश्रयोत्पत्तिक्षणावधिकतृतीयक्षणे प्रामाण्यसंशयरूपत्वं तथार्थरूपधर्म्मिस्मृतिसहिता
याः चतुर्थक्षणोत्पन्नार्थतद्वत्तातद्वत्त्वकोटिस्मृतेरप्यर्थसंशयत्वमित्याह यथा सेति इदमुपलक्षणं गुरुमते द्वितीय
क्षणोपजाततद्वत्तातद्वत्त्वस्मृतिस्मृतितृतीयक्षणोपजातार्थरूपधर्म्मिस्मृत्यालकोर्थसंशयः स्वाश्रयोत्पत्तिलक्ष

वि॰प्र॰म॰ णावधिकत्वतीयक्षणेऽपि संभवत्येवेत्यपि ध्येयम्॰ स्वाश्रये विद्यमाने इति विशेषणासिद्धिं शंकते॰ नन्विति॰ धर्मि
36 ज्ञानादिना॰ सविकल्पकरूपधर्मिज्ञानस्यादिना कारणेन निर्विकल्पकेन॰ वा पूर्वं विदिति॰ आत्मन्यर्थेऽनुभवरूपाया इ
त्याद्युक्तप्रकारेणेत्यर्थः॰ घटे स्मृतेरिति तदुपलक्षणं॰ मनोयोग्येऽर्थे प्रामाण्यसंशयकाले तदनुभवोऽपि बोद्धव्यः॰ फलत इति॰ हे
तूक्तसंशयसामग्र्याः पक्षतावच्छेदकत्वादिति भावः॰ स्वरूपासिद्धिं निराकृत्य वैयर्थ्यदोषं निराकरोति॰ न चेति॰ सामान्य
सामग्रीजन्येति॰ सामान्यसामग्रीमात्रजन्येत्यर्थः॰ प्रामाण्यसंशयाव्यवहितोत्तरक्षणे घटस्मरणं ततो घटो न वेति संश
य इत्याह॰ संशयस्यानुभवरूपतयेति॰ धर्मिज्ञानादिविलंबेनेति॰ धर्मिज्ञानमेवादिः कारणं तद्विलंबेनेत्यर्थः॰ न च प्रामाण्य
स्मरणकालीनघटस्मरणस्योक्तत्वात्तस्य च प्रामाण्यसंशयकाले विद्यमानत्वादग्रिमक्षणेऽर्थसंशयोत्पत्तौ कथं विलं
ब इति वाच्यं॰ यत्रैव प्रामाण्याप्रामाण्यस्मरणकालेन घटस्मरणं तत्रैवोक्तरीत्या प्रामाण्यसंशयाग्रिमक्षणे घटस्मरण
स्वीकारात् व्यभिचारेण संशयसामान्येत्यादिविशेषणस्य सार्थकत्वादिति भावः॰ न च तथासति हेत्वसिद्धिः प्रामाण्यसं

शयोत्पत्तिकाले स्वाश्रयासत्त्वादिति वाच्यं· स्थलान्तरमादाय तस्मिन्नेव प्रामाण्ये हेतुसत्त्वादिति· अत एवोक्तं प्रायश
इति· वक्ष्यति च प्रायेणेति· प्रायिकत्वं च घटस्मरणान्वितमुन्नयच्चेति ध्येयम्· वस्तुतस्तु प्रामाण्यस्मृतिकालेस्मृतस्य घ
टस्य प्रामाण्यसंशये उपनीतभानमादाय स्वाश्रयविद्यमानतास्ति· यद्वा· स्वाश्रये विद्यमान इत्यस्य संशयोत्पत्त्यव्यवहि
तपूर्वक्षणे स्वाश्रयविद्यमानत्वमर्थः· तथा च प्रामाण्याप्रामाण्यकोटिस्मृतिकालीनघटस्मृतिमादायैव प्रामाण्ये ऽर्थेव स्वा
श्रये विद्यमान इति विशेषणस्य संगतिरिति ध्येयम्· फलांशयोर्विरोधमाशंक्य निषेधति· न चेति· घटोयमिति· घटः
सइत्यर्थः· अयमिति यदा नास्ति तदा सम्यगेव· उज्ज्वलस्येवेति· व्यतिरेके दृष्टान्तः· तथा च संशयाप्रयोजकतया धर्म्य
शे घटत्वं न विषय इति स घटो न वेति संशये फलांशयोर्न्न विरोध इति भावः· ननु तथापि कोटिनिश्चयात्मकधर्म्मिज्ञा
नकोटिद्वयज्ञानयोः संशयसामग्र्यंशयोर्विरोधः स्यात् कोटिनिश्चयस्य संशयप्रतिबंधकत्वादित्यत आह· सामग्र्या
रपीति· सामग्र्यंशयोरपीत्यर्थः· अप्रामाण्यशंकाशून्यजातीयकोटिनिश्चयस्यैव संशयप्रतिबंधकत्वं नान्यस्येत्यर्था

वि॰प्र॰म॰

37

दग्रेनुभवं घटश्चेत्यत्र दर्शयिष्यत इत्यर्थः॰ तदवधिकेति॰ स्वाश्रयजन्मक्षणेनासमानकालीनोऽव्यवहितश्च यः
क्षणः तेनासमानकालीनोऽव्यवहितः स्वाश्रयजन्मक्षणासमानकालीनश्च यः क्षणस्तद्वह्निसंशयविषयत्वस्येत्यर्थः॰
यद्यप्यर्थसंशयानंतरं विशेषदर्शनजनितघटनिश्चयस्य स्वाश्रयतया तज्जन्मक्षणावधिकपूर्ववर्त्तितृतीयक्षणवह्नि
संशयविषयत्वमर्थव्यभिचार्येव तथापि घटनिश्चयो न स्वाश्रयः तृतीयक्षणवह्निसंशयविषयप्रामाण्याश्रयस्य त
त्वात्॰ तत्र च विशेषदर्शनमूलकतया तृतीयक्षणे प्रामाण्यसंशयादिति भावः॰ केचित्तु॰ ननु तदुत्तर इत्यनेन मू
लस्योत्तरशब्दस्यार्थो न दृष्यते किं तदुत्तरादिति यत्स्वयमुक्तम्॰ तत्र उत्तर इति तृतीयक्षणविशेषणं व्यर्थतया दूष्यते॰
तथा च ज्ञानत्वविशिष्टज्ञानग्रहरूपं धर्मिज्ञानमाश्रित्य स्वाश्रयोत्तरादित्यनेन स्वाश्रयस्थितिक्षणोत्तरो निमित्तः न च
तत्पूर्ववर्त्तितृतीयक्षणेऽर्थसंशयस्तदा स्वाश्रयस्य सत्वादित्यर्थमाहुः॰ चतुर्थेति॰ निर्विकल्पकास्वीकारे स्वाश्रयजन्मक्षण
न्तत्स्वीकारे च स्वाश्रयस्थितिक्षणाच्चतुर्थत्वमिति भावः॰ निश्चये सतीति॰ स्वप्रकाशमादाय प्रथमक्षणः ज्ञानाकराणामनु

व्यवसायमादाय द्वितीयरूपाश्च नैयायिकानां स्वाश्रयनिश्चयरूपः तथा च स्वाश्रयनिश्चयोत्पत्तिरूपोत्तरत्वे तृती
यरूपवत्त्वं संशयविषयत्वमनुमेयमतस्साधारणो हेतुरित्यर्थः तृतीयरूपेऽस्मरणरूपस्वाश्रयनिश्चयोत्पन्नोत्तद
नन्तरस्वत्वं च धर्म्मिज्ञानकोटिज्ञानात्मकसंशयस्य प्रामाण्याकरमतेनागुरुत्वाच्चाउक्तहेतुरर्थव्यतिरेकाद्यर्थेव घटत्व
वति घटत्वप्रकारकत्वस्य तन्मते संशयास्पर्शाच्चेत्यनुव्यवसायेऽनुक्तमन्य इति । तदुत्तरत्वे तृतीयेत्यादि । स्वाश्रयाधिकरण
रूपोत्तरत्वे तृतीयरूपवत्त्वं संशयविषयत्वमित्यर्थः । गुरुमते तत्प्रामाण्यस्य संशयास्पर्शात् न्यायनयेऽपि सविकल्प
केऽकबाधितादिदोषादुक्त एवेत्यनुव्यवसायेऽनुक्तं काश्चिदिति । अत्रेदं निर्गलितम् । स्वाश्रयाधिकरणरूपोत्तरत्वे तृतीय
रूपवत्त्वं संशयकोटितापर्याप्त्यधिकरणत्वमनुमेयमतस्साधारणो हेतुः तत्र न्यायनये प्रथमे रूपे घट इति ज्ञानं त
द्वस्वाश्रयः ततो ज्ञानत्वांशे निर्विकल्पकरूपो घटविषयत्वांशे च सविकल्पकरूपोऽनुव्यवसायः स एव धर्म्मिग्राह
कस्ततः स्मृतिः ततो घटविषयकं प्रमानवेति संशयः स च स्वाश्रयाधिकरणात्स्थितिरूपादुत्तरत्वे तृतीयरूपवत्त्वम् ।

भवति॰ गुरुमते घटज्ञानस्याश्रयः तदेव धर्म्मिज्ञानं॰ ततः कोटिस्मरणं॰ ततः पुनरपि स्मृतिरूपं धर्म्मिज्ञानं तद्
वपूर्वोत्पन्नकोटिस्मृतिसहितं संशयः स च स्वाश्रयाधिकरणाद्यक्षणादुत्तरतृतीयक्षणवर्त्ती भवति॰ तत्र च
दूषणं दत्तमपरमपि किंचिदुच्यते उन्मक्षणापेक्षया तृतीयक्षणोत्पत्त्यर्थे गुरुमते संशयः संभवतीति व्यभिचारः प्रा
माण्याप्रामाण्यकोटिस्मृतिकाले घटस्मृतेः संभवात्॰ न च विशिष्टज्ञानापत्तिर्घटत्वाभावघटयोरेकज्ञानविष
यत्वे स्यादित्युक्तमिति वाच्यं॰ स्वतंत्रयोर्द्धर्म्मधर्म्मिणोरेकज्ञानविषयत्वे परस्परानिरूपितधर्म्मत्वधर्म्मित्वाव
गाहनेन विशिष्टज्ञानस्याकारात्॰ उक्ते च तदभावात्॰ किं च स्वाश्रयाधिकरणक्षणोत्तरतृतीयक्षणवर्त्तिसं
शयविषयत्वे न्यायनयेप्यर्थे व्यभिचारात्॰ यत्र प्रामाण्याप्रामाण्यकोटिद्वयं घटज्ञानं घटं च विषयीकृत्य समूहाल
म्बनमुत्पन्नं तत्र तदग्रिमक्षणे प्रामाण्यसंशये तदग्रिमक्षणेऽर्थसंशये च बाधकाभावात् घटानुभवेन प्रामाण्य
प्रामाण्यकोट्योरुपनीतयोरवगाहनेन तदग्रिमक्षणे धर्म्मिज्ञाने तदग्रिमक्षणे प्रामाण्यसंशये तदग्रिमक्षणेऽ

र्थसंशयेचबाधकाभावात्·किंच·स्वाश्रयस्थितिरूपावधिकोत्तरत्तृतीयक्षणेप्रामाण्यसंशयःप्रामाण्य
स्ययावत्स्वाश्रयग्राह्यत्वेप्युपपन्नः·घटज्ञानेनप्रामाण्यावगाहनेपितस्यतृतीयक्षणेनाशाद्धत्वर्थरूपावच्छि
प्रामाण्यसंशयेबाधकाभावादिस्यप्रयोजकोहेतुः·किंचस्वाश्रयेविद्यमानेसंशयसामान्यसामग्रीत्वादि
हेतुरपिव्यभिचारी·अयंघटोनवेतिस्वारसिकसंशयस्यस्वाश्रयतयातमादायतदग्रिमक्षणोत्पन्नतादृ
शसंशयांतरमादाय·वाहेतोरर्थसत्त्वात्·नचनिश्चयरूपस्वाश्रयेसतीतिविवक्षितमतोनोक्तदोषइतिवा
च्यं·पुरुषांतरीयंस्वाश्रयमादायतथापिव्यभिचारात्·असिद्धिश्च·संशयसामान्यसामग्रीमात्रजन्यत्वेहिविशे
षकारणाजन्यत्वपर्यवसितंतच्चासंभवि·सर्वत्रकार्येविशेषकारणस्वीकारात्·अग्रिमत्वहेतुभेदापत्तेः·
स्वाश्रयेसतीतिविशेषणंविनैवाग्रिमोहेतुर्व्याख्यास्यतइतिचेत्·×नचप्रामाण्यसंशयरूपविशेषकारणाज
न्यत्वंतदर्थः·संशयसामान्यकारणजन्यत्वस्यैववैयर्थ्यात्·नचनतत्त्याज्यमेवेतिवाच्यं·×तथापिपुरुषांतरीयंस्वा

वि॰प॰म॰ यंवच्छिन्नधर्म्म्यादिकंस्वाश्रयमादायव्यभिचारस्यानुद्धरादिति॰ अत्रक्रमः॰ अगृहीताप्रामाण्यंसमानाधि
39 करणंनिश्चयरूपंयत्तद्वृत्तिप्रामाण्याश्रयोज्ञानंतदधिकरणवृत्त्यव्यवहितोत्तरवृत्तेतद्धर्म्मिणित
द्धर्म्मितावच्छेदकावच्छेदेनसंदेहकोटितापर्य्याप्त्यधिकरणत्वंहेतुः तद्धर्म्मिणितद्धर्म्मितावच्छेदकावच्छेदेन
यावत्सुपदवृत्तिप्रामाण्याश्रययज्ज्ञानेषुप्रकारोनेतिसाध्यम्॰ यद्वा॰ अगृहीताप्रामाण्यासमानाधिकरणानिश्च
यरूपायाज्ञानव्यक्तेस्तदधिकरणाव्यवहितोत्तरक्षणेतद्धर्म्मिणितद्धर्म्मितावच्छेदकावच्छेदेनसंशयकोटिता
पर्य्याप्त्यधिकरणत्वंहेतुः तद्धर्म्मिणितद्धर्म्मितावच्छेदकावच्छेदेनतस्यांज्ञानव्यक्तौप्रकारोनेतिसाध्यम्॰ ननुप्र
घमेकत्वेघटत्ववतिघटत्वप्रकारकत्वादीनांयत्रज्ञानेधर्म्मिणियदवच्छेदेनस्वाश्रयाधिकरणवृत्त्यव्यवहि
तोत्तरक्षणवर्त्तिसंशयकोटितापर्याप्त्यधिकरणत्वंतत्रतदवच्छेदेनयावत्सुपदवृत्तिप्रामाण्याश्रयज्ञानेषु
प्रकारत्वाभावस्यगुरुमतेपिसत्वात्॰ सिद्धसाधनमितिचेन्न॰ तत्रधर्म्मिणितदवच्छेदेनस्वाप्रकारकयावज्ज्ञाद

नवेतिसंदेहमादायतत्कोटिघटकेतत्रव्यभिचारात्पर्य्याप्तास्येकादशहेतुविशेषणानि॰रूपंगुणइतिनिश्चयो
त्तरंज्ञानंगुणोनवेतिसंशयमादायतत्रहेतुसत्वात्ज्ञानंगुणइतिज्ञानेस्वाश्रयेसंशयधर्म्मितासंशयधर्म्मिता
वच्छेदकावच्छेदेनप्रकारत्वाद्यव्यभिचारात्॰यथाश्रुतस्साध्येयावत्त्वेति॰स्वाप्रकारकयावच्छाद्दशस्वाश्रयकत्वे
साध्येतुपर्य्यवसितेरूपंगुणइतिनिश्चयोत्तरमिदंज्ञानंगुणोनवेतिसंशयमादायहेतुसत्वादिदंज्ञानंगुणइतिगृही
ताप्रामाण्यादिज्ञानप्रकारतयाव्यभिचाराच्छादशेति॰अगृहीताप्रामाण्यसमानाधिकरणनिश्चयात्मकाव्यवहितप्र
वृत्तक्षणवृत्तीत्यर्थः॥सिद्धसाधनवारणाययावदिति॰उद्देश्यसिद्ध्यर्थस्वाश्रयेतिज्ञानंप्रमेयवदितिनिर्णयोत्तरमिदंज्ञा
नंप्रमानवेतिसंशयकोटौप्रमात्वेव्यभिचारात्प्रकारइतिविशेषणचतुष्टयमितिसर्वंरमणीयम्•यथाश्रुतेशंकते
ननुघटमिति॰विशिष्टाभावेति॰ननुतादृशसंशयविशेष्यायावन्तःस्वाश्रयास्तावद्वृत्त्यत्यन्ताभावःसाध्यः॥यत्ज्ञानव्यक्त्य
धिकरणक्षणोत्तरतृतीयक्षणवृत्तिसंशयकोटित्वंप्रामाण्यसंशयविशेष्यतत्ज्ञानव्यक्तिग्राह्यत्वाभावोवाऽऽपेघट

वि॰प्र॰म॰

40

ज्ञानात्मकाः प्रामाण्यसंशयविशेष्यायावन्तोऽन्ये स्वाश्रयास्तावज्ज्ञातत्वं घटत्वेऽस्त्येवेति कथं तत्स्वभावरूपं साध्यं
अन्ये प्रामाण्यसंशयविशेष्यत्वं तत्त्वान्यत्वेनास्तीति विशिष्टाप्रसिद्ध्या कथं विशिष्टाभाव इति चेत्. उच्यते.
प्रामाण्यसंशयविशेष्यत्वस्य ग्राहकत्वोभयाभाववत्त्वव्यक्तिकत्वमिह साध्यं स्वपदं च यत्तायत्र साध्ये योज्यते
तत्परं. विशिष्टाभावत्वादेन वोभयाभाव एव विवक्षित इति. संभवतीत्यनन्तरं येन तदनुरोधेन प्रामाण्यसं
शयस्तत्त्वस्यादिति शेषः. नाप्यनुभवसिद्धस्तत्र घटज्ञाने प्रामाण्यसंशय इति दिगर्थः. यथाश्रुत एव शंकते. न
नुरूपमिति. यद्यपीदं माशंकितमायं तथाप्यधिकाशंकार्थमुत्थापितम्. अप्रामाण्येति. यथाश्रुतहेतुत्वनिरा
येणञ्चापे विवरणीयस्य स्वरूपायोग्यत्वघटितहेतोः प्रकृतेऽभावात्. इदमुपलक्षणं तादृशाप्रामाण्यसंशय
विशेष्यत्वस्य ग्राहकत्वोभयाभाववत्त्वानव्यक्तिकत्वं साध्यमिति भावः. गुणत्वप्रामाण्ययोरिति. तथा चोभयोः
सत्त्वान्नोभयाभाव इति भावः. तस्यापि. रूपस्यापि. तृतीयक्षणवर्त्तिसंशयविशेष्य इति. स्वाश्रययावत्त्वाप्यधिक

शास्त्याश्रयकत्वस्य साध्यत्वात्॥ यावत्स्वाश्रयाप्रकारत्वस्य वार्याध्याशात्तद्वितीयकल्पेपि यस्मिन् धर्म्मिणि यदवच्छेदेन
यत्स्वाश्रयव्यक्तिप्रकारत्वं संभावितं तस्मिन् तदवच्छेदेन तत्प्रकारत्वनिषेधेऽर्थाद्यावत्स्वाश्रयाप्रकारत्वलाभादिति॥
मूले नं तृतीयत्वमुक्ताव्यवधानपरमेव॥ अव्यवधानमात्रस्येति सोदलोपाध्यायवचनमप्युक्ताव्यवधानपरमेव॥ अत्र
च तस्मिन् धर्म्मिणि तदवच्छेदेन यावतां स्वाश्रयाणां स्वप्रकारकत्वेन तस्मिन् धर्म्मिणि तदवच्छेदेन तस्यां ज्ञानव्यक्तौ स्वस्य
प्रकारत्वे वा हेतुत्वसंभवः सति प्रतिबंधके कार्य्यानुत्पत्तेरिति विपरीतबाधकस्तर्कः सुदृढः॥ न चाग्रिमहेतुत्वभेदः तत्र स्वा
श्रये विद्यमाने सति तस्याप्रवेशात् प्रवेशोप्यत्र स्वाश्रयोत्तरतायाः प्रवेशात्तत्राप्रामाण्यसंशयानन्यत्वस्य संशयवि
शेषणत्वादिहागृहीताप्रामाण्यत्वस्य स्वाश्रयविशेषणत्वात्॥ अत्र रूपं गुण इदं च ज्ञानं प्रमा न वेति समूहालंबनात्मक
स्वाश्रयाधिकरणक्षणाव्यवहितोत्तरक्षणे रूपं गुणो न वेति संशयमादाय गुणत्वे व्यभिचारादगृहीताप्रामाण्येति॥ रू
पं गुण इति देवदत्तीयनिश्चयाधिकरणक्षणाव्यवहितोत्तरक्षणे तादृशं यज्ञदत्तस्य संशयमादाय तत्र व्यभिचारात् सामा

नाधिकरणेति· तादृशसंशयात्मकस्याश्रयाधिकरणक्षणाव्यवहितोत्तरक्षणे तादृशसंशयमादाय तत्र व्यभिचा
रान्निश्चयपरूपमिति· घटनिश्चयाधिकरणक्षणाव्यवहितोत्तरक्षक्षणे तादृशसंशयमादाय तत्र व्यभिचारात्तप
दार्थतत्प्रामाण्याश्रयेति· अयं गुण इति निश्चयाधिकरणक्षणाव्यवहितोत्तरक्षणे तादृशसंशयमादाय तत्र व्यभि
चाराद्व्यवहितेति· गुरूपं गुण इति निश्चयाधिकरणक्षणाव्यवहितपूर्वक्षणे तादृशसंशयमादाय तत्र व्यभिचारा
दुत्तरेति· रूपं गुण इति· निश्चयाधिकरणक्षणाव्यवहितोत्तरक्षणे ज्ञानं गुणो न वेति संशयमादाय तत्र व्यभिचारा
त्तद्धर्म्मिणीति· नीलो गुण इति निश्चयाधिकरणक्षणाव्यवहितोत्तरक्षणे नीले धर्म्मिणि तादृशसंशयमादाय तत्र
व्यभिचारात्तद्धर्म्मितावच्छेदकावच्छेदेनेति· रूपं गुण इति निश्चयाधिकरणक्षणाव्यवहितोत्तरक्षणे रूपं गुण इति नि
श्चये कोटित्वधर्म्मितावच्छेदकान्यप्रकारत्वात्मकमादाय तत्र व्यभिचारात्संशयेति· रूपं गुण इति निश्चयोत्तरं रूपं
गुणो वायुवृत्तिर्न वेति संशयमादाय धर्म्मितावच्छेदके तत्र व्यभिचारात्कोटिनेति· रूपं गुण निश्चयोत्तरं ज्ञानं प्रमा

ग्रणक्षणोत्तरतृतीयक्षणवर्त्तिसंशयकोटित्वं तद्व्यक्त्यधिकरणक्षणोत्तरतृतीयक्षणवर्त्तिप्रामाण्याप्रामाण्य
कोटिकसंशयविशेष्ये तया व्यक्त्यानग्रस्तत इति साध्यसत्त्वादित्यर्थः· देवदत्तज्ञानं प्रमा गुणश्चेति निश्चये तृती
यक्षणे प्रमात्वगुणत्वसंशये तदुत्तरक्षणे देवदत्तज्ञाने प्रमात्वसंशये गुणत्वे व्यभिचारात् तद्व्यक्त्यधिकरणक्ष
णोत्तरीयक्षणवर्त्तीत्युक्तम्· रूपं वायुवृत्ति न वेत्यादिसंशयमादाय दोषतादवस्थ्यात् प्रामाण्याप्रामाण्येत्युक्तं·
सर्वं ज्ञानं गुण इत्याकारकेण स्वाश्रयेण तृतीयक्षणवर्त्तिप्रामाण्यसंशयविशेष्ये स्वस्मिन्गुणत्वग्रहणान्तर्य
त्युक्तम्· विवक्षितेति· स्वाश्रयव्यक्त्यधिकरणक्षणोत्तरतृतीयक्षणवर्त्तिसंशयकोटित्वं तया व्यक्त्या तद
प्रामाण्यसंशयविशेष्ये ज्ञानेऽर्थस्य घटत्वादेरग्रहणादिति भावः· इदमुपलक्षणं व्यभिचारोऽपि द्रष्टव्यः सर्व
ज्ञानं गुण इति ज्ञाने इदं ज्ञानं प्रमाणं वा रूपं गुणो न वेति समूहालंबनसंशयविषये गुणत्वे साध्यासत्त्वादिति· न
नु हेतूक्तसंशयविशेष्यं न स्वाश्रयग्राह्यमिति साध्यमभिप्रेतम्· न च संशयान्तरमपि हेतुः कदाचित्कियत

वि·प्र·म· वेतिवाच्यम्·समभिव्याहारात्·प्रकृतहेतोरेव हेतुपदेनलाभात्तथाच तृतीयेत्यादिहेतुविशेषणं सार्थकमि
त्याशंक्यनिराचष्टे·नवेति·हेतोः प्रकृतहेतोः·स्वपदेति·स्वस्यहेतोःपदं स्वपदं हेतुपदमितियावत्·एवम
42 ग्रिमस्वपदयोरपि·यत्तु·स्वविशेष्येनस्वाश्रयस्याप्यमितिसाध्यमभिप्रेतम्·तच्चहेतुप्रविष्टसंशयएवस्वप
देनोक्तइति व्याख्यानं·तन्न·तृतीयेत्यादिहेतुविशेषणंविनापिपक्षतावच्छेदकतादृशासंशयस्यस्वपदेन
लाभात्संभवेशंकयाअनुक्तिसंभवत्वादिति·स्वपदेति·इदमुपलक्षणं·सर्वज्ञानंगुणइत्यादिनोक्तोगुणत्वेव्य
भिचारोपिद्रष्टव्यः·अत्रक्रम इति·ननुज्ञानंप्रमानवेतिसंशयानंतरंरूपंगुणोनवेतिस्वाश्रयानिवर्त्तनीय
संशयस्यविशेष्यमेवरूपमितिकथंव्यभिचारनिरासः·नचस्वाश्रयोत्पत्तिक्षणोत्तरतृतीयक्षणवर्त्तिस्वाश्रया
निवर्त्तनीयसंशयोविवक्षणीयइतिवाच्यं·ज्ञानंगुणइतिनिश्चयानन्तरंतृतीयक्षणेरूपंगुणोनवाइदंज्ञा
नंप्रमानवेतिसमूहालंबनसंशयेतादृशास्वाश्रयानिवर्त्तनीयप्रमात्वसंशयविशेष्यज्ञानेगुणत्वस्यस्वाश्र

येणावगाहनाद्व्यभिचारानिरासादिति॰ अत्र ब्रूमः॰ स्वाश्रयानिवर्त्तनीयसंशयविशेष्य इति विशेषणं दत्
तो हेतुनिविष्टसंशयस्य स्वाश्रयानिवर्त्तनीयत्वं विवक्षितं॰ तथा चागृहीताप्रामाण्यस्वाश्रयोत्पत्तिक्षणोत्तर
तृतीयक्षणवर्त्तिस्वाश्रयानिवर्त्तनीयसंशयकोटित्वं हेतुः॰ नतु साध्ये विशेषणमिदं॰ तथा च यः स्वाश्रयानिव
र्त्तनीयः स न तृतीयक्षणवर्त्ती यस्तृतीयक्षणवर्त्ती स तस्मिन्नंशे न स्वाश्रयानिवर्त्तनीय इति प्रामाण्यसंशया
हितस्य स्वारसिकस्य चार्पसंशयस्य वारणेन व्यभिचारः॰ रूपं गुण इदं वा ज्ञानं प्रमा न वेति समूहालंबने सति अ
प्रामाण्यसंशयाहिततृतीयक्षणवर्त्तिसंशयकोटौ गुणत्वे व्यभिचारादगृहीताप्रामाण्येति स्वाश्रयविशेषणं॰
धर्म्मिभेदात्॰ धर्म्मितावच्छेदकभेदात्॰ स्वाश्रयस्य व्यधिकरणत्वात् संशयस्य संशयरूपत्वात्॰ तृतीयक्षण
संशयमादाय गुणत्वे व्यभिचारात् स्वाश्रयानिवर्त्तनीयेति संशयविशेषणं॰ धर्म्मितावच्छेदके व्यभिचारात् को
टित्वमुक्तम्॰ अप्रामाण्यसंशयाजन्यस्वाश्रयानिवर्त्तनीयसंशयकोटित्वं वा हेतुः॰ प्रकृत न प्रामाण्यविशेषिसं

शय इत्यसंशयस्वरूपायोग्यत्वं वा हेतुरतो न गुणत्वादौ व्यभिचारः। साध्यं चात्र यावत्स्वाश्रयाग्राह्यत्वं। वस्तु
तस्तु सर्वज्ञानमभिधेयवदिति वाक्यज्ञाने सति तृतीयक्षणवह्निसंशयकोटौ तत्प्रमात्वे व्यभिचाराद्यावत्स्वाश्र
याप्रकारत्वं तज्ज्ञानव्यक्त्यप्रकारत्वं वा साध्यं। यद्वा हेतुनिविष्टसंशय एव स्वाश्रयानिवर्त्तनीयसंशयशब्देन वि
वक्षितः स्वाश्रयाधिकरणक्षणाव्यवहितोत्तरक्षणे जायमानस्य तस्य स्वाश्रयानिवर्त्तनीयत्वात्। द्वयोरेव संश
ययोः स्वाश्रयानिवर्त्तनीयत्वकथनं तूपलक्षणं। तथा चागृहीताप्रामाण्यसमानाधिकरणनिश्चयरूपयत्स्वाश्र
यव्यक्त्यानप्रकाराश्रितयत इति साध्यविशेषणमहिम्नैव व्यभिचारनिरास इति। इदं च प्रकारद्वयं पूर्वोक्तापर्यव
सितमेवास्मान्निरूक्तमिति संक्षेपः। हेतौ तृतीयक्षणवह्निविशेषणान्तरमाह। तथा चेति। केचित्तु। द्विमात्रको
टिकत्वं हेतुनिविष्टसंशये विशेषणमाहुः। तेषामिदं तात्पर्यं। यज्ज्ञानीयव्यक्त्युत्पत्तिक्षणोत्तरतृतीयक्षणवह्नि
द्विमात्रकोटिकसंशयकोटित्वं यस्य तस्य तज्ज्ञानव्यक्त्युत्पत्तिक्षणोत्तरतृतीयक्षणवह्निप्रामाण्यसंशयविशेष्य

प्राचीन

त्वस्य यादृशकत्वोन्नयाभाववन्नव्यक्तिकत्वमिति। तन्न। प्रमात्वगुणत्वयोर्विरोधे ज्ञानतो ज्ञानं प्रमा गुणो वेति सं
शयमादाय गुणत्वे व्यभिचारात्। किंवायं घटः घटज्ञानं वा प्रमेति समूहालंबनोत्तरतृतीयक्षणेऽयं घट इत्यं
शे प्रमा न वेति संशयमादाय प्रमात्वे हेतुरस्तिन तत्र यावद्भाववन्नव्यक्तिकत्वमिति व्यभिचारः न च यदवच्छेदेन
तादृशसंशयकोटित्वं तदवच्छेदेन यावद्भाववन्नव्यक्तिकत्वं साध्यमिति वाच्यं। द्विमात्रकोटिकत्ववैयर्थ्यापत्तेः
किंच यत्र गुणज्ञाने द्वितीयक्षण एव प्रमात्वसंशयात् तृतीयक्षणे गुणत्वे संशयस्तत्र। यत्र रूपं गुण इति ज्ञाने पुरुषा
न्तरस्य तृतीयक्षणे प्रामाण्यसंदेहस्तत्र ज्ञानं गुणो न वेति संशयमादाय गुणत्वे व्यभिचारतादवस्थ्यमिति चेत्
विस्तरेण। स्वाश्रये सतीति पूर्वहेतुतानुषंगः। तत्र च स्वाश्रयशब्देन समानाधिकरणनिश्चयरूपस्वाश्रयविव
क्षा न तस्य समानाधिकरणनिश्चयरूपस्वाश्रयाव्यवहितपूर्वक्षणवर्त्तिनि तस्मिन् धर्मिणि तदवच्छेदेनाप्रामा
ण्यसंशयाजनकसंशयकोटित्वं हेतुं स्फुरत्वादुपेक्ष्यानुषंगं विनैव व्याख्यातुमारभते यद्यपीति। तथापीत्यादेर

यं निर्गलितार्थः घटत्ववति घटत्वप्रकारकत्वं घटत्ववति घटत्वप्रकारकत्वाश्रययावज्ज्ञानत्वं न· घटत्ववति घट
त्वप्रकारकत्वविरोधिसंशयजन्यसंशयस्वरूपायोग्यत्वात्· तथा च प्रामाण्याभाववति प्रामाण्यप्रकारकत्वं
प्रामाण्यवति प्रामाण्यप्रकारकत्वाभावरूपं च यत्प्रामाण्यविरोधिद्वयं तत्संशयाहितसंशयविषयत्वेऽपि पक्षे
न हेतुसिद्धिः· स्वसंशयस्येति· स्वविरोधिसंशयस्येत्यर्थः· यथा पुनरारोपसंशये विशेषणज्ञानत्वादिना पूर्वस्या
प्रामाण्यसंशयस्य जनकत्वमस्त्येवेत्यसिद्धिता वेदे स्थैर्ये तथाप्यप्रामाण्यसंशयत्वेन रूपेण जन्यत्वस्य विवक्षि
तत्वात् प्रकृते च तदभावान्न दोषः· इदं च निश्चितार्थगोचरसंशयं प्रत्यप्रामाण्यसंशयस्य तत्त्वेन कारणतामलं
ब्योक्तमन्यथाऽप्रामाण्यसंशयस्योत्तेजकतया कारणत्वाभावादिति ध्येयम्· विरहोऽप्रसिद्धिः· तत्सानेति· धर्म्यन्त
र विशेष्यक घटत्वादिज्ञाने ऽप्रामाण्यसंशयस्याप्रसिद्धेरित्यर्थः· न च धर्म्मिविशेषावच्छेदेन तादृशसंशयवि
षयत्वाभावेऽपि तादृशसंशयविषयत्वसामान्याभावस्य हेतोर्घटत्वादावसत्वात्स्वरूपायोग्यत्वधावनं व्यर्थमिति

वाच्यं॰ सामान्याभावत्वावच्छिन्नार्थमेव तद्भावनादिति॰ न चैकपुरुषमात्रप्रतीतवस्तुगोचरज्ञाने प्रामाण्यसंशयस्यै
वमप्यप्रसिद्धिरिति वाच्यं॰ तत्प्रामाण्यस्यापदरूत्वादिति भावः॰ एवमिति॰ अप्रामाण्यसंशयजन्यसंशयस्य स्व
रूपायोग्यत्वस्य हेतुत्वे इत्यर्थः॰ तस्य सकलप्रामाण्यनिष्ठत्वेनागासिद्ध्यभावादिति भावः॰ वस्तुत इति॰ इदं चा
पाततः॰ सकलप्रामाण्यसंशयाविषयीभूतप्रामाण्यविशेषवक्ष्यमाणद्वितीयबाधस्यैव नागासिद्धिसंभ
वादिति ध्येयम्॰ बाधेति॰ सर्वत्ववति सर्वत्वप्रकारकत्वांशे ताबाध इत्यर्थः॰ इदं च यावत्स्वाश्रयग्राह्यत्वे यथाश्रु
तसाध्ये सर्वत्ववतीत्यादिप्रामाण्येपि सर्वशब्दरूढज्ञानाप्रकारे यावत्स्वाश्रयाप्रकारत्वस्य विवक्षितसाध्यसत्त्वादि
ति॰ वस्तुतस्तु अयं घट एतद्रूपवान् इदं च ज्ञानं प्रमेति एकपुरुषमात्रप्रतीतो एतद्द्वयवतीत्यादि यत्प्रामा
ण्यं तदीश्वरयोगितत्पुरुषज्ञानेषु यावत्स्वस्वाश्रयेषु प्रकार इति तत्त्वांशे ताबाधो ज्ञेयः॰ विप्रतिपन्नवस्तु
कसंशयात्ः साधनमपि तच्चैव ज्ञेयम्॰ विशिष्टाभावेति॰ तृतीयदलवह्निसंशयविषयत्वेप्रमाण्यविशेषणे दन्ते

तदाश्रयस्य स्वाश्रयतया स्वाश्रयत्वरूपविशेषणाभावाद्विशिष्टाभावोपपत्तिरित्यर्थः॰ विशिष्टाभावश्च तत्स्वाश्रयव्यक्त्या
वधिकतृतीयरूपावच्छिन्नसंशयसमानाधिकरणत्वं तत्संशयकोटिप्रामाण्याश्रयत्वस्वग्राहकत्वानां त्रयाणामभावः॰ ननु
पूर्ववदुक्तयाभावोऽप्रसिद्धेरिति ध्येयम्॰ तथा च साध्यविशेषणमेव तन्न उपदविशेषणमिति भावः॰ अत एवेति॰ साध्य
विशेषणत्वस्यैवाभिप्रेतत्वादित्यर्थः॰ विशिष्टे तृतीयरूपावच्छिन्नसंशयविषयत्वेन व्यावर्त्तितपदे॰ भावरूपस्य साध्यस्यो
पपन्नये इत्यर्थ इति कश्चित्॰ तन्न॰ अत एवेत्यादेरसंगतत्वापातात्॰ तदिति॰ अप्रामाण्यवदिति मूलं॰ पक्षे न तत्प्रामाण्य
विरोधिकोटिवदित्यर्थः॰ गुरुमतं निराकृत्य चिंतयसाधारिणीं तृतीयां विप्रतिपत्तिमधिकृत्य स्वतोग्राह्यत्वं निराकर्त्तुं
नयावदिति मूलं॰ तच्च ज्ञानपदादिना प्रामाण्यग्रहणात् सिद्धसाधनमस्तमित्यत आह॰ विप्रतिपन्नो यद्येति॰ स विषय
यकज्ञानग्राहकघटितमित्यर्थः॰ यच्चाप्रामाण्यग्राहकमवतरति तत्तान् प्रामाण्यं न पक्ष इति भावः॰ स्वाश्रयनिश्च
य इति मूलं॰ स विषयकस्वाश्रयग्राहकोऽगृहीताप्रामाण्यसमानाधिकरणो यः स्वाश्रयनिश्चयः तद्धर्मिणि तद्धर्मि

तावच्छेदकावच्छेदेनसंदिह्यमानत्वादित्यर्थः॰षष्ठींविप्रतिपत्तिमधिकृत्यअनभ्यासेत्यादिमूलं॰एतत्पदार्थप
रिचयार्थमेवानभ्यासेत्यादिनतुव्यावर्त्तनार्थं॰एतत्पदेनैवघटज्ञानादिरूपविशेषलाभादित्यवधेयम्॰घटज्ञानं
प्रमेत्युत्तरकालीननिश्चयविषयतयाबाधइतिमूलेपूर्वकालीनेतिविशेषणम्॰तत्राव्यवहितपूर्वकालीननिश्च
यविषयतयादोषतादवस्थ्यापातः॰तृतीयक्षणइति॰संज्ञायाव्यवहितपूर्वकालइत्यर्थः॰एवमपिपुरुषान्तरीयनिश्च
यविषयतयाप्रामाण्यसंशयाक्रान्तस्वीयनिश्चयविषयतयाचबाधात्समानाधिकरणत्वमप्रामाण्यसंशयाना
क्रान्तत्वंचसाध्यगतंनिश्चयेविशेषणंज्ञेयम्॰तदयंनिर्गलितार्थः॰तद्धर्म्मिकतद्धर्म्मितावच्छेदकतत्संशयकोटित्वं
हेतुः॰तस्मिन्धर्म्मिणितदवच्छेदेनतत्संशयाव्यवहितपूर्वकालेसमानाधिकरणस्याप्रामाण्यसंशयानाक्रान्त
स्यकस्यापिनिश्चयस्यप्रकारोनेतिसाध्यम्॰यद्वा॰अप्रामाण्याग्राहकसविषयकज्ञानग्राहकयावत्घटज्ञाननि
श्चयेषुप्रकारोनेतिसाध्यंसमानाधिकरणाप्रामाण्यसंशयाप्रकारत्वादितिहेतुः॰एतत्पक्षमधिकृत्यैवनिश्चयानं

वि·प्र·म·

तरमितिमूले विशेषणम्। तत्र व्यवहितसंशयप्रकारे घटज्ञाननिश्चयविषये व्यभिचारादाह द्वितीयदूषण इति।
अव्यवहितोत्तरदूषण इत्यर्थः। वस्तुतो धर्म्मिभेदादिकमादाय यत्र संशयो नास्ति तादृशनिश्चयविशेष एव तत्प
दे न विवक्षितः तथा च घटत्ववति घटत्वप्रकारकत्वं निश्चयविशेषविषयः। निश्चयविशेषाव्यवहितोत्तरकालसमा
नाधिकरणसंशयकोटित्वादिति विशिष्येवानुमानमतो न विशेषणबाहुल्यगौरवमिति। मूले प्रामाण्यमात्रेति। प्रामा
ण्यसामान्येत्यर्थः। मूले बाध इति। प्रामाण्यस्य यथावज्ञाघत्वस्य क्वचिदप्यप्रसिद्ध्या तदभावाप्रसिद्धेरनुपपत्तिरित्यर्थः।
मूले समव्याप्तेनेति। पक्षीकृतप्रामाण्येत्यर्थः। ननु तत्त्वं परत्वं तदः परोक्षवाचित्वात्। एतत्त्वं स्वत्वं। एतदः समीपतरवा
चित्वात्। अत एव तदन्यत्वं स्वत्वमेव तदन्यत्वं परत्वमिति वास्त्वित्यत आह। मूले तदिति। टिप्पण्यां च तत्त्वं परत्वं तदन्य
त्वं स्वत्वमित्यन्वयः। अन्यथाऽशुक्तिसंभवादिति। मूलेऽन्यथाग्राह्यत्वमित्यस्य विवरणं परतोग्राह्यत्वमिति। इत्यस्वरस
इति। व्यावर्त्याभावेन वैयर्थ्यमित्यप्यस्वरसो द्रष्टव्यः। अत्र केचित्संशयस्थले ज्ञानग्राहकेण प्रमात्वस्याग्रहेपि

नस्वतस्त्वहानिः यथाऽप्रमात्वारोपस्थलेऽप्रमात्वाग्रहो दोषादिति मीमांसकैरुपेतं तथा संशयस्थलेऽपि दोषादे
वाप्रमात्वाग्रह इत्युपेयम्। अत एवाप्रामाण्यग्रहजनकदोषासमवहितत्वरूपमप्रामाण्याग्राहकत्वं सामान्
तएव स्वतस्त्वे निवेशितं न तु विशिष्याप्रामाण्यानिश्चायकत्वमिति॰ न च संशयस्थले दोष एव दुर्वच इति वाच्यम्॰
न्नमस्येव संशयस्यापि दोषजत्वेन फलबलेन कस्यचिद्दोषस्य कल्पनात्। तस्मान्न स्वतस्त्वे संशयानुपपत्तिः। नापि
ग्राहकाभावादेवाप्रमात्वाग्रहो मनसो बहिरस्वातंत्र्यादिति वाच्यं॰। उपनयसहकारेण बहिः प्रवृत्तो मनसः
पारतंत्र्याविरोधात्॰ मनसा चैवमित्यादौ स्वयमेव तथाभिधानादिति॰ अत्रोच्यते॰ सविषयके ज्ञाने प्रकारान्तरा
नुपस्थितविषयसत्ताकेनासमाने विषयवैशिष्ट्यांशे सत्ता निश्चयो न संभवतीत्यन्वयव्यतिरेकाभ्यामवधारि
तं॰ तथाहि घटविषयकज्ञानवानयं देवदत्तो घटाभिलापवत्त्वादित्यनुमाय घटार्थी निष्कंपेन प्रवर्त्तते तत्रै
व च घटविषयकप्रमावानित्यनुमाय निःकंपं प्रवर्त्तते॰ तत्र प्रमात्वस्य विषयसत्ताघटितस्य प्रकारान्तरोप

वि·प्र·म· स्थितत्वात्· सत्तानिश्चयाभावस्य ज्ञानविशेषणत्वावच्छेदेन विवक्षितः· तेन स्फुरत्तिवंदनं स्फुरत्तिविषय
कं च ज्ञानमित्यादौ न व्यभिचार इति ध्येयम्· अतएवत्राद्यखंडे स्मारितपदार्थसंसर्गज्ञानपूर्वकालीनसा
57 ध्ये विषयसत्तानिश्चयो न स्यादित्याशंक्य ज्ञानपदं प्रमापरतया व्याख्यायते· तदिह पुरोवर्त्तिनि घटत्वादिवै
शिष्ट्यसत्तायाः प्रकारान्तरेण निश्चये ज्ञानविषयतया च तत्स्फूर्त्तौ कथं निश्चयः स्यादिति प्रामाण्यनिश्चाय
कसामग्र्यभावादेव प्रामाण्यस्य स्वतस्त्वाभावः· सत्तानिश्चयत्वं च स्वरूपसंबंधविशेष उत्तरकालीनसंशय
घभावकल्प्य इति सर्वजनीनम्· स च संबंधविशेषो यथा प्रामाण्यसंदेहस्थले संशयान्यथानुपपत्त्या नास्ति·
तथा संदेहाभावस्थलेपि नास्ति· सत्तानिश्चयत्वाभावनियामकस्योक्तस्य तुल्यत्वादिति प्रतिपादयितुं संशयानुप
पत्तिप्रदर्शनं· आलोकवृत्तस्तु· घटत्ववद्विशेष्यकत्वं मनसा गृहीतुं न शक्यते· घटनिष्ठस्य विशेष्यत्वस्य ज्ञा
नानुपनीतस्य मनसा ग्रहणे सामग्र्यभावादिति वदन्ति· तन्न· एवं सति घटत्वप्रकारकत्वमपि कथं [illegible]·

सामान्यरूपेण वह्निर्विशेष्यावृत्तिप्रकारानवछिन्नज्ञानविषय इत्यन्वयिना साध्यसिद्धाविदं वह्निज्ञानं
प्रमेति व्यतिरेकिणि न साध्याप्रसिद्धिरित्यर्थः॰ ननश्चेति स्वरसान्॰ अन्वयिनो विशेषविषयत्वस्यैकान्त
तैव वक्ष्यमाणत्वात्॰ उक्तेति॰ साधनसाध्याधिकरणस्य विशिष्योपस्थितिर्व्याप्तिग्रहे तं चेत् तदभावात् संदे
हरूपव्यभिचारज्ञानाच्च न व्याप्तिग्रह इति भावः॰ विशिष्याधिकरणोपस्थितिर्नास्ति तं चेत् साध्याभावांशे संदे
हरूपं व्यभिचारज्ञानं च न प्रतिबंधकमित्याह॰ निश्चितेति॰ असदेव वैशिष्ट्यं भ्रमविषय इति मतेन व्यभि
चारमाशंक्य निराकरोति॰ न चेति॰ ज्ञेयत्वेन गृहीते प्रमाविषयत्वाभावस्तावन्न गृह्यते शंक्यते यावत्तस्मिन्
प्रमाविषयत्वं न गृह्यत इत्याशयेन व्यभिचारज्ञानाभावमाह॰ तादृशेति॰ एतादृशज्ञानियमस्य प्रामाणिक
त्वात् सदेव भ्रमविषय इति नवीनमतमनुसृत्याह॰ अलीकस्येति॰ यथा चैतन्न तथान्यथाख्यातिशेषे उपपाद
यिष्यते॰ असद्वैशिष्ट्यभानवादिनोऽपि संसर्गमर्यादयैव तद्भानं न तु विधिनिषेधाधिकरणतया तथा च तन्मतानु

५६ त्यन्वयिनेति शेषः। अत्र वदन्ति। वह्निर्विशेष्यावृत्तिप्रकारतानवच्छिन्नज्ञानविषय इत्यन्वयिना कथं वह्न्यवृत्तिप्रकारतानवच्छिन्नज्ञानविष
य×

वि॰ प्र॰ म॰

पगमेपि न व्यभिचारधीरित्यभिप्रायेणाप्युपपत्त्याह। वस्तुतस्त्विति। विरुद्धव्याप्त्युपनायकत्वादिति। साध्यवि
रोधिप्रतियोगिकव्याप्त्युपस्थापकत्वादित्यर्थः। संदेहे तूपलक्षणं। विरोधिव्याप्तिद्वयनिश्चायकसामग्रीसमाना
दसाधारणस्य व्याप्तिनिश्चयप्रतिबंधकतया दोषत्वपक्षेपि तुल्यबलत्वाभावे दोषत्वं नास्तीति दृष्टव्यं। आग्र
यमविदुषः शंकां निषेधति। मूले नचेति। आचार्यं प्रकटयति। मूले वह्निज्ञानस्येति। वह्निर्विशेष्यावृत्तिप्रकारता
नवच्छिन्नज्ञानविषयत्वं विषयीकर्त्तव्यं। अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमात् वह्न्यवृत्तिप्रकारता
नवच्छिन्नज्ञानस्यापि विशेष्यावृत्तीत्यादिव्यापकतावच्छेदकाक्रान्ततया तादृशविषयकतानियमस्यानुमितेः
संगतमेवेदमिति चेत्। न तथापि वस्तुगत्या वह्न्यवृत्तिप्रकारतानवच्छिन्नं ज्ञानं विषयः स्यान्न तु वह्न्यवृत्तिप्रकारता
नवच्छिन्नत्वं तद्धर्मः। न च पक्षधर्म्मताबलेन तद्विषयत्वमुक्तमेवेति वाच्यं। यद्विषयीकरणमन्तरेणानुमितिर्नो
त्पद्यते तस्यैव पक्षधर्म्मताबललभ्यत्वात् अन्यथातिप्रसंगात् धर्म्मताबललभ्यस्याप्रकारतया तत्प्रकारसाध्य

प्रसिद्ध्यभावेन व्यतिरेकिण्यनुपयोगाच्चेति । मैवम् । उपनीतभानमादाय विशेष्यावृत्तिप्रकारानवच्छिन्नभा
नविषयो वह्निरित्यनुमितेर्विशेष्ये वह्नित्वप्रकारकत्वसंभवात् । एकदेशिनोऽनुमितावुपनीतभानाभ्युप
गमरूपभावात् । न चाग्निमव्यतिरेकिवैयर्थ्यं ज्ञानविशेषस्य वह्न्यवृत्तिप्रकारानवच्छिन्नत्वसिद्ध्यर्थं तदाह एतं
विनानिष्टं पप्रवृत्त्यनुत्पत्तेः इदमतिप्रसिद्धैवचरीकायामुक्तं इदं वह्निज्ञानमिति । प्रकारार्थं तद्वत्तारादिति वज्ञान
विशेषविशेष्यकप्रकारार्थसि । त्यर्थः । ननु प्रामाण्यमिति । अत्र व्याख्याने ऽज्ञानाच्चेति मूले ऽज्ञानादज्ञापकत्वादित्यर्थः
वकारस्य प्रामाण्यनिषेधकवाक्ये कर्तव्ये इत्यनन्तरं योजना । यद्वा । मास्तु स्वार्थानुमाने इयं गतिः परार्थानुमाने तु स्या
देवेत्याशंक्याह । मूले प्रमाणमिति । प्रामाण्यज्ञानरहितस्य परस्य निषेधकवाक्ये कर्तव्ये व्याघातात्मकवाक्यविषयस्या
भावस्याज्ञानादित्यर्थः । वाक्यद्वयोरपि प्रामाण्याभावस्याज्ञानादिति यावत् । तथा च नाभावज्ञाने न प्रतियोगिज्ञानापे
नुमानमिति भावः । समुच्चयार्थतामेव विवृणोति । न परप्रतिषेधेनेति । यदि च शाब्दविधयैव परकीयं स्वकीयं च वाक्यं प्र

चिं॰प्र॰म॰

५१

र्थज्ञातमेवप्रामाण्यं अभावप्रतियोगितया बोधयेदिति पक्षस्तदान्यस्याज्ञातप्रामाण्यस्यालिंगायंविना
ताद्दृशशब्दोच्चारणानियमादसार्वत्रिकत्वमेव दूषणं द्रष्टव्यं॰ एतच्च सर्वमुपलक्षणं परकीयवाक्यस्थोत्राप्रमा
त्वेनप्रतियोगित्वेन वाप्रमाऽनुमेयानाद्योऽप्रसिद्धेः न द्वितीयः प्रमात्वप्रकारकव्यतिरेकिण्यनुपयोगादित्य
पि दूषणं द्रष्टव्यं॰ विषयादीति॰ विषयविशेषादीत्यर्थः॰ मूले सर्वनाममहिम्नेति दृष्टान्तार्थं॰ तथाच यथाशा
ब्दबोधः सर्वनाममहिम्ना विशेषपर्यवस्यति तथेत्यर्थः॰ यद्वा॰ पक्षधर्म्मतया विशेषबोधनसामर्थ्यं सर्वनामम
हिम्नपदेनोक्तम् अन्यथानुमितौ तदनुपयोगादिति॰ प्राघ्नवीयेत्युपलक्षणम्॰ देवदत्तत्ववति देवदत्तत्वप्रकार
कत्वादिप्रामाण्यस्थले प्राचीनसंस्कारो नास्तीत्यपि बोध्यं॰ संचारयन्निति॰ तथाच विषयविशेषसंचारस्यस्व
कर्तृकत्वात्तवयमिति निर्देशः इति भावः॥ प्रामाण्यानुमानेन॰ अप्रामाण्याभावानुमानेन॰ ननु मास्तु प्रवृत्ति
प्रतिबंधकोऽप्रामाण्यतदभावकोटिकसंशयः पक्षताघटकास्तु स्यादेव॰ तथाच पक्षतानुरोधेन पुनः संशयास्युप

गमे जन्मान्तरीयसंस्कारापेक्षैवागतेस्य तत्राह । नचेति । ननु पक्षताविरहात्कथमनुमित्यभावः तस्या अ
नुमितिप्रत्यजनकत्वादित्यत आह । पक्षताहेतुत्वस्येति । उभयत्र प्रवृत्तिप्रतिबंधोऽनुमितौ च । उभययोग्य
ता । प्रामाण्यसंशययोग्यतासाध्यसंदेहयोग्यता च । अगृहीतप्रामाण्येति । अगृहीताप्रामाण्यविरोधीत्यर्थः । ए
कत्र प्रवृत्तिप्रतिबंधे परत्रानुमितौ । तथा च प्रामाण्यसंशयं विनापि प्रवृत्तिप्रतिबंधकप्रामाण्यसंशययो
ग्यतारूपस्यागृहीतप्रामाण्यज्ञानसमानविषयत्वस्य निरासार्थं प्रामाण्यानुमानमिति भावः । प्रवृत्तिसामान्ये
प्रामाण्यसंशययोग्यतायाः प्रतिबंधकत्वासंभवान्निष्कंपप्रवृत्तौ उक्तविधप्रामाण्यसंशयनिरासद्वाराऽप्रा
माण्याभावानुमानस्योपयोग इत्याह । वस्तुतस्त्विति । कर्तृत्वस्य व्यापकतावच्छेदकत्वेपि एककर्तृकत्वप्रकारका
नुमितिदर्शनादनियममाशंक्याह । नचेति । एककर्तुरपि कर्तृत्वालिंगितत्वमस्ति । नतु प्रामाण्यस्याप्रामाण्याभा
वत्वालिंगितत्वमिति भावः । तथेति । व्यापकतावच्छेदकावच्छिन्नविषयत्वनियम इत्यर्थः । नच पक्षताघटकेति । य

यपि साध्यसंदेहस्य पक्षतावच्छेदकत्वात् तदप्रामाण्यतदभावकोटिकः संशयस्तथा न तु प्रामाण्यकोटिक इति शंके
यमपपन्नात् तथापि केवलान्वय्यनुरोधेन साध्यसिद्धिनिवर्त्यसंशयत्वेन पक्षतावच्छेदकत्वात् प्रामाण्याप्रामाण्यसंदेहो
पित पेत्याशयः प्रकारत्वायोगादिति· यद्यपि अन्यतरप्रकारकतानियम इत्यस्यान्यतरविषयकतानियम इत्यर्थोऽस्तु
तथा चाप्रामाण्याभाववदप्रामाण्यविशेष्यकमेवास्तु तथापि तस्याखंडत्वाभावाद्विशेषणीभूतस्य तद्वत्तात्वादिनागस्या
नुपस्थित्या विशेष्यतापि नेति भावः· अर्थादिति मूले· वक्ष्यमाणव्यतिरेकिविशेषादित्यर्थः· अयं वह्नित्वेनेति मूलं· व
ह्नित्वप्रकारकानुभवमात्रस्य पक्षत्वे इह वह्नौ ऽव्यत्वमित्यादावंशतो बाधः तद्वारणायायमिति· अयं वह्निरित्याका
रकोऽनुभवविशेष इत्यर्थः· इत्येवं साध्यमिति· यद्यपि वह्नित्वाभाववद्विशेष्यकत्वाभावे साध्यमाने नाप्रामाण्याभावसि
द्धिः वह्निविशेष्यकगुंजात्वप्रकारकज्ञाने तस्य सत्त्वात् तथापि वह्नित्वप्रकारकानुभवविशेषे तदभावो· प्रामाण्याभा
वपर्यवसित इति भावः· अवह्नौ वह्निरित्यादि साध्यानां तद्धेतूनां च विवेकः शेषकरिष्यते· अग्रेतनेति· वह्नित्वाभाववदवि

न्यविशेष्यकत्वाभावस्य तूर्पसाध्यार्थः दाहसमर्थविषयकप्रयत्नजनकत्वे वह्नित्वप्रकारकत्वे च सति वह्नित्व
साक्षात्विशेषणतया दाहसमर्थभिन्नविषयकादन्यत्वं प्रथमहेत्वर्थः तच्च वह्नितादात्म्यभ्रमवारणाय दाह
त्यादि· तादात्म्येनेतरविशेषणदाहसमर्थनिरूपितं समवायमवगाहते वह्नित्वं प्रकारीकरोति वह्नित्वसाक्षाद्वि
शेषणकतया दाहसमर्थभिन्नं नावगाहते च यत्तत्त्वं द्वितीयहेत्वर्थः नन्वत्र वह्निरूपमित्यादिज्ञाने उक्तहेतोर्व्य
भिचारः· किंच द्वितीयतृतीयपंचमषष्ठसाध्येष्वयोगनिर्वाच्येषु धर्मविशेषणतया नोक्तो हेतूर्युज्यते इति· न· एतदस्य
रसादेवात्र दाहेत्यादिना खंडितहेतूपादनस्य करिष्यमाणत्वात्· वस्तुतस्तु प्रयत्नस्य व्यापार्यतया वह्नित्वसाध्यत
यावच्छेदकक्रियाविषयः तथा वेदंत्वावगाहि वह्निप्रत्यक्षमिव वह्न्यादानमिष्टसाधनमित्यनुमितिरपि दाहसमर्थ
विषयकप्रयत्नहेतुरिति वस्तुस्थितिः एवं च गुंजापुंजेऽयं वह्निरित्यत्र व्यभिचारात् दाहेति· अत्र वह्नित्वमित्यादिप्रत्य
क्षे व्यभिचारात् विशेष्ययेति· तदर्थस्य वह्नित्वेति· तदर्थस्य ~~स्य~~ विशेषणगततया इदंत्वाप्रकारकत्वं तेन ह

वि॰प्र॰म॰ वह्नौऽव्याप्यत्वमित्यादेरपिप्रत्यक्षस्य निवारणं॰ अनुमितौ व्यभिचारात्तन्निश्चयेति॰ तदर्थञ्च प्रत्यक्षत्वं॰ न चोपनीत
51 भानात्मके इष्टसाधनताप्रत्यक्षे एवमपि व्यभिचार इति वाच्यं॰ लौकिकप्रत्यक्षत्वस्य विवक्षितत्वात्॰ द्वितीयहेतो
श्च ह्रदे वह्नौऽव्याप्यत्वमित्यादौ व्यभिचारात्तदाहेति॰ न च तावद्देवास्त्विति वाच्यं॰ वह्नितादात्म्यारोपे वह्निः तादात्म्यप्र
तितया भासमानोपि संसर्गतया संसर्गप्रतियोगितया च न भासते भासते चेति सर्वजनीनं॰ तदेव चात्र विशेष्यम
त्विमतमितितादृशभ्रममेव व्यभिचाराच्चिश्चयेति॰ तच्च एकस्मिन् धर्म्मिणि परस्परविरुद्धाप्रकारकपरं॰ तादृश
र भ्रमजनितप्रमुष्टतत्ताकस्मरणे व्यभिचाराद् वह्निश्चेति॰ तच्च विशेष्यनिष्ठासाधारणधर्म्मप्रकारकपरं॰ यद्वा॰
दाहेत्यादिना दाहसमर्थप्रकारकत्वं यथाश्रुतमेव वह्निप्रकारकत्वनिश्चयेत्यनेन वह्नित्वविशेषणकतया दा
हसमर्थत्वभिन्नाविषयकत्वं विवक्षितम्॰ तथा च ह्रदे वह्नौऽव्याप्यत्वमित्यादौ व्यभिचाराद्घं॰ अयं घट इत्यादौ व्यभिचा
राद् द्वितीयं॰ गुंजापुंजे वह्निर्नेत्यादौ व्यभिचारात्तृतीयं विशेषणमिदिति के॰ अत्र केचित्॰ प्रवृत्तिविषयविशे

तथाचवह्निगुंजापुंजयोरिमौवह्नीनवेतिसंशयायवारणायनिश्चयत्वमितिभावः·एतच्च इमौवह्नी इतिनिश्च
यस्यावारणेनाव्याप्यवृत्तिजातिस्वीकारेऽपसिद्धांतेनवायुक्तमित्यरुच्याकेचिदित्युक्तं·निश्चयपदस्यव्यावर्त्यंति
रेवक्तुं·पूर्वोक्तमेवसयुक्तिकमनुवदतिवस्तुतइत्यादिनानचैवंनिश्चयेत्यतःप्राक्तनेनग्रंथेन·फलेति·इदंचफल
विशेष्यकज्ञानस्यप्रवर्त्तकत्वपक्षे·विशिष्टेति·विशिष्टस्यहेतोरसत्त्वावसत्त्वादित्यर्थः·अंशेति·इदमुपलक्षणं·वि
रुद्धाप्रकारकत्वेनैववह्नित्वमवारणदाहत्वादिवैयर्थ्यं·नचप्रमुष्टतत्ताकभ्रमरूपस्मरणवारणायतदितिवा
च्यं·प्रयत्नजनकत्वेनैववह्नित्वमवारणदाहसमर्थोत्त्वावैयर्थ्यादित्यपिज्ञेयं·तस्यदाहेति·इदंचदाहार्थिप्रय
त्नमत्तिप्रेत्यापाततउक्तं·वस्तुतोग्रेवाच्यत्वेनवह्नित्वाभावविषयकत्वविशेषणेनएतद्वारणमितिध्येयं·अतइति·
अत्रवह्नित्वमितिनिश्चयवारणायवह्नित्वप्रकारकपदं·अत्रवह्नित्वंनवेतिसंशयवारणायनिश्चयपदंयत्रइत्य
र्थः·नचभ्रमेपाति·यद्यपिवह्नितादात्म्यारोपेदाहसमर्थनिरूपितंत्वसमवायोदाहसमर्थवैशिष्ट्यशब्देनविवक्षि
वैशिष्ट्यंवह्नित्वविषयएवतथापितादात्म्येतरविशेषणंतत्रदाहसमर्थस्तादृशदाहसमर्थनिरूपित ।

त्रि॰प्र॰म॰ 52

तइतिनोक्तदोषः॰दाहाधायीति॰विशेषणापेक्ष्याहेतुद्वयं॰यद्वाद्वितीयहेतावेवव्यभिचारमाशंक्याह॰नचेति॰नि
र्णयित्वनियमादिति॰इदंचसंशयेधर्म्मिणोविशेष्यत्वंकोट्योःप्रकारत्वंनियतमितिसिद्धान्तमनुसृत्योक्तम्॰वस्तुतो
नुमितौपर्वतोवह्निमान्नपर्वतेवह्निरितिद्विरूप्यंचेत्संशयेपिद्विरूप्यमेवोचितमिति॰नियमाद्युतिपाठेतस्यचेत्यन्व
यः॰ननुवह्नित्वाभावाविषयकत्वंयदिनिश्चयपदार्थस्तदान्नमात्रमरूपेवह्नौइतिसमूहालंबनेव्यभिचारतादवस्थ्य
मित्यतआह॰समूहेति॰अंशभेदेनतत्रापिसाध्यमस्त्येवेत्युक्तमित्यर्थः॰नचात्रवह्नित्वंनवेतिसंशयेऽभावांशेव
ह्नित्वप्रकारकेपिदाहसमर्थांशेवह्नित्वप्रकारकत्वंनास्ति॰तथाचतद्रूपंवाच्यमन्यथाचवह्निद्वयसंबंधइतिनिश्चये
व्यभिचारस्यचकुतलपदवैयापत्तेः॰तथाचवह्नित्वाभावइदंचन्निरितिज्ञानस्यात्रवह्नित्वंनवेतिसंशयस्यचतेनैववार
णेनिश्चयपदंव्यर्थमितिचेत्॰अत्रोच्यते॰वह्नित्वाभावाविषयकत्वेनवह्नित्वसादृशाविशेषणकतयादाहसमर्थ
त्वेनविषयकादन्यत्वंविवक्षितमितिनोक्तदोषः॰तदिहसंक्षेपः॰वह्नित्वाभाववद्विशेष्यकत्वाभावःप्रथमसाध्यार्थः॰च

शेषकत्वे सतीति विशेषणासिद्ध्यर्थमित्यर्थः· न त्वन्यथेति· ननु तदनुमितावेव विषय इत्यर्थः· व्यापकेति· वह्नित्व
तावच्छिन्नव्यापकतावत्त्वस्येति शेषः· अवच्छेदकादीतिपाठे व्यतिरेकिणि विषयतानियामकं व्याप्यतावत्त्वमादिश
ब्दार्थः· वह्नित्वप्रकारकत्वे सतीति साध्येति सत्यंतं न विवक्षितमित्याह· एवमिति· वह्नित्वप्रकारकत्वघटिता प्रामाण्य
तावत्सिद्ध्यर्थमाह· प्रत्यक्षेति· स्वविशेष्यावृत्ति वह्नित्वप्रकारकत्वस्य त्वन्मते प्रसिद्धस्य तावत्साध्य इत्यर्थः· ननु पंच
मषष्ठयोरभेदः वह्नित्वव्यधिकरणशब्देनापि वह्न्यवृत्तित्वस्यैव प्रतिपादनादित्यत आह· एवं सर्वत्रेति· यत्रापो
नरुक्त्यशंकात्रेत्यर्थः· अन्योन्येति· वह्न्यवृत्तित्वं द्विरूपं अग्निमनन्तर्णीवेति तावत्· वह्नित्वमेति· वह्नित्वप्रकारक
त्वमेत्यर्थः· जलादीति· यद्यपि वह्नित्वप्रकारकत्वेन सावारितात्तथाप्यनेनापि वार्यत इत्याशयः· ननु च न निश्चयप
दं वह्निधर्मिकस्यायं वह्निर्वा गुंजा वेति संशयस्य वारणाय तस्य च समानधर्मिकविरुद्धप्रकारकज्ञानान्यज्ञानत्व
मर्थः तत्र च चरमज्ञानपदं व्यर्थं· न चान्यत्वांतमेव विवक्षितमिति वाच्यं· तथापि आद्यन्तागवैयर्थ्यात्· स्वरूपासिद्धेः

वि·ध·म·
53

पितद्धारकविशेषणानैवित्यात्· किंच तादृशासंशयेसाध्यसत्वात् किंचिदपि तद्धारणाय न देयमित्याशंकाह·नि
श्चयपदमिति· व्यर्थविशेषणतयेति· आयासगौरवापत्येत्यर्थः· विशिष्टाभावेव्यर्थत्वासंभवात्· इदंचवस्तुगतिमभि
प्रेत्य तद्विशेषणेपिप्रसक्तेदृष्टाभावादिति· विरुद्धोभयप्रकारकधीपरता· परस्परविरुद्धप्रकारकभिन्नप्रत्यक्षपरतेत्य
र्थः· तथाचेति· भिन्नत्वांतं समूहालंबनवारणायेत्यर्थः· तत्र चविशिष्टाभावतयानाद्यभागवैयर्थ्यंस्मरणस्यप्रवर्त्तक
त्वमेतादृशासमूहालंबनस्यस्मरणत्वमांशेप्रमुष्ट तत्ताकव्यभिचारवारणाय प्रत्यक्षपदम्· प्रत्यक्षेनेदंताप्र
मोषस्तिभावः· इदंत्वप्रकारविरोधस्येतिक्वचित्पाठः· तदाविरुध्यत इतिविरोधोविरुद्धं तथाच इदंत्वस्यैवप्रकार
विरुद्धस्यस्फुरणादित्यर्थः· ननुप्रत्यक्षत्वेहेतोविरुद्धप्रकारकान्यत्वापेक्षयासप्रकारकान्यत्वं व्यवच्छेदकमुचि
तं· प्रत्यक्षत्वंचव्यर्थं उपादानप्रत्यक्षत्वेनप्रवृत्तिहेतुतायांस्मरणस्याप्रवर्त्तकत्वादित्यरुचेराह· यदीति· नचाज्ञापि
सप्रकारकान्यत्वमेवलघुहेतुरस्त्विति वाच्यं· अवच्छेदकयोरेकधर्म्यसमावेशादितिभावः· निश्चयत्वं जातिरिति·

घटत्वनिष्ठस्य ज्ञानानुपनीतस्य तस्यापि ग्रहे मनसोऽसामर्थ्यात्· भासमानवैशिष्ट्यप्रतियोगित्वं प्रका
रत्वं· तच्च स्वरूपसंबंधात्मकं पूर्वज्ञानमपि प्रकारोऽभवतीति कल्पनीयं संसर्गमर्य्यादया वा तज्ज्ञानमितिय
दि तदा भासमानवैशिष्ट्यानुयोगित्वे विशेष्यत्वेपि तुल्यम्· वह्निगुंजयोर्गुंजावह्नी इति समूहालंबनेऽति
व्याप्त्या वह्नित्वावच्छिन्नविशेष्यकत्वे सति वह्नित्वप्रकारकत्वं न प्रमात्वमपि तु वह्नित्वावच्छिन्नविशेष्यकतावच्छेदेन वह्नि
त्वप्रकारकत्वं वह्नित्वावच्छिन्नविशेष्यकत्वे सति स्वरूपसद्वह्नित्वावच्छेदेन वह्नित्वप्रकारकत्वं वा· तथा च वह्नित्वावच्छि
शेष्यकत्वस्य वह्नित्वस्यावच्छेदकत्वाग्रहान्न स्वतस्त्वमिति सारं· वह्नित्ववन्निरूपितभासमानसंबंधप्रतियोगि
कत्वं वह्निकत्वं प्रामाण्यं न च विशेष्ये वह्नित्ववत्तानिर्वाहकस्य प्रकारतानिर्वाहकसंबंधस्य चाभेद घटितम्·
न्य अथातिप्रसंगात्तत्र चानुव्यवसायेन स्वरूपसंबंधात्मकप्रकारत्वस्य पूर्वज्ञातस्य ग्रहणेपि पूर्वज्ञातस्य संबं
धत्वादेः कथं ग्रहणं· एतेनात्मसुखादिस्थले तद्वत्वांशे मनसः स्यात् तच्चात्मसत्तानिश्चयो मनसा संभवत्यवतिक

कि·प्र·म·

54

कथंनस्वतःप्रामाण्यमितिनिरस्तं·तत्राप्युक्तविशेषणानांपूर्वाज्ञातत्वेनानुव्यवसायेप्रकारत्वासंभवादितित
त्वं·व्याघातेतिमूलं·व्याघातएवदंडोव्याघातदंडः।परप्रतिषेधइति·परोक्तमभावबोधकंवाक्यमित्यर्थः·व्या
घातोविरोधइत्यादिव्याख्यानंचयुक्तं·प्रामाण्यनिषेधरूपस्यपरकीयघोषोक्तस्येत्यग्रिममूलेऽस्पष्टिकल्प
नापत्तेः·अभावज्ञानेति·स्वजनकाभावज्ञानस्यासंभवरूपमित्यर्थः·तेनेति·विपक्षबाधकेनेतिभावः·प्रयोग
स्त्वेवं·इदंवाक्यंप्रतियोगिज्ञानपूर्वकमभावज्ञानपूर्वकत्वात्·प्रतियोगिज्ञानाभावेऽभावज्ञानासंभवादितित
र्कः·प्रामाण्योपस्थितिः·प्रामाण्याश्रयज्ञानस्यज्ञानानुमितिः·तदन्यथानुपपत्त्येति·अनुमितस्यज्ञानस्यविषयंवि
नाऽनुपपत्त्येत्यर्थः·तत्सिद्धिः·प्रमासिद्धिः·तस्याःप्रमायाविषयंविनाऽनुपपत्त्याविषयानुमितिरित्याह·विषयसि
द्धिश्चेति·इयंचप्रणाडीस्वातंत्र्येणप्रमादिसिद्ध्यर्थं·अन्यथाप्रथमानुमित्यैवावच्छेदकतयाप्रमादेर्विषयीक
रणादितिध्येयम्·अत्रान्वयिनीति·वह्निरयमित्यादावित्यर्थः·वस्तुतस्तुगूढाशयआह·मूलेसामान्यतइति·

87

वेत्येतावदेवास्तां· किंच· यद्वस्तु एकपुरुषमात्रप्रतीतं तदीयव्यतिरेकनिश्चयेनैवागतत्तदभाववत्त्व
प्रकारकसंशयात्मना विरोधिज्ञानान्तरेण च प्रतिरुद्धप्रतीतिकं तत्र व्यभिचार एवेति· उच्यते· यदभाववत्त्व
प्रकारकसंशयेन यत्प्रतिबंध आपादयितुं शक्यते तदभावावगाहनप्रयुक्तप्रतिबंधकताकस्य निश्चय
स्य च यदभाववत्त्वप्रकारकतानियमस्तन्निश्चयस्तन्निश्चयत्वेन तत्र हेतुरित्यर्थः· पक्षधर्मताव्यतिरेकनि
श्चये किंचित्त्वेन व्याप्यभावविषयकव्याप्यभाववत्त्वप्रकारकताविरहात्साधनवैकल्यमात्स्यादिति यदभावाव
गाहनप्रयुक्तेति विशेषणम्· ननु यदभावसंशयेनेत्युक्तौ व्यभिचारे यत्प्रतिबंध इत्यादिकमेवास्तु न तु तम
भाववत्त्वप्रकारकत्वेनेत्यत आह· अन्यथेति· ननु यदभाववत्त्वप्रकारकसंशयेनेत्युक्तौ व्यभिचारसंशयस्य व्या
प्तिधीप्रतिबंधकत्वं पूर्वोक्तं विरुध्येतेत्यत आह· अस्ति चेति· यदभाववत्त्वप्रकारकेत्यादिनाऽव्यभिचारव्यतिरे
कनिश्चयं वारयति· प्रकृते चेति· ननु व्यतिरेकपदेन निश्चयद्वित्रिमुख्याभावो विवक्षितां· तथा च यद्व्यतिरेक

वि·प्र·म· त्वप्रकारकसंशयोयद्व्यतिरेकत्वप्रकारकमुख्याभावनिश्चयस्य यत्र प्रतिबंधकस्तन्निश्चयस्तन्निश्चयत्वे
55 न तत्र हेतुरित्युक्तौ व्यभिचारव्यतिरेकज्ञानस्य वारणात्कोदोषइतिचेत्· न कोपि· किंत्वेतद्व्याप्तिबलादेव
कांशज्ञानस्य हेतुत्वेन सिध्येदिति तदनुरोधादन्यथाव्याप्तिर्वर्णितेति· यद्व्यतिरेकत्वप्रकारकं यद्व्यतिरेक
ज्ञानत्वावच्छिन्नं यत्र प्रतिबंधकमिति द्वितीयकल्पेतु यदभावावगाहनप्रयुक्तप्रतिबंधकताकं यद्व्यतिरेकज्ञा
नं यद्व्यतिरेकत्वप्रकारकमेवेति विवक्षया व्याप्तिधियं प्रत्यव्यभिचारव्यतिरेकज्ञानत्वावच्छिन्नस्य प्रतिबंधक
त्वाद्योदोषः स निरस्यत इत्यभिप्रेत्य किंचिन्नोक्तमिति· अत्र यद्यपि यत्संशयत्वादिमूले प्रतिबंधकत्वं यदि का
रणीभूताभावप्रतियोगित्वं तदा दृष्टांतासंगतिः यदि प्रतिबंधप्रयोजकत्वं तदा तत्र तयोरिति सिद्धान्तासंगतिस्त
थापि संशयान्तरानियमेन संशयस्य व्यतिरेकनिश्चयस्य च प्रतिबंधप्रयोजकत्वं विवक्षितं· प्रमात्वसंशयस्य
चार्थसंशयनियमेन प्रतिबंधकत्वं· न च संशयांतरानियमेनेति विशेषणं व्यर्थमिति वाच्यं· तेन विना प्रवृत्त्योपरं

वगर्त्तव्यभिचारनिश्चयस्य फलोपधानात्मकहेतुत्वाभावात् । विशेष्ये विशेषणमिति न्यायेनाव्यभिचारावगा
हिन्याद्बुद्धौ बाधे च व्यभिचारनिश्चयस्य फलोपहितत्वाभावात् । प्रथममागमात्रोपादाने व्यभिचारो वक्लप इत्य
पि इष्टत्वं । संशयमात्रोपादाने व्यतिरेकनिश्चयमात्रोपादाने च दोषान्तरं वक्तुं क्वचित्वस्तुत इति पाठः । त
त्र व्यभिचारसंशयस्य व्यभिचारकोट्यवगाहितया ऽव्यभिचारज्ञाने व्याप्तिज्ञानविशेषप्रतिबंधकत्वं ज्ञेयम् ।
तज्ज्ञानाज्जन्यायामिति । अबाधितत्वज्ञानस्याकारणत्वपक्षे । तद्धेतुत्वे तु तत्संशयजन्यानुमितिविशेषव्यभिचारो
बोद्धव्यः । अत्र व्याप्तिश्चयेपि । ग्राह्यभिन्नत्वेनेति । ग्राह्यप्रतियोगिकभिन्नत्वेन व्यतिरेको विशेषणीय इत्यर्थः ।
ग्राह्याभावभिन्नत्वेनेति तु पाठः स्पष्ट एव । व्याप्तिव्यतिरेकेति । अव्यभिचारव्यतिरेकेत्यर्थः । व्याप्तिज्ञाने ऽव्यभिचा
रज्ञाने । नन्वेवं संशयोपादानवैयर्थ्यं । किं वा नियतव्यभिचारज्ञानप्रतिबंधकतापक्षे तूदासीनव्यभिचाराभाव
संशयो व्यभिचारकोटिविषयतया तद्व्यतिरेकनिश्चयस्य व्यभिचारनिश्चयतया प्रतिबंधक इति विशिष्टापि हेतु

वि·प्र·म· व्यभिचारीति चेन्न· उच्यते· नियतव्यभिचारधीविषय एव प्रतिबंधकत्वाश्रयणान्नायं दोषः· नाप्याद्यः· संशयपदो
56 पादानादेव व्यतिरेकग्राह्यप्रतियोगिकभिन्नत्वलाभात्· व्याप्तिसिद्धये चातात्पर्य्यं· तत्र च संशयेपि ग्राह्याभावावि
षयकत्वं विशेषणं देयं· असाधुत्वनिश्चयनश्चनप्रतिबंधक इत्याश्रयणीयं· वस्तुतः फलव्यतिरेकनिश्चयस्य
ग्राह्याभावाविषयकस्य प्रवृत्तिप्रतिबंधकत्वान्नद्वारणाय संशयोपादानं· संशयप्रतिबंधकत्वं व्यतिरेक
त्वप्रकारकसंशयत्वावच्छिन्नप्रतिबंधकत्वं विवक्षितमतो न प्रतिबंधकसंशयेन समूहालंबनं फलसंशय
मादाय व्यभिचारतादवस्थ्यम्· अत्राप्युदासीनव्यभिचारधीर्न प्रतिबंधिकेति मतमाश्रयणीयम्· निश्चयांत्र
मात्रे च ग्राह्याभावाविषयकत्वं विवक्षणीयमिति· यद्वा पूर्वास्वरसादाह· वस्तुत इत्यादि· ननु यद्भाववत्त्वप्रका
रकौ संशयनिश्चयौ प्रतिबंधकावेव प्रतिबंधकौ यद्भाववत्संशयनिश्चयौ यद्भाववत्त्वप्रकारकावेवेति वा नि
यमो विवक्षितः· आद्ये उक्तव्यभिचारतादवस्थ्यं· अन्त्ये प्रतिबंधकयद्भाववत्संशयो यद्भाववत्त्वेकारकए

अवसरसंगत्या प्रमाणतत्त्वनिरूपणं प्रतिजानीते मूले· अथेति· मूले· ननु प्रमाणादीनामिति· प्रमाणत
त्त्वं शास्त्रप्रवृत्तेनावधारणीयं· शास्त्रप्रवृत्तेश्च प्रमात्वनिश्चयं विनासंभवः प्रमात्वनिश्चयश्चाशक्य इति प्रम
णतत्त्वावधारणमशक्यमित्यर्थः· तथा चाथ किमित्याशंकासंगच्छते· केचित्तु· प्रमाकरणत्वं प्रमाणत्वं तत्र प्रमा
त्वस्य ग्रहं विना दुर्ग्रहं· अननुसंहितोपाधेरुपहितप्रत्ययायोगादित्यर्थं वर्णयित्वा· ननु बोधकत्वस्वरूपमेव प्रमाण
त्वं प्रतिपादनीयं शास्त्रेणेति परिहृत्य तथापि प्रवृत्त्यर्थं प्रमात्वग्रहोऽवश्यमपेक्षणीय एवेत्याशंकायां किमिति ग्र
न्थमवतारयंति· तटस्थः शंकते· अथेतीत्यन्ये· व्यभिचारादन्यथासिद्धेश्चेति· प्रवृत्तिसामान्ये व्यभिचारात्प्रवृ
त्तिविशेषे अन्यथासिद्धेरित्यर्थः· व्यतिरेकज्ञानमात्रं व्यतिरेकज्ञानत्वावच्छिन्नं व्यतिरेकत्वप्रकारकज्ञान
त्वावच्छिन्नमिति यावत्· सामान्येन व्यतिरेकज्ञानत्वावच्छेदेन· इदमुपलक्षणं· उभयघटितनियमलाभार्थमपि
ति वक्तव्यम्· तच्चोभयघटितो नियम इति कल्पमधिकृत्याह· प्रत्येकेति· नन्वत्र व्यभिचाराप्रसक्तिरेव द

ष इत्यत आह · निश्चयत्वेनेति · यद्यपि निश्चयाभावे ऽभाव इति पदे संशयस्य निश्चयपूर्वकतया दोषता
दवस्थ्यं · तथापि निश्चयानधिकरणक्षणाव्यवहितोत्तरक्षणे ऽनुत्पत्तेः साध्यत्वमिहाभिमतम् · प्रतियोगि
ज्ञानत्वेनेति · इदमुपलक्षणं · शाब्दबोधे योग्यतानिश्चयस्यायोग्यताज्ञानत्वेन जनकत्वादित्यपि द्रष्टव्यम् · ननु
निश्चयत्वेन जनकत्वं तदभावे ऽभावाद्वा कुतो वक्तव्य इति · उच्यते · प्रवृत्तिजनकनिश्चयस्य कस्यचित्प्रमात्वाद
गाहित्वेपि प्रमात्वनिश्चयः प्रवृत्तिहेतुरित्यस्य सिद्धेः शाब्दप्रवृत्तिपूर्वं प्रमात्वनिश्चयस्यावश्यकत्वं प्रवृत्तिपद्धि
णोन्निभूतं न सिध्येदित्यर्थान्तरवारणाय तथाविवक्षा आवश्यकीति · तन्निश्चयस्तद्धेतुरित्यत्र फलोपहितत्व
मर्थस्तेनोक्तार्थान्तराभावः · क्वाचित्कसमूहालंबनरूपप्रमात्वनिश्चयस्य प्रवृत्तिसामान्यफलोपधानाले
कहेतुत्वाभावादित्यभिसंधाय प्रकारान्तरमाह · वस्तुत इति · द्वितीयकल्पे द्वितीयभागमात्रोपादाने · इदमु
पलक्षणं · अत्यन्ताभावगर्भव्याप्तिविचारसंशयेन मणिमंत्रवत्प्रतिरुद्धे ऽन्योन्याभावगर्भव्याप्तिग्रहे ऽत्यन्ताभा

परयाप्रामाण्यनिश्चयप्रामाण्यसंदेहस्य तद्व्यतिरेकनिश्चयस्यैव प्रतिबंधकत्वात् तत्प्रामाण्यनिश्चयप्रा
माण्यनिश्चयस्यैवाहेतुत्वाद्व्यभिचारापत्तेरिति॰ अत्रायं संग्रहः॰ यत्संशयव्यतिरेकनिश्चयो यत्र प्रतिबंध
को तन्निश्चयस्तन्निश्चयत्वेन तत्र हेतुः॰ तन्निश्चयानधिकरणाव्यवहितोत्तरक्षणे तदनुत्पत्तिस्तन्निश्चयस्त ५
त्रफलोपधानात्मककारणतावान्निति साध्यत्वे विध्येन तिस्रो व्याप्तयः॰ तासु चाव्यभिचारव्यतिरेकज्ञानमात्र
स्य व्याप्तिधीप्रतिबंधकतया व्यभिचारप्रसक्ते निश्चये ग्राह्याभावानवगाहित्वविशेषणेन तन्निरासे संशयप
दवैयर्थ्यप्रसक्तेः संशयपदमहिम्ना ग्राह्याभावानवगाहित्वविशेषणलाभ इति ग्राह्याभावानवगाहित्वं नि
श्चये संशये च विशेषणं व्याप्तिद्वये च तात्पर्यमिति ग्राह्याभावानवगाहिनः फलव्यतिरेकनिश्चयस्य प्रवृत्तोऽप्र
तिबंधकत्वात्तद्वारणाय संशयोपादानमिति च त्रय उद्धारप्रकाराः॰ ग्राह्याभावानवगाहित्वविशेषणाप्रवे
शेऽपि यदभावत्वप्रकारकसंशये न यत्प्रतिबंध आपादयितुं शक्य इत्यादिना खंडयति। व्याप्तिरुक्ता निश्चयांशे

चि·प्र·म·

58

मुख्यानामघटितात्व्याप्तिशंकादानिश्चयहेतुत्वाप्रयोजकत्वान्नाद्दता · यद्व्यतिरेकज्ञानत्वावच्छिन्नं प्रति
बंधकमितिकल्पेन्तु यदभावावगाहनप्रयुक्तप्रतिबंधकतांकं यद्व्यतिरेकज्ञानमित्यादिना पंचमीव्याप्तिरुक्ते
तिसंक्षेपः · नहि करणेति · प्रमाकरणत्वेत्यर्थः · ननु ज्ञानपदेपि करणत्वमुत्पत्तिसंभवात्कथं तेन करणत्वमनिरा
स इत्यत आह · ज्ञानपदस्येति · अस्तिपरत्वेपि ज्ञानपदस्य न करणत्वमनिरासः व्याप्तिज्ञानादेः करणत्वादिति
दोषं स्फुटतयोपेक्ष्य दोषान्तरमाह · प्रामाण्येति · विशेषपरत्वे · तद्वति तत्प्रकारवत्त्वपरत्वे · अंशात इति · विशे
ष्यावृत्त्यप्रकारकत्वादस्त्वतोग्राह्यत्वाभावादित्यर्थः · पदसंकोचेति · यथायोग्यमत्रान्वयः · तथा चेति · इच्छाग्रा
हकेण तन्निष्ठप्रामाण्यस्याग्रहणाघाचत्वाश्रयग्राहकग्राह्यत्वस्य बाधान्नद्वारणाय ज्ञानपदमित्यर्थः · नच
ज्ञानपदे दत्तेपि कथं बाधवारणं · घटत्ववति घटत्वप्रकारकत्वरूपस्येच्छाप्रामाण्यस्य ज्ञानेपि सत्वादिति वाच्यं ·
ज्ञानप्रामाण्यमित्यनेन ज्ञानत्वावच्छिन्नप्रामाण्यस्योक्तत्वादिच्छायास्तदाश्रयत्वाभावादिच्छाग्राहकेण तदग्रहे

पियावत्त्वाश्रयग्राहकग्राह्यत्वमस्तीति भावः। यदि त्विति। तथा च निर्विशेषित एव प्रामाण्ये यावत्त्वाश्रयग्रा
हकग्राह्यत्वमस्तीत्यर्थः। परिहरति। तदेति। तदापि पक्षे ज्ञानपदमस्त्वित्यर्थः। अपिशब्दस्तत्पदशब्देन समुच्चयो
ज्ञनीयः। तत्र हेतुमाह। तथापीति। इच्छाग्राहकेणेच्छाप्रामाण्यग्रहपक्षेपि यत्र ज्ञानेच्छयोरुभयोरपि प्रामाण्य
मगृहीतं तत्रेच्छाप्रामाण्यस्याश्रयग्राहकासत्त्वेन बाधो यत इत्यर्थः। न च तत्र ज्ञानेच्छाग्राहकप्रसरे तेन प्रामा
ण्यस्य ग्रहणान्न बाधस्तदप्रसरे किमीयप्रामाण्यं ज्ञातो बाध इति वाच्यम्। सामान्यस्तेन ग्राहकप्रसरेप्यग्र
निर्वाच्यस्य प्रामाण्यग्रहोपयोगिहेत्वोर्विशेषस्याभावादिति। न च ज्ञानपदे दत्तेपि कथं तद्वारणमिति वाच्यं।
ज्ञानपदस्य प्रामाण्यविशेषणज्ञायमानत्वपरत्वात्। केचित्तु। यदिच्छाग्राहकेण तत्प्रामाण्यग्रहस्तदा साध्येपि ज्ञान
दृष्टेयं तेन यावत्त्वाश्रयीभूतज्ञानग्राहकग्राह्यत्वं साध्यं पर्यवस्यतीति। तथा च यत्र ज्ञानप्रामाण्यग्रहो न ज्ञातस्त
त्समानविषयकेच्छाप्रामाण्यस्य च ग्रहो ज्ञातस्तत्रेच्छाप्रामाण्ये बाधवारणार्थं पक्षे ज्ञानपदं। तच्च ज्ञानविशेषपरं

जि·प्र·म·

59

तेन ग्राहकविशेषणग्रहमाणप्रामाण्यकस्य ज्ञानस्य प्रामाण्यं परतोऽनुमीयते· तथापीत्यपि शाचवदन्धकारार्थ इति व्या
ख्यातं· इह केचित्तुः· अत्र ज्ञानपददानेऽपि तत्कारणासंभवात्· तत्रैकान्तरितप्रामाण्यस्य ज्ञानेऽपि हेतोः· अगृहीतप्रा त
माण्ये ज्ञाते बाधवारणाय पदस्य कोचस्यावच्छेदकत्वादिति चिन्त्यमिति केचित्तु स्वकपाठः· यत्र च नायं पाठस्तत्र इममेवा
स्वरसं दत्त्वा वस्तुत इतिग्रन्थ उत्थापनीय इति· तत्र· ज्ञानपदस्य प्रामाण्यविशेषणज्ञायमानत्वपरत्वात् ग्राहकविशे
षणज्ञायमानप्रामाण्यकज्ञानपरत्वाद्वा· किंतु प्रथमव्याख्याने उभयोरपि प्रामाण्यं यत्र न ज्ञायते तत्र कथं बाधनिरूप
णं· अधिकरणज्ञानात्· न च सामान्यतो ज्ञायमानेनाऽपि प्रामाण्येन तत्रैव निर्वाच्यस्य ग्राहकविशेषणं ग्राह्यत्वस्याभावाद्बा
धप्रसक्तौ तद्वारणाय ज्ञानपदेन ग्राहकविशेषणज्ञायमानत्वं प्रामाण्यविशेषणं विवक्षितमिति वाच्यम्· इ तथापि
ज्ञान च्छापर्यन्तधावनवैयर्थ्यात्· द्वितीये व्याख्याने साध्यज्ञानपदं दत्वापदं प दंदेयमिति सुतरां वैयर्थ्यमिति दूषणं द्रष्टव्यं·
ज्ञानपदोपादानमिति· तथा च ज्ञानपदमहिम्नाऽनिच्छाप्रामाण्यस्य पदत्वक्रमो न भवतीति भावः· तच्चिदमयुक्तं· एवं

सतिगंधवत्त्वाद्युपाधेरप्यैक्यं नस्यात्· घटवृत्स्यगंधस्यैतदात्· गंधत्वेन प्रवेशादुपाधेरैक्यमिति यदि तदा घटत्वे
नप्रवेशात्सिद्धासिद्धघटघटितस्याप्यैक्यमस्त्विति· किंच नैयायिकमते ज्ञानद्वयोः समानविशेष्यकत्वान्नेदं संगतमि
त्यस्वरसात्कल्पांतरमाह· केचित्त्विति· ज्ञानसामान्येति· तद्वति तत्प्रकारकत्वमित्यर्थः· समर्थेति· समर्थप्रवृत्तिप्रयोजक
मात्रवृत्तिधर्मपरमित्यर्थः· नांशाताबाध इति· विशेष्यावृत्त्यप्रकारकत्वादावपि तद्वति तत्प्रकारकत्वजातीयत्वसत्त्वादि
त्यर्थः· नन्विदमयुक्तं· तज्जातीयत्वं हि तद्व्याप्यत्वं वा तद्व्यापकत्वं वा· तत्समनियतत्वं वा· तत्समानाधिकरणत्वं वा· नाद्यः वि
शेष्यावृत्त्यप्रकारकत्वस्य निर्विकल्पकेपि विद्यमानतया तद्वति तत्प्रकारकत्वाव्याप्यत्वात्· न द्वितीयः एतज्ज्ञानत्वादे
पर्दात्तेतद्वति तत्प्रकारकत्वं प्रति व्यापकत्वाभावेनांशताबाधात्· अत एव न तृतीयः· न चतुर्थः· प्रमाकरणत्वेपि तद्व
ति तत्प्रकारकत्वसामानाधिकरण्यसत्त्वात्· व्याप्तिज्ञानादौ तदुभयोः सत्त्वात्· न च प्रत्यक्षप्रमाकरणत्वेपि साध्यबाधान्न
कारणाय ज्ञानपदं· एतन्निर्विकल्पकत्वादौ तद्व्यापि बाधादित्यस्वरसादाह वस्तुत इति· केचित्तु तज्जातीयत्वं हि यावज्ज्ञान

ग्राहकस्य ग्रहणायोग्यत्वं बाधादिति। ज्ञानपदेदन्त्वेज्ञाननिष्ठप्रमापदप्रवृत्तिनिमित्तस्य लाभादिति भावः। नच घटत्ववति
घटत्वप्रकारकत्वादीनामननुगमान्नमभिन्नानुगतत्वं प्रमापदप्रवृत्तिनिमित्तं स्वीकार्यं तच्च वन्न विवादइति वाच्यम्। समर्थ
प्रवृत्तिजनकतावच्छेदकत्वेनानुगतीकृतानामनुगतत्वसहितानां घटत्ववति घटत्वप्रकारकत्वादीनामेव प्रवृत्तिनिमित्तत्वात्।
न च तथाप्यनुगतत्वांशे विवादाभावो दोषइति वाच्यम्। अनुगतत्वांशरहितप्रमापदप्रवृत्तिनिमित्तस्य विवक्षितत्वात्।
नहि तच्चापीति। धर्मधर्मिगोचरज्ञानत्वमित्युक्ते ज्ञानद्वयात्मके भ्रमे गतमतएकपदम्। एतावति कृते भूतलं घटाभाववदिति ज्ञा
नं भूतलं घटविशिष्टज्ञानं स्यादतोऽगृहीतासंसर्गपदं। एवं सत्यपीदं उपुरुषाविति समूहालंबने गतमतो धर्मधर्मिपदं धर्मत्व
धर्मित्वरूपसंबंधपरमित्यर्थः। नन्वेवमपि प्रमेयत्ववद्देवदत्तो घटश्चेति समूहालंबनस्य घटप्रमेयत्वविशिष्टज्ञानत्वापत्तिः
देवदत्तं प्रति प्रमेयत्वस्य धर्मत्वभानात् घटत्वं प्रति घटस्य धर्मित्वज्ञानाच्चेति। मैवम्। परस्परनिरूपितधर्मत्वधर्मित्वगो
चरत्वस्य विवक्षितत्वात्। नचैवं भूतलं घटाभाववदिति ज्ञानस्य ज्ञानद्वयात्मकत्वमस्य च परस्परनिरूपितधर्मत्वधर्मित्व

गोचरत्वस्याप्रामाण्यावधारणार्थमगृहीतासंसर्गपदम् केवलं व्यर्थं स्यादिति वाच्यम् । परस्परप्रतियोगिकत्वलाभार्थमे
वतदुभयोपादानादिति । अधिकमन्यथाख्यातौ वक्ष्यते । तत्र व्यक्तिपरे इति । ज्ञानपदं ज्ञानत्वेन रूपेण घटज्ञानादिप
रं । अप्रामाण्यपदं चाप्रामाण्यत्वेन रूपेण घटत्ववति घटत्वप्रकारकत्वादिपरम् । न तु सकलप्रमासाधारणमेकं प्रामाण्यं
पक्ष इत्यर्थः । अप्रामाण्यत्वं चानुगतत्वांशरहितप्रमापदप्रवृत्तिनिमित्तत्वं समर्थप्रवृत्तिजनकतावच्छेदकज्ञाननिष्ठं धर्म
त्वं चेति ध्येयम् । अत इति । इदं चापाततः विषयघटितमूर्त्तिकस्य सकलप्रमासाधारणस्य तद्वति तत्प्रकारकत्वादेरेकस्या
संभवाद्भ्रमभिन्नज्ञानत्वादिकमेकं प्रामाण्यं वाच्यं । तस्य चाप्रामाण्यग्राहकेणापि ग्रहणमित्यसंगतेः । तस्माद्विषयाघटि
ते विवादाभावाद्विषयघटितैकप्रामाण्यस्याप्यसंभवादेव नानाप्रामाण्यानि प्रामाण्यत्वेन पक्षीकृतानीति ध्येयम् । के
चित्तु घटत्ववद्विशेष्यकघटत्वप्रकारकत्वादिना प्रत्येकमेव पक्षतेत्यर्थमाहुः । तन्न । तथा सति पक्षतावच्छेदकैक्यमाप
यमूलकतान्तस्यांशतः सिद्धसाधनोद्धारस्यासंगत्यापत्तेरिति । तज्ज्ञानेति । इदंत्ववतीदंत्वप्रकारकत्वादिप्रामाण्य

वि·प्र·म· श्रयीभूतं ईश्वरयोगिनोरनंगीकारादेकमेवयज्ज्ञानं प्रामाण्याश्रयीभूतज्ञाननानात्वेप्येकैवयत्रास्मदादेर्ज्ञानग्राहि
६। कासामग्रीतदिहतज्ज्ञानपदेनविवक्षितं·अन्यत्रज्ञानेयावत्त्वाश्रयग्राहकग्राह्यत्वाभावादितिध्येयम्·नैयायिकमतेईश्व
रयोगिनोःसत्वादाद्यकल्पेनप्रसिद्धिरयुक्ता·घटत्ववतिघटत्वप्रकारकत्वादेःपक्षेयत्साध्यंतस्यचमतद्वयेपिकल्पद्व
येनापिज्ञानेप्रसिद्धिरयुक्ताअतआह·तद्विषयेति·प्रकाराभूतेत्यर्थः·नानारूपेविशेष्येसाध्यासत्वादितिध्येयम्·एकमे
ववायद्विशेष्यंतदंशिप्रायेणेतत्·ज्ञानत्वेप्रसिद्धिरिति·इदमापाततः·घटत्ववतिघटत्वप्रकारकोगुणइतिवाक्येनस्वाश्र
यग्राहकेणज्ञानत्वाग्रहणात्·स्वविषयत्वेति·प्रामाण्यग्राहकत्वमावश्यकंयस्यास्तादृशीज्ञानग्राहिकासामग्रीयत्रत
त्वंप्रामाण्यसाध्यमित्यर्थः·यस्यैकेवेति·इदंचेश्वराद्यनंगीकारे·तथाचप्रमाविषयत्वव्याप्यत्वंसामग्र्यामितिभावः·ततएवप
क्षसंकोचादेव·प्रभूतेपि·एकमात्रग्राहकसामग्रीकज्ञानप्रामाण्येपि·उक्तरूपस्यैष्टेरिति·स्वविषयकत्वनियतत्वादिरूपस्येष्टेरि
त्यर्थः·विलक्षणायाः तज्ज्ञानप्रकाराभूतेत्यनातिरिक्तपरं·चितयमतेचएकग्राहकसामग्रीकेतरपरंज्ञानपदमित्यनुगतप

शालात्वमित्यर्थः· गुर्विति· गुर्वादीत्यर्थः· इदमुपलक्षणं· न्यायमते ज्ञानसामान्यपरमिदमपि ज्ञेयम्· यद्यपि नानासामग्रीग्राह्य
ज्ञानपरतायामनुगमः स्वत्वत्वेन नच न्यायमते नानेति विशेषणमयुक्तं प्रयोजनाभावादिति वाच्यम्· उपरंजकस्यापि प
रिच्छेदात्· यद्वा विशेषणं नदेयं किंतु वस्तुगत्यायत्रादृशां ज्ञानं तत्प्रामाण्यमेव परतः कार्यमिति तथापसंकोचेनैवोपप
त्ताविशुक्त्युक्त्वैव तात्पर्यम्· ननु चाचेति· अस्य च पूर्वपक्षस्य तस्मात्तद्विषयकत्वं दुर्वचमित्यत्र पर्यवसानम्· ज्ञा
नत्वेति· घटज्ञानमित्यत्र घटविषयकं ज्ञानमित्यर्थः· तत्र च घटविषयकाभेदज्ञानत्वं नावच्छेदकं पटज्ञानेति
प्रसंगात्· नापि ज्ञानाभेदघटविषयत्वमित्याद्यावतिप्रसंगात्· अतो ज्ञानदिशा घटत्वप्रकारकज्ञानत्वं घटवि
षयकदिशा घटविशेष्यकज्ञानत्वम् अभेदान्वयितावच्छेदकमित्यर्थः· न घटविशेष्यकत्वमन्वयितावच्छेदक
मिति· न घटविशेष्यकत्वं प्रति घटत्वप्रकारकज्ञानत्वमन्वयितावच्छेदकमित्यर्थः· यथाश्रुतेऽवच्छेद्यानिप्रस
क्तिर्लभ्यते सा च न दोषाय· इदमुपलक्षणं· द्रव्यत्वप्रकारकघटविशेष्यकज्ञाने घटत्वप्रकारकज्ञानत्वाभावात्

वि॰प्र॰म॰

१८

घटविशेष्यकज्ञानत्वमपिनावच्छेदकमित्यपिद्रष्टव्यम्॰ अंत्योगुरोरिति॰ घटत्वप्रकारकज्ञानत्वस्यघटवि
शेष्यकज्ञानत्वेनसहासंभवाद्बाधकोनियमइत्यर्थः॰ विपरीतनियमस्तुगुरोरप्यौत्सर्गिकएवेतिध्येयम्॰ यत्रे
ति॰ घटविशेष्यकघटत्वप्रकारकत्वयोर्नियमोऽन्वयनियमोन्वयितावच्छेदकत्वमितियावत्॰ तथाचयत्रैतयो
रन्वयितावच्छेदकत्वेनग्रहोनास्तीत्यर्थः॰ औत्सर्गिकमन्वयितावच्छेदकमितरकोटिव्यतिरेकनिर्णयेनास्ते॰
ननुतदसत्वइत्यत्रिप्रत्याह॰ किंचेति॰ बाधेति॰ अप्रमात्वव्यतिरेकनिर्णयासत्त्वमित्यर्थः॰ घटविषयकज्ञानत्वघटत्व
प्रकारकज्ञानत्वयोरेवयेनौत्सर्गिकोनियमोगृहीतोनतुविशेष्यत्वांतर्भावेनतंप्रत्येतादृशशाब्दात्कथंघटत्वव
द्विशेष्यत्वलाभः॰ कथंचउक्तत्वप्रकारकघटविशेष्यकज्ञानेघटत्वप्रकारकत्वबाधावतारेतादृशशाब्दाघटत्व
प्रकारकत्वलाभइतिदिगर्थः॰ बाधतावेदस्यमिति॰ अत्रकाश्चित्॰ प्रमेयविशेष्यकंघटत्वप्रकारकंज्ञानमित्येवंरूपा
पिसामग्रीप्रामाण्यंग्रह्णातिव॰ ज्ञानज्ञानस्यतद्विषयधर्मधर्मिवत्त्वेऽन्वयवैशिष्ट्यांवगाहित्वनियमेनविशेष्य

घटत्ववत्त्वस्याःनयापिग्रहात्·अन्यथाप्रकारत्वादिग्रहानुपपत्तेस्तस्यतत्घटितशरीरत्वात्·नचैवमनुव्य
वसायादिनोक्तयुक्त्यावच्छेदंधर्मधर्मिवैशिष्ट्यविषयीकरणेन्यायनयेपिकथंनतेनप्रामाण्यग्रहणमितिवाच्यम्·वै
शिष्ट्यग्रहणेपितदंशेज्ञानस्यसत्त्वानिश्चयरूपत्वाभावात्·यद्यत्रप्रगल्भेनोक्तंतत्ज्ञानविशेष्यविशेष्यकत्वेनत
ज्ञानप्रकारप्रकारकत्वेनयासामग्रीज्ञानंगृह्णातिसावेदवच्छेद्यधर्मिणितद्वत्वंगृह्णातितदातदभाववत्त्वघटिता
प्रामाण्यस्यतस्मिन्नवसरेग्रहणशंकैवनविरोधादित्यप्रामाण्याग्राहकपदवैयर्थ्यमिति·तन्न·ज्ञानपारतंत्र्येण
तद्वत्त्वग्रहदशायांतदभाववत्त्वसत्त्वानिश्चयेबाधकाभावात्·तद्वत्त्वसत्त्वानिश्चयस्यैवतत्रप्रतिबंधकत्वात्·यद्वा·
अप्रामाण्याग्राहकत्वंनज्ञप्त्यासेनाप्रामाण्याभावग्राहकत्वंतत्रप्रामाण्यग्राहकत्वमेवविवक्षितंअप्रामाण्यदे
र्पस्यप्रामाण्याभावपरत्वात्तथाचतद्वतितत्प्रकारकत्वरूपप्रामाण्यग्राहिकासामग्रीमूलेविवक्षिता·नचानु
व्यवसायादिसामग्रीतादृश्येवनभवतीतिवाच्यं·स्वातंत्र्येणतद्वत्ताविषयत्वेपिज्ञानपारतंत्र्येणतद्वत्त्वस्यतयापि

वि·प्रभ·

६

ग्रहणादित्याह· तत्र· तादृशसामग्र्याप्रामाण्यं गृह्यत इत्यत्र यथाश्रुतमेव वा साध्यं विवक्षितं प्रामाण्यसत्तानिश्चयो
त्पन्नवतीतिवा· आद्ये ऽनुव्यवसायादिना प्रामाण्यग्रहो ज्ञानपारतंत्र्येण नैयायिकमतेपीति चैत्यैवोक्तत्वात् सिद्धसाधनं· द्वि
तीये घटत्ववत्वेन ज्ञायमानविशेष्यकं घटत्वप्रकारकं ज्ञानमित्यत्र प्रामाण्यसत्तानिश्चयाभावाद्बाधः· न वतत्रा
पि प्रामाण्यसत्तानिश्चये इष्टापत्तिरेव कर्त्तव्या· तदेव घटत्ववान्नवेति संशयानुभवात्· ज्ञानपारतंत्र्येण तद्वत्त्व
ग्रहेपि तद्वत्त्वसत्तानिश्चयाभावात् प्रामाण्यग्रहः संभवत्येवेति स्वोक्तविरोधाच्च· किमनुपपन्नमिति· अत्र वद
त्वा न्ति· ज्ञानग्राहकत्वप्रयुक्तविषयग्राहकं सामग्रीत्वस्य कोर्थः· ज्ञानग्राहकत्वव्यापकं विषयग्राहकत्वं यस्या इति
वा· विषयग्रहार्थं ज्ञानग्रहहेत्वतिरिक्तानपेक्षत्वं वा· विषयग्रहार्थं ज्ञानग्रहहेत्वतिरिक्तकारणानपेक्षेतिवा· ज्ञा
नग्राहकसामग्रीत्वावच्छेदकधर्मावच्छेदेनैव पर्याप्तं विषयग्राहकत्वं यस्या इति वा· नाद्यः· अप्रमापदेपि तदभावात्· न
हि अप्रमापदेपि वर्त्तमानं ज्ञानग्राहकत्वं विषयग्राहकत्वव्याप्यं ज्ञानपदव्यभिचारात्· तत्र ज्ञानग्राहकत्वे सत्वेपि विष

यग्राहकत्वाभावात्॰प्रमापदावछिन्नंज्ञानग्राहकत्वंव्याप्यमितिचेत्॰तर्हिघटज्ञानवाक्यावछिन्नज्ञान
ग्राहकत्वमपितथेत्यतिप्रसंगतावदस्थ्यं॰नद्वितीयः॰प्रमानुमितोव्यापकतावछेदकत्वस्यप्रमापदेनविशेष
णशक्तत्वस्यविषयग्रहार्थमतिरिक्तस्यापेक्षणात्॰नतृतीयः॰घटज्ञानेबुद्धिस्थेशक्तस्यसर्वनामतत्पदादे
रेकयेवशक्त्याविषयज्ञानोपयबोधकतयातिप्रसंगतादवस्थ्यात्॰नचतुर्थः॰तत्रैवातिप्रसंगादिति॰उच्यते॰
यद्धियेनविनाननासतेतद्धाहेतुस्तमपिबोधयतीतिसर्वजनसिद्धम्॰तथाचविषयनिरपेक्षज्ञानानवगाहिज्ञा
नग्राहकत्वरूपेणविषयग्रहंप्रतिहेतुतायस्याःसासामग्रीविवक्षिता॰घटज्ञानादिशाब्दात्मिकासामग्रीयद्यपि
विषयनिरपेक्षंज्ञानंनशक्नोतितथापिविषयग्रहंप्रतिनतेनरूपेणहेतुता॰समानाधिकरणाव्यवहितका
लवृत्तिज्ञानग्रहएवतथानियमात्॰तदिदमुक्तंस्ववृत्तिवर्त्तमानेत्यादि॰नचैवंयावत्पदव्यर्थंप्रमापदादेनि
रुक्तसामग्रीत्वविरहादितिवाच्यम्॰उपनीतप्रामाण्यावगाह्यनुव्यवसायमादाययावत्पदोपादानाभावेसिद्ध

वि·प्र·म·

64

साधनात्· न च ज्ञाततालिंगकानुमितेस्तथा सामग्रीत्वमसिद्धम्· प्रत्यक्षस्यानातिषिक्तायास्तस्याः परैस्त
थात्वांगीकारात्· न च न्यायमते तथात्वमसिद्धं· एवं सति स्वप्रकाशाज्ञाततालिंगकानुमित्योर्नैयायिकैरस्वी
कारान्न तु नयमादाय गुरुमतद्वयोः कथं स्वतस्त्वं· स्वमते सिद्धज्ञानग्राहकत्वमादायेति यदि· तदा निरुक्तसामग्री
त्वमपि स्वमते सिद्धमेवास्त्विति· यद्वा· शाब्दव्याप्यनुपनीतं विशेष्यप्रकारीभूतधर्मवैशिष्ट्यं गृह्णाति स्वसमाना
धिकरणावच्छेमानज्ञानं च विषयीकुर्वंतियावंतिज्ञानानि तद्विषयत्वं स्वतस्त्वं· यावत्पदं च पूर्वोक्तसिद्धसाधन
वारणाय· घटोस्तिज्ञानवान्देवदत्त इति वाक्येन जनितं देवदत्तज्ञानमनुमित्या जनितेतादृशदेवदत्ता
नुमितिं च वारयितुं शाब्देत्यादिविशेषणम्· ज्ञानोल्लिखितप्रकारावच्छिन्नविशेष्यग्राहकताज्ञानग्राहकता
पर्याप्त्यधिकरणावच्छेदनयत्रपर्यवसिता सा वा सामग्री विवक्षिता· तेन विकल्पसंशयादिपदवारणं सर्व
नाम तिन्नत्वं च विशेषणमिति संक्षेपः· प्रगल्भस्तु· उभयवादिसिद्धं प्रामाण्यग्राहकत्वं यस्यास्तज्ज्ञानायावतीज्ञा

नग्राहिकासामग्रीतज्ज्ञाप्यत्वंस्वतस्त्वमित्याह· अत्र च सामग्रीपदेन यद्विज्ञानग्रहरूपफलोपहितंकारणंवक्त
मुच्यते तदा तज्ज्ञाप्यत्वं तज्ज्ञानग्रहविषयत्वं· यदि तु सामग्रीपदेन लक्षणया ग्राहक एवानुव्यवसायादिरुच्यते तदा
सविषयकज्ञानग्राहकसामग्रीजन्याः यावन्तो ग्रहास्तद्विषयत्वं साध्यं· तेन क्वचिद्बाधादेः क्वचिदनुव्यवसायादेर्ग्रा
हकाच्च निर्देशेन विरुध्यत इति ध्येयम्· ननु यदाऽप्रामाण्यारोपस्तदा विरोधाभावादप्रामाण्यारोपे प्रामाण्यं गृह्य
त एवेति बाधाभावेन व्यर्थमप्रामाण्याग्राहकेति विशेषणमित्यत आह· इदमिति· सर्वसाधारणम्· प्राभाकरमतसा
धारणं· नन्वप्रामाण्याग्राहकेति विशेषणेऽपि बाध एव· तथापि प्रमान्तेज्ञाने इदं ज्ञानं न प्रमेति ग्रहणमनुभूय
ते· तत्र प्राभाकरमतेनान्यथाख्यातिरूपं· तैरन्यथाख्यात्यनंगीकारात्· किंतु शुक्ताविदं रजतमिति वत्स्मृत्यनुभवा
त्मकं ज्ञानद्वयमेव तत्र चेदं ज्ञानमिति ज्ञानस्य मानसोऽनुभवोऽप्रमेति प्रामाण्यस्मरणम्· तथा चेदं ज्ञानमिति ज्ञानेमा
नसानुभवेनाप्रामाण्याग्राहिणा प्रामाण्यं न गृह्यत इति बाधतादवस्थ्यमत आह· तेऽत्र चेति· अप्रामाण्यग्राहक

सामग्र्यसमवधानमप्रामाण्यग्राहकशब्देन विवक्षितं· मानसे तु ज्ञानानुभवेऽप्रामाण्यस्मृतिरूपाप्रामाण्यग्रहज
नकसामग्रीसमवधानान्नाप्रामाण्यग्राहकत्वमस्तीति मतेन बाधो गुरुमत इति· तच्चेति हीति· इदंत्वप्रतियोग्यन्वय
माद्याय· ग्राहकत्वाभावेन तत्रेत्यस्यान्वये दोषाभावादिति· अग्रेतनेति· संशयस्थले हि धर्मिज्ञानमप्रामाण्यस्म
त्यात्मकेनाप्रामाण्यग्राहकेण समवहितमेवेति तस्याप्रामाण्यनिश्चायकत्वाभावात्संशयः संभवत्येवेति भावः· अथ धर्मि
धर्मिज्ञानं तदनन्तरमप्रामाण्यस्मरणं ततश्च संशय इति क्रमेण संशयोत्पत्तौ प्राथमिकधर्मिज्ञानस्याप्रामाण्यस्म
त्यसमवहितत्वेन प्रामाण्यनिश्चयस्य जातत्वान्न संशयः स्यादित्याह· प्रागिति· तत्प्रामाण्यविरोधीति· तद्रूपस्य प्रामा
ण्यस्य विरोधीत्यर्थः· तथा च तत्पदं प्रकृतप्रामाण्यपरं षष्ठ्यन्तं अप्रामाण्यपदं च विरोधिमात्रपरम् अन्यथाऽनन्वया
दिति ध्येयम्· ननु तस्य यत्प्रामाण्यं तद्विरोधीत्यर्थः· शब्दार्थयोरसाधुत्वापत्तेः· नञाव्यवधानात्· अयं वह्निरिति ज्ञा
नस्य इदंत्ववतीदंत्वप्रकारकत्वरूपप्रामाण्यग्रहकाले तस्य वह्नित्ववति वह्नित्वप्रकारकत्वरूपं यत्प्रामाण्यं तद्वि

ज्ञातस्य सामान्यप्रत्यासत्तित्वे ज्ञातस्य प्रकारत्वमेष्टव्यं तथा च धर्म्मिणि गृह्यमाणे पूर्वाज्ञाता अपि धर्म्माः प्रकारीभू
यन्नासेरन्निति तत्कोटिकः संशयो न स्यादित्यर्थः इदं चापाततः इदं त्वावच्छेदेन प्रकारीभूतो हि धर्म्मः संशयविरोधी ।
प्र न च सामान्यप्रत्यासत्तिजज्ञाने सामान्यं तथाकारः तस्माद्विशेषणज्ञानकारणताग्राहकयुक्त्यैव नाज्ञातस्य सामा
न्यस्य प्रत्यासत्तित्वं तस्याग्रिमज्ञाने विशेषणत्वनियमादिति तत्त्वं फलीभूतज्ञाने प्रकारस्य सामान्यस्याज्ञातस्यप्र
नकत्वमिति संशयोऽप्यनुपपन्न इत्यर्थ इति केचित् । तज्ज्ञानं चेति । न चेच्छायां गृहीतं प्रमात्वं यच्च प्रत्यासत्तिः तत्र सि
द्धसाधनोद्धारः कथमिति वाच्यं । तज्ज्ञानपदेन प्रमात्वाश्रयमात्रस्याभिप्रेतत्वात् । क्वचित्सामान्येति । प्रमापदेन य
च्च प्रमात्वं सामान्यमुपस्थाप्यते तच्च सामान्यप्रत्यासत्त्या प्रमात्वेन धर्म्मिणः कोडीकृतत्वात्तस्य ज्ञान एव विषय
तयापि तत्त्वात् घटः क्वचित्सामान्येत्यादि । दित्यर्थः । न च यत्पदकेति । न च सांप्रतमित्यन्वयः । यस्य घटज्ञानस्य कोऽपि घटत्व
वति घटत्वप्रकारकत्वमनुमितं तद्रूपं यत्र ज्ञानं तद्विषयकज्ञानाप्रयुक्तत्वं सामान्यप्रत्यासत्तिजन्यबोधस्या

चिं.प्र.म.

16

स्यैवेति सिद्धसाधनमिति नचेत्यर्थः । तत्रेति । तथा च प्रामाण्याश्रयीभूतं यत् घटज्ञानान्तरं तत्प्रयुक्तं सिद्धसाध
नं स्यादित्यर्थः । प्रामाण्यमात्रस्य । ज्ञाताज्ञातसाधारणस्य । तज्ज्ञानविषयकज्ञानाजन्येत्यत्र सामान्याभावगर्भि
तामभिप्रेत्याह । आद्येति । अत एव योगीति । अत्र यद्यपि योगिप्रत्यक्षं तत्तत्त्वविषयध्यानजन्यमित्यंगीकारे यो
गजधर्मः प्रत्यासत्तिर्न स्यात् ज्ञानस्यैवासत्तित्वसंभवात् । तस्मात् तत्त्वध्यानजन्यः संस्कारो धर्मो वा प्रत्यासत्ति
विषयगोचरं योगिनां प्रत्यक्षं जनयतीति स्वीकार्यम् । तत सर्वासंगतमेतत् । तथापि च बहिर्विप्रकृष्टं च योग्यं यो
गी गृह्णाति न त्वयोग्यमपि । यत्राप्यतिशयो दृष्टः स स्वार्थानतिलंघनात् । दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तिरि
ति मतेन प्रामाण्यस्यायोग्यतया योगजप्रत्यक्षाविषयत्वेन सिद्धसाधनपरिहारे उपनीतभानात्मकं योगिप्रत्यक्षमा
दाय ग्रंथो योज्य इति । यद्वा ज्ञातस्यैव प्रकारतया प्रकारत्वानुरोधेन योगिनोपि तज्ज्ञानविषयकज्ञानापेक्षात्प्र
कारत्वाभावे तु साध्याप्रसत्वादेव न सिद्धसाधनमिति भावः । ज्ञानेति । उपनीतभानात्मकमित्यादिकल्पे अप्रसत्वादि

12

रोधिनो वह्नित्वाभाववतीत्यादेरप्रामाण्यस्याग्रहणाच्च । वह्निरिति समूहालंबनस्येत्याद्युक्तयुक्त्यनुरोधेनांशांशे

दविवक्षा इहापि कार्येति स्मर्तव्यं । वस्तुतो नांशांशे दविवक्षाप्रयोजनं वह्निरिति समूहालंबने घटान्तरावच्छिन्नस्य वह्नि

त्वाभाववति वह्नित्वप्रकारकत्वस्यांशान्तरावच्छिन्नं वह्नित्ववति वह्नित्वप्रकारकत्वं प्रति विरोधाभावादिति । तज्ज्ञानवि

षयकेति । अत्र तज्ज्ञानपदेन परकीयं तत्प्रामाण्याश्रयीभूतं ज्ञानं । व्यतिरेकपदेन प्रागभावः । अप्रयुक्तपदेन तदन्वयाद्य

नुविधायि युक्तरसमयसम्बन्धित्वं । द्वितीयव्यतिरेकपदेनापि प्रागभावः । प्रकारपदेन प्रामाणसमानधर्मत्वाख्यसंबं

ध उच्यते । तेनेत्यादि दूषणमलग्नकं भवतीति संबंधः । दूषणमाह । तद्विषयकेत्यादिना । अत्र प्रथमं ईश्वरज्ञानमादा

य विधिकोटौ सिद्धसाधनं योज्यं । न च मीमांसकैरीश्वरानंगीकारान्न सिद्धसाधनमिति वाच्यम् । यत्रात्मन्यनुमिति

स्तत्र तत्सिद्धेः प्रतिबंधकत्वात् । अनुमातरि च नैयायिके सिद्धिरस्त्येव । तद्वारणाय जन्यपदानन्तरं जन्यपददानेऽप्र

सिद्धिः । तज्ज्ञानविषयकेन ईश्वरज्ञानेनाजनितस्य जन्यज्ञानस्याप्रसिद्धेः । बाधपदेन च प्रसिद्धिर्बाध एव विवक्षि

वि·प्र·म· तद्धतिध्येयम्·अप्रसिद्धिमुद्धरति·ईश्वरज्ञानस्येति·सिद्धसाधनमुद्धरति·तदप्रयुक्तेति·समानाधिकरणेति·

67 तज्ज्ञानविषयकसमानाधिकरणज्ञानाऽन्यसामान्यप्रत्यासत्त्यजन्यसमानाधिकरणज्ञानग्राह्यत्वं तज्ज्ञानविष

यकजन्यज्ञानाऽन्यसामान्यप्रत्यासत्त्यजन्यजन्यज्ञानग्राह्यत्वं वा विधिकोट्यर्थो विवक्षितामित्यर्थः· व्यर्थेति·

यद्यपि सिद्धसाधनवारकत्वेन सार्थकत्वं तथापि व्याप्तिग्रहोपयिकविशेषणस्यैव सार्थकत्वनियमस्यैतेरनंगी

कारात्·तथापि सामान्येत्यादिविशेषणस्याप्रसिद्ध्यावैयर्थ्यमिति·नन्वविवक्षिते तत्र साध्येपि अनुमित्या सिद्धसाध

नं·तथाहि·तज्ज्ञानविषयकं पदज्ञानं तेन यद्यप्यनुमित्यादिर्जन्यते तथापि जनकीभूतज्ञानव्यतिरेकाप्रयुक्तव्यति

रेकप्रतियोग्येव·अप्रयुक्तत्वं जन्यत्वं·न चानुमित्यादेर्व्यतिरेकं ज्ञागन्नावलम्बनः तज्ज्ञानविषयकज्ञानव्यतिरेकजन्यः

प्रागभावस्याऽजन्यत्वादित्यत आह·यथा चेति·प्रमेतीति·घटत्ववति घटत्वप्रकारकत्वरूपसामान्यप्रत्यासत्ति

जन्यज्ञानमादाय सिद्धसाधनमित्यर्थः संशयानुपपत्तेरिति·सामान्यप्रत्यासत्तेः स्वजन्यज्ञाने प्रकारत्वनियमाद

ज्ञाने त्यर्थः· अतो न पौनरुक्त्यं· अनुव्यवसायस्येति· ज्ञानप्रत्यासत्तिजन्यप्रामाण्यज्ञानस्येत्यर्थः· इत्यादिनेति· इदं
ज्ञानं प्रमेति प्रमात्वमप्रमायां पूर्वाज्ञातमेव गृह्णतीत्यत्र इष्टमतेऽनुमित्यादिपदार्थः· सिद्धसाधनं· अर्थांतरं· एवम
न्यत्रेति· प्रमावानयमिति शाब्दबोधादौ· तत्रापि पदार्थज्ञानस्य तन्मतेऽहेतुत्वादिति· सिद्धसाधनापत्तेरिति· अ
र्थान्तरापत्तेरित्यर्थः· न च परधर्म्मता ज्ञानं न स्वप्रकाशात्मकमिति तदर्थं तद्भिन्नज्ञानापेक्षणं ज्ञानस्वरूपधर्म्मवत्तायाः
स्वप्रकाशेन ज्ञानेऽपि ज्ञानत्वत्वस्याग्रहणात्· व्याप्यतावच्छेदकप्रकारकज्ञानस्य चापेक्षितत्वादिति वाच्यं· विषयताख्ये
न संबंधेन यत्र प्रमात्वानुमितौ लिंगं तत्र स्वप्रकाशेनैव सकलनिर्वाहात्· संभवतीति· सामान्यप्रत्यासत्त्यनंगीकर्तॄणां
साध्यप्रसिद्धेरनपेक्षितत्वादिति भावः· सिद्धेति· अर्थान्तरवारणार्थमित्यर्थः· ज्ञानपदसमभिव्याहारात्तु तदाश्रये
लब्धे तद्विषयं ज्ञानं परं ज्ञानत्वेनापेक्षितमेवेति भावः· आत्मादिभिरिति· अतद्गुणसंविज्ञानो बहुव्रीहिः· तेन शरीरा
दिभिरित्यर्थः· आत्मादेः प्रागभावाप्रतियोगित्वादिति· ननु व्यापारानुबंधिविषयताके न व्यवसायादिनाऽनुव्यवसाया

चि·प्र·म·

५८

देर्जनमात्रज्ञानपददत्तेपि अप्रसिद्धितादवस्थ्यमित्यत आह· ज्ञानपदेति· तैरिति· शारीरादिभिरित्यर्थः· परेति· प्रमा
न्तरगोचरेणाज्ञानेन जनितायाप्रमान्तरगोचरेच्छायास्तत्प्रकारत्वेन प्रामाण्ययदर्थान्तरं तद्वारणार्थं चेत्यर्थः· अंशतः सि
द्धसाधनवदंशतोर्थान्तरस्याप्यदोषत्वमभिप्रेत्याह· वस्तुत इति· प्रमापदप्रवृत्तिनिमित्तत्वादिनाऽनुगतेन रूपेण घट
वति घटत्वप्रकारत्वादीनां परूत्यान्तदंशो इच्छामादाय यदर्थान्तरम्· यत्र च सर्वं प्रमा वानित्यनुमितिमादायार्थान्तरमुक्तं
तत्र नभवतीत्यर्थः· नचैवं चरमज्ञानपदवैयर्थ्यं स्यादिति वाच्यं· प्रथमव्यावर्त्यनैव सार्थकत्वात्· इदं च नवीनमतानुसा
रेण· प्राचीनमते त्वंशतः सिद्धसाधनांशतोर्थान्तरवारकयोः सार्थकत्वात्· अत एव प्रथमज्ञानपदस्यांशतोर्थान्तरवारकस्य
सार्थकतेति ध्येयं· प्रागिवेति· तत्सानतद्विषययोरित्यर्थः· पूर्वं यावज्जन्यसाध्यसत्त्वेन तत्सानतद्विशेषयोः प्रस्थलविशेष
प्रसिद्धिः· प्रकारीभूते च सर्वस्मिन्नप्रसिद्धिरित्युक्तं· अत्र तु संभवमात्रस्य साध्यतया सर्वत्र तत्सानं तद्विषययोः प्रसिद्धिरि
ति विशेषः· उक्तक्रमेणेति· साध्यप्रसिद्धेः परमतेऽनुमित्यनंगत्वेनेत्यर्थः· तस्याः विधिप्रसिद्धेः· एवं· अप्रामाण्यस्यापि साध्य

प्रसिद्धिनिरपेक्षानुमितिविषयतायां॰गृह्यमाणप्रामाण्यव्यापकमिति॰गृह्यमाणसकलप्रामाण्यनिष्ठमित्यर्थः॰
संशयेपीति॰निश्चयस्यापेक्षितत्वादितिभावः॰संकोचेति॰इदंचसर्वमाधिसौकर्य्यादुक्तं॰ईदृशानुमित्यगोचरतायाअ
निश्चयेनसंकोचस्यासंभावितत्वादिति॰नन्वेवंतदनुमित्यविषयएवप्रसिद्धेरुक्तत्वादितिपूर्वोक्तमसंगतं॰तादृशानु
मित्यविषयतायानिश्चेतुमशक्यत्वादित्यनुरुचेराह॰वयंत्विति॰धर्मिणीति॰ज्ञानस्वरूपइत्यर्थः॰धर्मस्यैव॰ज्ञानस्यैव॰
ननुघटत्वंबुद्धिस्थीकृत्यघटत्ववतिघटत्वप्रकारकत्वपरतयाप्रयुक्तेनतद्वतितत्प्रकारकमितिवाक्येनपटत्वंबुद्धि
स्थीकृततद्वतिभ्रोतरिपटत्ववतिपटत्वप्रकारकमिदंज्ञानमितिविसंवादिशुकादिवाक्यजज्ञानंतज्जन्यसामान्यप्रत्यासत्ति
जज्ञानंचादायसिद्धसाधनं॰४कत्वंबोध्यतेतत्रप्रकृतप्रामाण्याश्रयीभूतपरज्ञानविषयकज्ञानस्यानपेक्षितत्वात्सिद्ध
साधनं॰किंचपटत्ववतिपटत्वप्रकार४किंचप्रामाण्यघटकान्घटत्वादिपदार्थान्विशकलितानेवज्ञानतोविशेष्य
विशेषणमितिन्यायेनोत्पन्नंमानसज्ञानमादायसिद्धसाधनं॰किंचविषयत्वंविहायप्रकारत्वपर्यन्तधावनेऽपिघ

वि·प्र·म·
69

यत्वसामान्यज्ञज्ञानमादायसिद्धसाधनवारणाय·तच्चव्यावर्त्याप्रसिद्धिः·अर्थान्तरवारकत्वेनसप्रयोजनत्वेऽस्तिधे
यमस्तीत्यादिशाब्दज्ञानप्रयुक्तसिद्धसाधनवारकत्वेनव्यावर्त्यप्रसिद्धौचसत्यामपिप्रकारत्वस्यानिरुक्तिः·तथाहि·न
तावद्धूनकीभूतज्ञानविषयत्वंतत्·परमतेबाधात्·नापिज्ञासमानधर्म्मत्वरूपसंबंधकत्वंचअभिधेयवानित्यादिवा
क्यजबोधमादायसिद्धसाधनतादवस्थ्यात्·असाधारणधर्म्मानवच्छिन्नस्यप्रकारत्वंविवक्षितं·अत्रचाभिधेयत्वा
द्यवच्छिन्नस्यप्रकारत्वमितिचेत्·न·एवंसतिसाधारणधर्म्मानवच्छिन्नस्यविषयत्वमेवोच्यतांकृतंप्रकारपर्य्यन्तधावनेन·
यच्चप्रमावानयंइदंज्ञानंप्रमेत्येवंरूपामनुमितिप्रमापदादिजन्यशाब्दज्ञानंचादायार्थान्तरमाशंकितंपदबहिर्भावि
एवचसमाहितं·तदपिनमनोहरं·साध्यतावच्छेदकज्ञानस्यपदार्थतावच्छेदकज्ञानस्यचपरमतेप्यपेक्षिततयानिरधि
करणकस्यचप्रमात्वस्यप्रमात्वत्वस्यवाग्रहाभावेनार्थान्तरानवकाशात्·पदबहिर्भावस्यचतादृशानुमित्याद्यविषयता
निश्चयाभावेनदुष्टत्वात्·यच्चप्रथमज्ञानपदप्रयोजनमुक्तंज्ञानंप्रमेत्यनुमितिमादायार्थान्तरवारणम्·तदपिन·त

त्रापि साध्यतावच्छेदकप्रमात्वग्रहावश्यकत्वेनार्थान्तरानवकाशात्· यावज्ज्ञानरूपे धर्म्मिणि व्यतिरेकप्रसिद्धिः सापि
न परमते संभवति· तन्मते पूर्वज्ञातस्य प्रकारत्वादिति· अत्रोच्यते· शाब्दप्रयोज्येति चरमज्ञाने विशेषणदाद्य दोषत्रयो
द्धारः· विशिष्टप्रकारत्वेनाभिमतं· न च विशेष्ये विशेषणमिति रीत्या जायमानं मानसं ज्ञानं विशिष्टं प्रकारीकरोति· वि
शेषणतावच्छेदकविशेषणसंसर्गस्य विशिष्टमध्ये निविष्टस्य पूर्वाज्ञातत्वेनाप्रकारत्वात्· परमते च ज्ञानप्रत्यासत्त्र
त्यावेन तादृशं ज्ञानमेव नास्तीति चतुर्थदोषोद्धारः· अत एव प्रकारत्वपर्यन्तधावनमिति पंचमदोषोद्धारः· तदपि न मनो
हरमिति द्रुम्लपरि· न दोषावहं· पूर्वपरूपरीहारो च परकीयाववेति तद्दोषेपि न क्षतिः· यद्वा· समर्थप्रवृत्तिजनकता
न वच्छेदकधर्म्मावच्छिन्नत्वावानित्यनुमितौ समर्थप्रवृत्तिजनकतावच्छेदकधर्म्मवत्वस्य साध्यतावच्छेदकस्य पटज्ञानादौग्र
हे परद्धर्म्मताबलात् घटत्वप्रकारकत्वावच्छिन्नं ज्ञानमवगाहमानायामर्थान्तरं स्यादतः न च तत्र साधारणधर्म्मावच्छे
देन घटत्ववतीत्यादेः प्रकारतेति वाच्यं· प्रकारांतरवन्निर्दिष्टधर्मो साधारणः पक्षधर्म्मताबलात् घटत्ववतीत्यादिप्रका

रतयाज्ञासमानेपरत्ववत्तात्यादिकमपिनप्रकारः येनसमर्थप्रवृत्तिजनकतावच्छेदकधर्म्मत्वंसाधारणंस्यात्॰अत
एवयत्नप्रथमेत्यादिदोषोद्धारः तच्चाप्युक्तरीत्याऽर्थान्तरसंभवात्॰पद्रु बहिर्भावश्चस्वमात्रप्रतीतवस्तुविशेषज्ञानप्रा
माण्यंपक्षीकुर्वतोज्ञाकयएवेति॰ज्ञानरूपेधर्मिणिप्रसिद्धिश्चमतभेदेनैवोक्तेति॰नचैवंसकलसाधारणव्यतिरेकप्रसि
द्धिःक्वेतिवाच्यं॰घटज्ञानत्वावच्छिन्नप्रतियोगिकाभावत्वादिलक्षणधर्म्मेव्यतिरेकप्रसिद्धेःसुलभत्वादिति॰अत्रगुरुम
तेतत्पदादानेज्ञानाख्यलिंगज्ञानेनजनितायामात्मानुमितौयत्प्रामाण्यंतेनैवानुमित्यादिनागृह्यतेतत्रांशेतोबाधः
स्यात्॰नचतदेवानुमित्यादियत्रजनकंतत्प्रामाण्येबाधतावेदस्यपं॰तस्यपद्रुबहिर्भावात्॰मुरारिमतेचज्ञानानुव्य
वसायप्रामाण्येतदनुव्यवसायग्राह्येतददानेंशेतोबाधःस्यात्॰भट्टमतेपिज्ञाततालिंगकानुमितेःज्ञानगोचरज्ञानजन्य
त्वनियमात्॰ज्ञानत्वादेःसाध्यतावच्छेदकस्यज्ञानएवग्रहाद्बाधःस्यात्॰तस्मान्नज्ञानविषयकज्ञानव्यतिरेकाप्रयुक्तव्यतिरे
कप्रतियोगित्वाद्वाप्रयोज्यज्ञानेसाधारणधर्म्मानवच्छिन्नप्रकारताकत्वेचितयसाधारणमनवद्यं॰एतद्व्यतिरेकस्यानुमित्या

ज्ञाबुज्ञानेनतदुपनीतभानेनचनियमतस्तज्ज्ञानविषयकज्ञानसापेक्षत्वेनप्रामाण्यग्रहंवदतांनैयायिकानामविकला
इतिसंक्षेपः॥ अतइत्यादीनिदूषणानिअलग्नकानीतिसंबंधः॥ दूषणान्याह॥ नेत्यादि॥ नसमीहितसिद्धिरित्यन्वयः॥ त
थेति॥ नसमीहितसिद्धिरित्यर्थः॥ यद्यपिप्रामाण्यंस्वाश्रयग्राहकेणगृह्यतएवेत्यस्यायमर्थः॥ स्वाश्रयग्राहकैःप्रामाण्यंगृह्णा
त्येवप्रामाण्यग्रहणकर्त्रैवेतियावत्॥ तथाचप्रामाण्यंस्वकर्म्मकग्रहणकर्तृतानियतस्वाश्रयग्राहकत्वमित्यर्थपर्य्यवसा
नेसमीहितसिद्धिर्नवस्त्येवतथापिकुसृष्टिर्नास्याः॥ ग्रमूलेयावत्स्वाश्रयग्राहकेणग्राह्यत्वस्यकंठोक्त्याचसपदोनादृत
इतिध्येयम्॥ इत्यादीनीति॥ प्रामाण्यमेवस्वाश्रयग्राहकेणगृह्यतइतिविशेष्यसंगतेवकारपक्षेनसमीहितसिद्धिर्बाधस्ये
प्रथम त्यादिप्रागुक्तार्थः॥ ज्ञानत्वेनेति॥ यद्यपिविप्रतिपत्तावपिज्ञानपदंस्वाश्रयपरमेव॥ तथापितदाज्ञानान्तरसंवादप्रवृत्तिफलि
कापर्य्यालोचनयातत्रस्वाश्रयज्ञानपरंइहतुस्वाश्रयमात्रपरमितिभेदः॥ प्रथमविप्रतिपत्तौयावज्ज्ञानग्राह्यत्वेनवस्तुव्य
मानेबाधात्॥ द्वितीयविप्रतिपत्तौतज्ज्ञानग्राह्यत्वेनवस्तुव्यमानेईश्वरज्ञानादिग्राह्यतयासिद्धसाधनात्॥ यावत्त्वविशे

वि·प्र·म·

७१

विशेषणस्यचाभावात्तकप्रमितरांशांविनासमीहितसिद्धिरित्यतआह·ज्ञानपदादीनामिति·अयंभावः·प्रथमविप्रति
पत्तौप्रामाण्यपदंविशेषपरंभाष्येवज्ञानपदंतदाश्रयपरं·द्वितीयविप्रतिपत्तौचस्वरसज्ञानपदेनतत्रप्रामाण्याश्रयास्य
प्रादिज्ञानमेवगुरुत्वेणसामान्याकारेणाभिमतं·तथाचविशिष्यतद्देवोव्यतांनतमितरविशेषणाद्यासेरिति·सिद्धसाधनवा
रणात्वादिति·यावदर्थकत्वादितिभावः·यथाविवक्षितसाध्ये·यावत्त्वाश्रयग्राह्यत्वरूपे·प्रामाण्यमात्रे·सर्वस्मिन्प्रामाण्ये· गाहक
तथापीति·सर्वविशेष्यकत्वेसतिसर्वत्वप्रकारकत्वरूपप्रामाण्यस्यईश्वरज्ञानादावेवसत्त्वायावत्त्वाश्रयग्राह्यत्वादंश
तःसिद्धसाधनमित्यर्थः·अन्यत्वमपीति·अत्रयत्सर्वत्ववतिसर्वत्वप्रकारकज्ञानतज्जनकंसर्वज्ञाद्यादिकमादिपदेनसंग् मूल
हीतमित्यपिद्रष्टव्यम्·तेनतादृशाशाब्दज्ञानादिकमादायनांशतःसिद्धसाधनं·घोटाप्रत्यासत्तीति·उभयसिद्धप्रमात्व
विषयताकभिन्नत्वंपरोक्षमत्रविवक्षितं·अतोनसर्वज्ञाद्यादिज्ञानमादायदोषः·तादृशशाब्दज्ञानादिप्रसिद्धेर्नैयायिक
सिद्धप्रामाण्यविषयताकभिन्नत्वमपिविशेषणंज्ञानेदातुंशक्यमतएवेत्यप्यरूविर्द्रष्टव्या·अत्रापीति·अप्रामाण्याग्राह

ष्यकमेवज्ञानंप्रवर्त्तकं· तथाचवह्नित्वप्रकारकेभ्रमेव्यभिचारवारणायदाहसमर्थेति· वह्निगुंजयोर्विप
रीतसमूहालंबनेव्यभिचारवारणायवह्नित्वप्रकारकेति· सतिसप्तमीमहिम्नादाहसमर्थविषयकप्रयत्नज
नकत्वावच्छेदनदाहसमर्थविशेष्यत्वावच्छेदेनवह्नित्वप्रकारकत्वलाभात्· नचगुंजावह्न्योर्वह्नी इतिभ्र
मात्मकसमूहालंबनेव्यभिचार इतिवाच्यं· दाहसमर्थविषयकप्रयत्नमात्रजननानुकूलवह्नित्वप्रकारक
त्ववन्निश्चयस्यदाहसमर्थमात्रविशेष्यकवह्नित्वप्रकारकत्ववन्निश्चयस्यचविवक्षितत्वात्· नचनिश्चयपदवैय
र्थ्यं· प्रथमचतुर्थसाध्ययोस्तदप्रवेशात्· वह्निविशेष्यकेऽयंवह्निर्गुंजावेतिसंशयेऽवह्निवृत्तेःविशेष्यावृत्तेः
वह्नित्वस्याधिकरणस्यवह्न्यवृत्तेश्चगुंजात्वस्यप्रकारतयासाध्यचतुष्टयाभावेनतत्रैवनिश्चयपदप्रवेशात्· प्र
थमचतुर्थसाध्ययोरपिसंशयव्यावृत्तिलाभायनिश्चयप्रकारीभवद्वह्नित्वाभाववद्विशेष्यकोन· निश्चयप्र
कारीभवद्वह्नित्ववद्विशेष्यकोनेत्यत्रपर्यवसानेनानिश्चयपदस्यसार्थकत्वात्· नचएकधर्म्मिकविरोधिना

नाप्रकारकशानानामानत्वंनिश्चयत्वंतन्नयोग्यत्वानागच्युमशानमरास्थ्यवार्थइतिवार्था·नितिश्च्यानानावा
स्यमशनेचयानमेवाद्य·यद्वा·निश्चयत्वंजातिरेवेतिनयुर्यनेतिवदन्ति·तत्रप्रथमपक्षेयुर्योमप्रामाणे
दितिरुच्यते·एवंचसर्वमेवेति·वह्निगुंमनोतित्यादिलातादित्यनमनुपपत्ति·यत्तिति·वह्निनिश्चयकेज्ञ्यादि
पवेयादित्वंत्रमनुपपत्ति·निश्चयपदंचेति·तच्चव्यधिकरणेति·तथाचवह्नित्वव्यधिकरणोत्यादिप्राप्यन
यालावच्छलितावः·इदमुपलक्षणं·अपरेसाध्यत्वयस्याप्रमावाच्यवः·तत्वयथाश्रुतनिश्चयप्रमाणमानाय
यांकांतिरयाणिमचेति·शाहेत्यादिकमिति·प्रथमहेतावाश्चसमर्थविषयकाप्रमत्वजन्यत्वं·द्वितीयहेतौसुवा
धमत्यर्थविशेषकावमितपर्थः·प्रमुष्टेति·प्रमुष्टतत्ताकेस्मरणरूपेप्रमुष्टदंताकेप्रमातरूपेयत्किंचिस्प्रकारः·व
प्रमेविशेष्यावच्छेदिप्रकारकोनेनिमामासोवादितिभावः·अत्रावयवीति·वह्नित्वमधिकरणेति·नभ्रमेयतोति·साध्य
त्वयस्यप्रमुष्टतत्वेप्रमावद्विभ्रमेसस्यालतत्वाहेत्यादिकमत्यर्थकमेवेतिस्फुटत्वा·भुमेयमत्सोत्रंयंपविरो

यं वा वह्निरित्यादिना शेषस्येमात्सुपलस्वतीयसाध्ये निश्चयपदं दृष्टयति । विशेष्यतयाशनीति । विशेष्यतावच्छिन्नवह्नि
त्वप्रकारकत्वाशाबाधा वह्निधर्मिकसंशयेसत्वान्नधारणायमिश्चयपदं व्यर्थमित्यर्थः प्रमाणांतरावीतमेति । विधेयवह्नि
त्वस्य अवच्छिन्नत्वादित्तिशायः इदमुपलक्षणं अवच्छिन्नीतिसाध्ये पी इदंतास्येति प्रकारविशेषणोपलक्षणम्यं वह्नि
रित्यप्रवृत्तिप्रकारकत्वावच्छकत्वे उक्तसंशयेसाध्यसत्वेनतिश्चयपदं व्यर्थमितापि ध्येयम् । यथा अत्र मात्रमकप
ममूलत्वनवारणाय वह्नित्वप्रकारकपदमिति यत्तित्यादिना तदिदं । तद्युक्तमंत्राशे देननयसाध्यसत्वादिस
पि इत्यर्था । विशेष्यमानस्येति । विशिष्टबत्वदृष्टोत्यर्थः अन्येदमि । अमेदविषयकत्वनियमेत्यर्थः प्रमुष्टेति । तथा
चप्रागुक्तसमर्थविषयकेति । अर्थतत्पतज्ञानकत्वेनैवतद्धारणादिति भावः । निश्चयत्वकादी मवदित्यादि इत्यपिउ
पात्सुपदति । यत्प्रकारेति । तत्कालीनेति । इदमुपलक्षणम् । एवसमानविशेष्यकत्वमपि बोध्यं । अन्यथाधिकांतरगोचर
वह्नित्वप्रकारकनिश्चयसमानकालोत्पन्नसंशयव्यावृत्ते रिति । अयं विशिष्टेति । तावह्नित्वप्रकारत्वावच्छिन्नत्वस्येति

वि·प्र·म·

१३

शेषः तथा च तदभावाप्रसिद्ध्या तद्घटितव्यभिचारवारणाय हेतौ निश्चयपदं व्यर्थमिति भावः । यद्यपि स्वसमाना
धिकरणस्य समानविशेष्यकनिश्चयप्रकारत्वविशेषितवह्नित्वस्य स्वकालेऽभावो यत्र तद्विशेष्यकत्वाभावस्य
तादृशवह्नित्ववतः स्वकाले यत्र ज्ञाने विशेष्यत्वं नास्ति तदन्यत्वस्य च साध्यत्वे नायं दोषः तथापि स्वशब्देन निश्च
यानभिधाने संशये साध्यमेवेति न तथावृत्तिः स्वशब्दस्य समभिव्याहृतपरतया क्वचित्संशयपरत्वे क्वचिन्निश्च
यपरत्वेऽननुगमादनुमानाप्रवृत्तिरिति दूषणं द्रष्टव्यं · दाहसमर्थमात्रविशेष्यकवह्नित्वप्रकारकनिश्चयत्वव
तीय हेतौ मात्रपदेनैव विपरीतसमूहालंबनवारणे वह्नित्वप्रकारकपदं व्यर्थमिति केचित् दाहसमर्थविषयक
प्रयत्नमात्रजननानुकूलवह्नित्वप्रकारकतावन्निश्चयत्वादित्यत्र वह्निरिति भ्रमात्मकरूपसमूहालंबनगुंजा
यां देवा दुःखसाधनतायहा व्यभिचारः दुःखसाधनताज्ञाने सति तदंशे प्रयत्नाभावादित्यन्ये · पूर्वोक्तास्वरसा
त्वं डितहेतुनालंबते · अत्र दाहेति · विरुद्धाप्रकारकपरत्वादिति · विरुद्धाप्रकारकप्रत्ययरूपपरत्वादित्यर्थः तेन

प्रमुष्टतत्ताकभ्रमस्वरूपस्मृतौनव्यभिचारः॰अतएवायंविरुद्धाप्रकारकज्ञानेतिवक्ष्यति॰विरुद्धाप्रकार
कप्रत्यक्षेतितदर्थः॰अत्रवह्नित्वाभाववद्विशेष्यकत्वाभाववेवह्नित्ववद्विशेष्यकत्वाभाववत्साध्येदाहस
मर्थविषयकप्रयत्नजनकप्रत्यक्षत्वंआद्योहेतुः॰प्रत्यक्षत्वाप्रवेशेइष्टसाधनतानुमितौव्यभिचारात्इतर
विशेषणानिरूपितवह्नित्वप्रकारकविरुद्धप्रकारकभिन्नप्रत्यक्षत्वंद्वितीयोहेतुः॰अनिरूपितत्वान्तस्याप्रवे
शेइहवह्निरूपमित्यादौव्यभिचारात्प्रत्यक्षत्वाप्रवेशेचप्रमुष्टतत्ताकभ्रमरूपस्मरणेव्यभिचारात्॰दाह
समर्थविशेष्यकत्वंतृतीयोहेतुः॰इतरविशेषणानिरूपितवह्नित्वप्रकारकविरुद्धप्रकारकत्वात्यन्ताभावव
त्प्रत्यक्षत्वंचतुर्थोहेतुः॰तत्रचविशेषणान्तत्वंद्वितीयहेताविवक्षेयं॰ननुद्वितीयसाध्यस्ययथाश्रुतत्वेऽयंवह्नि
र्व्याप्यमित्यत्रव्यभिचारः॰नन्वत्रहनीतिनञ्व्यत्यासेवरमात्यांसहपानरूपत्वंअनुकूलोवह्निरित्यत्रव्यभिचार
स्यइदंताख्यातिप्रकारविशेषणेएतद्रूपवानयंवह्निरित्यत्रव्यभिचारः॰विशेष्यनिरूपितेदंताख्यातिविशेष

वि॰ प्र॰ म॰ णं इत्यायं वह्नित्वसंबंध इत्यत्र व्यभिचारः। न। स्वजन्यप्रयत्नविषयेकचिद्वह्निरित्यत्रेदंत्वाख्यप्रकारकोनेति
साध्यार्थत्वात् तत्र च दाहसमर्थविषयकप्रयत्नजनकत्वं वह्नित्वप्रकारकत्वे सति विरुद्धप्रकारकभिन्नत्वं दा-
७५ हसमर्थविशेष्यकत्वं वह्नित्वप्रकारकत्वे सति विरुद्धप्रकारकत्वाभाववत्त्वं वा हेतवः। एवं पंचमषष्ठं च साध्यं
यत एव तयोर्हेतवः। विशेष्यावृत्तिवह्नित्वप्रकारकोनेति च साध्यं तृतीयं तत्र च दाहसमर्थविषयकप्रयत्नजन-
कत्वं इतरविशेषणानिरूपितवह्नित्वप्रकारकत्वे सति विरुद्धप्रकारकभिन्नप्रत्ययत्वं दाहसमर्थविशेष्यक-
त्वं इतरविशेषणानिरूपितवह्नित्वप्रकारकत्वे सति विरुद्धप्रकारकत्वाभाववत्प्रत्ययत्वं च हेतवो ज्ञेयाः। अत्र
चायं वह्निरित्यनुभवे इदंत्वाघटितसाध्यानामप्रामाण्याभावेऽपर्यवसानान्नोद्देश्यासिद्धिशंकातुष्वितिदिक्ू
मानांतरेनवतीति। इदं ज्ञानं वह्नित्वाभाववद्विशेष्यकं विसंवादिप्रवृत्तिजनकत्वादित्याद्यनुमानेन शाब्देन वत्यर्थः।
यद्यपि शाब्देन वाक्यार्थमर्यादया पूर्वाज्ञातमप्यप्रामाण्यं बोध्यतेऽनुमानेन तु यत्र ज्ञाने साध्यप्रसिद्धिः तत्रैव व्याप्ति

रेकव्याप्तिग्रहसंभवेऽस्या वैयर्थ्यं· तथापि साध्यप्रसिद्ध्यधिकरणे यत्र प्रकृतहेतोरसत्त्वं न ज्ञातं तत्र दृष्टानुमान
मप्युपपद्यत एवेति भावः· तद्व्यापकतया कालिकतद्व्यापकतया· न स्यादित्युपलक्षणं· स्यादनुमुक्तत्वेन दुःखा
नुमानमित्यपि द्रष्टव्यं· यमित्यनंतरं कंचिदितिशेषः· तदभावत्वेनेति· तद्धर्म्मावच्छिन्नाभावत्वेन तद्धर्म्मा
वच्छिन्नस्याभावः सिध्यतीत्यर्थः· व्यधिकरणधर्म्मावच्छिन्नाभावपरतया वा इदं योज्यं· ननु द्रव्यत्वव्यापकतया
संयोगाभावो गृहीत इति संयोगे न द्रव्यत्वाभावानुमानापत्तिः· न च हेत्वभावे प्रतियोगिव्यधिकरणत्वविशे
षणान्नैष दोष इति वाच्यं· विभागं प्रति संयोगाभावस्य व्यापकत्वे गृहीतेपि तं प्रति प्रतियोगिव्यधिकरणस्य
तस्य व्यापकत्वाग्रहात् संयोगेन विभागानुमानापत्तेरित्यत आह इत्यनुमानपरिच्छेद इति· प्रतियोगिव्यधि
करणस्य यद्धर्म्मावच्छिन्नोपस्थितिकस्य यत्संबंधावच्छिन्नस्य व्यापकतया यद्धर्म्मावच्छिन्नस्याभावो यत्संबंधावच्छि
न्नप्रतियोगिकः प्रतियोगिव्यधिकरणो गृहीतस्तत्संबंधावच्छिन्नतद्धर्म्मावच्छिन्नस्य प्रतियोगिकाभावस्तत्संबं

वि॰ प्रम॰ धवत्तातद्धर्मावच्छिन्नेन न तेन सिध्यतीति निर्गलितेनोक्तदोषो न वा संबंधत्वेनादिकमादायातिप्रसंग इति भा
75 वः ननु यथाश्रुतमितरेतिमूलमसंगतं आकाशेतरस्य शब्दादेः सत्वेपि आकाशत्वाभावस्यासत्वात् इत
रत्वाद्यस्येतरत्वपरत्वे तद्व्यापकतया आकाशत्वाभावग्रहेपि इतरत्वात्यंताभावसिद्धिः तावता तादात्म्यात्यं
ताभावस्यैव सिद्धिसंभवादित्यत आह यथा चेति यस्य संबंधिनो यत्संबंधावच्छिन्नस्य व्यापकतया हेतुत्वाभा
गृहीत इत्यपेक्षयाऽसंबंधव्यापकत्वस्य लघुतया गमकत्वेन तादात्म्यलक्षणसंबंधव्यापकतैव न तु व्यापकता
तथा च तादात्म्यसंबंधाभावः सिध्यतीत्यर्थः ननु तादात्म्यं भेदाभेदरूपः संबंधः स चाप्रसिद्ध इत्यत आह यथा
चेति अत्र केचित् इतरत्वात्यंताभाव एव इतरान्योन्याभावः इतरत्वं इतरान्योन्याभावविरहरूपमत इतरा
न्योन्याभावस्य इतरत्वविरहात्मकत्वमावश्यकं यो यद्विरहरूपः स तद्विरहरूप एवेति व्याप्तेरित्याहुः तच्चा ह
यं पा चेति समानाधिकरणाव्यधिकरणानिषेधधीगम्यत्वेन इतरत्वावच्छिन्नेतरज्ञाने तच्चत्वावच्छिन्नेतरत्वज्ञा

नाध्यीनज्ञानत्वेनाधिकरणयोग्यताप्रतियोगियोग्यताधीनसाक्षात्कारविषयतयास्वयमेवस्वीकारेणवत
योर्भेदोनुमानखंडकाव्यइत्यर्थः॰ननुसर्वमिदमनुपपन्नंइतरत्वात्यंताभावत्वेतराऽन्योन्याभावत्वरूपधर्म्मा
वच्छेदेनविरुद्धधर्म्माणामुपपत्तेः॰यच्चोक्तंसंबंधव्यापकत्वंलघितिः॰तदपिन॰संबंधिविशेषितसंबंधव्यापक
तायामुच्यमानायांसंबंधिसंबंधोभयप्रवेशस्योभयत्रतुल्यत्वात्॰विशेषणविशेष्यभावमात्रविपरिवर्त्तना
दिति॰अत्रोच्यते॰पृथिवीतरत्वस्याभावतयापृथिवीतरस्याभावतयातदत्यन्ताभावतदन्योन्याभावयोर्भावा
भावात्मकयोः कथमेक्यं॰सामान्याभावव्यवस्थापनावसरेस्वयमेवभावाभावकरंबितवस्त्वापातादितिवक्ष्यमा
णत्वात्॰किंचएतद्घटप्रागभावादीनामारोप्यसंबंधभेदेनविशेषाभावसामान्याभावयोश्चप्रतियोगिताव
च्छेदकभेदेनभेदव्यवस्थितौ आरोप्यसंबंधभेदवतोःप्रतियोगितावच्छेदकभेदवतोश्चानयोः कथमैक्यमिति॰
संबंधंप्रतिव्यापकताऽबाधकाभावमात्राऽज्ञाततादात्म्यावच्छिन्नेतरव्यापकताप्यत्रद्रष्टव्या॰यदभावव्यापक

त्रि·प्र·म· तया·यदीयाभावंप्रतिव्यापकतयेत्यर्थः·यदभावोयेऽभावोयस्येतिबहुव्रीहिः·तेनयत्प्रतियोगित्यर्थः·अत्र
वदंति·नन्वेवंपृथिवीतरत्वव्यापकतयागंधाभावग्रहेगंधेनपृथिवीत्वानुमानेपृथिवीत्वस्यगंधव्यापकत्वग्रह
76 पृथिव्यन्योन्याभावेनगंधाभावानुमानेचोक्तनियामकस्यासंभवादिति·अत्रोच्यते·यदभावव्यापकतयेत्यस्य
प्रतियोग्यनुयोगिभावलक्षणसंबंधवतोयद्विरोधिनोव्यापकतयेत्यर्थः·यदभावइत्यस्यचप्रतियोग्यनुयोगि
भावलक्षणसंबंधवान्यद्विरोधीत्यर्थः·तथाचव्याप्याभावरूपस्यव्यापकप्रतियोगिनस्वसाध्यस्यव्यापकाभाव
रूपस्यव्यापकप्रतियोगिनस्वहेतोःसंग्रहइतिकापिनाव्याप्तिरिति·विधान्तरंप्रकारांतरं·तादात्म्यभ्रमव्याव
त्यर्थमाह·वह्नित्ववह्निविशेष्यकमिति·एवंहेतावपीति·यथाश्रुतेवह्नित्वाभाववतोवह्नित्वादेविषयत्वेनस्व
रूपासिद्ध्यापत्त्यावह्नित्वाभाववद्विशेष्यकत्वाभाववतीत्यर्थः·निर्विकल्पकादौव्यभिचारात्सविषयकत्वस्य
सविशेष्यकत्वमर्थइत्यर्थः·विशिष्टाभावतयाचावैयर्थ्यमिति·भावः·विशेषणासिद्धिंपरिहरति·यथाचेति·

४३

अन्यथाप्रामाण्यस्येति· विशेष्यत्वांशं विहायान्येषां भागानां स्वतोग्रहे बाधकाभावादित्युक्तत्वादिति भावः·
तद्धीति फक्किकानंतरं गृह्णीयादिति शेषः· मानाभावादिति· किं विद्विशेष्यकत्वग्राहि ज्ञानोत्पादकाभावादि
त्यर्थः· तत एवेति· वह्निविशेष्यकत्वग्राहि ज्ञाने ऽवह्निविशेष्यकत्वग्राहि ज्ञाने चोत्पादकाभावादेवेत्यर्थः· अग्नि
परूढयेदोषान्तरमाह· प्रामाण्येति· जन्मेति· जन्मान्तरीयसंस्कारेण स्मृतं सविशेष्यकत्वमनुव्यवसायेन प्र
कृतज्ञाननिष्ठतया गृह्यते· यद्वा· स्मृत्यादिनोपस्थितप्रकृतज्ञाने स्मृत्युपस्थितं सविशेष्यकत्वं मनसा सप्रकार
कत्वेन लिंगेन वा परिच्छिद्यत इत्यर्थः· व्यापकतावच्छेदकानाक्रांतस्य नानुमितिविषयत्वमित्यरुचेराह· एतज्ज्ञा
नविशेष्यकत्वमिति· वह्नित्वाभाववद्विशेष्यकत्वप्रसिद्ध्या वह्नित्वाभाववद्विशेष्यकत्वाभावमनुमायैव वह्नित्व
वद्विशेष्यकत्वमनुमेयमेवेति नियमद्वयं नास्ति· किंतु कदाचिदियमपि रीतिः संभवतीति मूलकृतोऽभिसंधिरि
ति· वयं तु ब्रूम इत्यादेः पंथा इत्यन्तस्य प्रघट्टकस्यार्थः· पूर्वकमेव सर्वत्रेति· प्रामाण्यानुमानस्याप्रामाण्याभावा

नुमानपूर्वकत्वनियमः सार्वत्रिकत्वं च न युक्तमित्यर्थः तत्राप्रामाण्याभावानुमानपूर्वकत्वनियम इति भावः कि
मनयति· तथा च न तज्ज्ञानपूर्वकत्वेपि नियम इति भावः प्रामाण्याप्रामाण्ययोर्योग्यतायामविशेषमुक्त्वा प्रामाण्ये
तिशयमाह· वह्नित्वाभाववत्त्वस्येति· तद्घटिताप्रामाण्यस्येत्यर्थः· एवं तद्वत्त्वस्येत्यत्रापि· बाधेति· वह्निरत्र मे ज्ञाते
तत्रैव नायं वह्निरिति बाधावतारे वह्नित्वाभाववत्येव मम ज्ञानं वृत्तमित्यप्रामाण्यं बाधगम्यमित्यर्थः· एवं
प्रामाण्ये संवादगम्यत्वं· यद्वा· वह्नित्वाभाववत्त्वस्येति यथाश्रुतमेव बाधगम्यत्वं च बाधविषयत्वं· एवं तद्वत्त्व
स्येत्यपि· संवादगम्यत्वं च संवादविषयत्वं· साध्यपर्य्यालोचनया ऽनुमानपूर्वकत्वनियमं निरस्य हेतुपर्य्यालो
चनया निरस्यति· अपि चेति· प्रामाण्येति· अप्रामाण्याभावेत्यर्थः· हेतुप्रामाण्ययोरविशेषमुक्त्वा प्रामाण्ये ऽतिशय
माह· प्रस्तुतेति· किं हस्तपिहितमित्युपसंहरति· इतिमनसेति· प्रस्तुतेत्युपसंहरति· उक्तक्रमेणेति· सार्वत्रिकत्वं नि
रस्यति· वस्तुत इति· प्रामाण्यनिश्चयेति· अनुव्यवसायाभावे परज्ञानात्प्रामाण्याभावनिश्चय इति भावः· एत

ष्टेति। एतद्विशेष्यकमित्यर्थः। एतच्च विशेष्यत्वांशस्यानुव्यवसायग्राह्यतापक्षमवलंब्योक्तं। अन्योन्याश्रये
ति। यथा वह्निप्रमायां वह्नित्वाभाववद्विशेष्यकत्वं लक्षणं प्रामाण्यस्याभावमनुमाय वह्नित्ववद्विशेष्यकत्वा
नुमितिः तथा च वह्नित्वमेव वह्नित्ववद्विशेष्यकत्वलक्षणप्रामाण्यस्याभावमनुमाय वह्नित्वाभाववद्विशेष्यक
त्वानुमितिरिति अप्रामाण्यज्ञानप्रामाण्यज्ञानयोः परस्परापेक्षत्वापत्तेरित्यर्थः। वह्नित्वाभाववद्विशेष्यकत्वा
भावानुमानमित्यनंतरं ततो वह्निविशेष्यकत्वानुमानमिति शेषः। तदनुमानमिति। वह्नित्वाभाववद्विशेष्यक
त्वानुमानमित्यर्थः। उक्तम[illegible]न्योन्याश्रयं स्पष्टयति। तथा चेति। प्रामाण्यज्ञानस्यावश्यकत्वेपि नाभावानुमानपूर्वि
कतानियमः दाहेत्यादिहेतुनामनसावात्तत्संभवादित्याह। किंच। इदं चोपलक्षणं शंकानिरासार्थं प्रामाण्यानु
मानं शंकाया अप्रामाण्याभावानुमित्यैव निरस्तेति व्यर्थमप्रामाण्याभावानुमानपूर्वकं प्रामाण्यानुमानं। न चाप्रामा
ण्यतदभावकोटिशंकया निरासेपि प्रामाण्यतदभावकोटिकशंकाया निरासार्थं प्रामाण्यानुमानमिति वाच्यं।

संदेहनिरासे विरोधिविषयकनिश्चयमात्रस्य हेतुतया ग्राह्याभावनिश्चयपर्यन्तस्यानावश्यकत्वात्· तथापि
अप्रामाण्याभावानुमानस्य पूर्वकत्वे नियामकाभावाज्ञत्यपि द्रष्टव्यं· अपूर्वव्यक्तिगोचरज्ञानप्रामाण्यस्य
पूर्वमननुभावात्स्मरणासंभवेन एतस्य प्रकारस्यावश्याश्रयत्वमिति वृद्धैः शीलितः पंथा इति कश्चित्पाठः सचायु
क्तः· लाह समर्थविशेष्यकत्वन्यायेन तत्रापि प्रामाण्यस्योपनीतभावसंभवादिति· विषयताश्रयेतिमूलं· स्वविष
यताश्रयावृत्तिवह्नित्वप्रकारकोनत्यर्थः· प्रकारविशेषघटिताप्रामाण्याभावस्यासिसाधयिषितत्वात्· विषय
ताश्रयेतिमूलं· अत्रापि स्वविषयत्वाभावपर्यन्तमिति पाठेऽप्यभावपदस्य पूर्वत्र नयनेन वह्नित्वासमानाधिकर
णधर्मानवच्छिन्नविषयताकत्वमेवार्थ इति ज्ञेयं· पदान्तरं वह्निवृत्तिपदं· ननु वह्निवृत्तिपदस्यैव विशेष्ये वह्नित्वा
समानाधिकरणधर्मानवच्छिन्नत्वमर्थोऽन्यषामत्रिमतस्तत्कृतो गौरवमिति चेत्· अत्र ब्रूमः· विशेष्यांशे वह्नित्वस
मानाधिकरणवह्नित्वप्रकारकविषयताकत्वमेव लघु साध्यमस्तु कृतं गुरुणा विशेष्यांशे वह्नित्वासमानाधिक

रणेत्यादिना इत्यभिप्रायः तदिदमुक्तं पदान्तरेतिन अद्वयादीत्यर्थः यथाश्रुतनिश्चयपदार्थमादायाशंका
माह नत्विति मणिर्मणिजनक इति यद्यपि प्रमाविशेष्यकमणित्वप्रकारकत्वमेव व्याप्तिवारास एव वक्तव्यो नत्वि
दमपि ज्ञानं तथापि तस्य फलज्ञानत्वनिष्पत्तये इदमुक्तं समानेति इदं च फलविशेष्यकज्ञानस्य प्रवृत्तिजनक
त्वमभ्युपेत्योक्तं वस्तुतस्तु तदेव नास्तीति द्रष्टव्यं आश्रयासिद्धेरिति प्रमात्वनिश्चयस्याप्रमात्वाभावनिश्चयपूर्व
कतया पक्षविशेषणपक्षताविरहादिति भावः स्वरूपासिद्धेः अज्ञानरूपासिद्धेः न च द्वयोर्युगपदवस्थानमिति
यद्यपि प्रत्यक्षरूपं वह्निज्ञानं साक्षादेव प्रयत्नजनकमिति द्वयोर्युगपदवस्थानमेव तथापि विद्यमानमेव विशेष्यं
जनकमिति मतमाश्रित्य वह्निप्रत्यक्षस्य प्रत्यक्षासंभवार्थं प्रयत्नोत्तरक्षणे द्वयोर्युगपदनवस्थानमुक्तं यद्वा व्या
पारवत्तया वह्निरिष्टसाधनं नवेति साध्यस्येति ज्ञानस्यापि उपादानगोचरचिकीर्षाद्वारा प्रयत्नजनकतया तदनि
प्रायेण युगपदनवस्थानं द्वयोरुक्तमिति गुरुमते ज्ञानस्य स्वप्रकाशात्तयोपपत्तिमभिप्रेत्याह इच्छेति कारणत्व

धीर्दुःखमिति । अत्र वदंति ज्ञाने जाते द्वितीयक्षणे तदनुव्यवसाये तृतीयक्षणे च विनश्यता तेनेच्छायां जनितायां च
तुर्थक्षणे तदनुव्यवसायविनश्यदवस्थतया पंचमे यत्नोत्पत्तौ बाधकाभावात् संभवत्येव ज्ञानेच्छयोः स्मृत्युपनयः न
च निर्विकल्पकार्थमेकैकक्षणवर्द्धने च ज्ञानेच्छयोः इच्छाप्रयत्नयोर्व्यवधानं न संभवतीति वाच्यं । नरसिंहाकर
योर्ज्ञानत्वेच्छात्वयोर्निर्विकल्पकरूपयोरनुव्यवसाययोः स्वीकारात् । न च तथा सति ज्ञानत्वेच्छात्वविशिष्टगोचरस्मृ
त्यभावात्तेन तेन रूपेण हेतुतानुगतत्वेनेति वाच्यं तथापि तत्स्वभावात् हेतुतामात्रस्य प्रत्यक्षत्वात्तत्पूर्वकाले देवाधी
ज्ञानत्वेच्छात्वोपस्थितौ विशिष्टगोचरस्मृत्यभावाच्चेत्र ज्ञानस्यापि संभवाच्च । न च ज्ञानस्य यत्नेकर्तव्य इच्छाद्वारं द्वा
रत्वं च द्वारिणि सत्येव तत्फलजनकत्वमिति कथमुक्तरीत्या निर्वाह इति वाच्यं । व्यापारत्वमात्रेणोपपत्तौ द्वारत्वे माना
भावादिति । अत्रोच्यते । इच्छाप्रयत्नसामग्रीबलवत्वेन ज्ञानेच्छानुव्यवसाययोरुत्पादो दुर्घटः न हीच्छाप्रयत्नयोः प्र
तिबंधकं अनुव्यवसाययोश्चाप्रतिबंधकं किंचिन्नत्र पश्यामः इति । यद्यपि प्रयत्नाग्रिमक्षणे विनश्यदविनश्यदवस्थ

यदिच्छाप्रयत्नयोर्ग्रहेऽनुपपत्त्यभावः तथापि विद्यमानस्यैव विशेष्यस्य जनकत्वमिति मते मेदमुक्तं· निर्विकल्प
कादीति· तथाच तदनुपस्थित्या न तस्य साध्यवत्त्वनिश्चय इति भावः· तन्निष्ठेति· तथाच निर्विकल्पकाद्युपस्थितताव
पि साध्यसाधनहेत्वादेरज्ञानान्न साध्यवत्त्वनिश्चय इति भावः· आद्यं दूषयति· सपक्षत्वेनेति· द्वितीयं दूषयति· नि
र्विकल्पकत्वादेरेवेति· सिद्धांतमाह· तस्मादिति· वह्नित्वप्रकारकेति· सप्रकारकत्वपर्थः· साध्यस्येत्यनंतरं व्यापकत्व
मिति शेषः· युक्तमुत्पश्याम इति· यद्यपि विशिष्टाभावस्य व्यापकतायां न वैयर्थ्यं· तथापि व्यतिरेकसहचारादन्वय
व्याप्तिरेव गृह्यत इति पदेऽन्वयव्याप्तिग्रहीत्वा सत्प्रतिपक्षसंशयावधारणीयौ· तत्र च लाघवात्सप्रकारक
निश्चयत्वस्यैवाप्रामाण्याव्याप्यत्वमित्यभिप्रेत्येदमुक्तं· मूले पृथिवीत्वाभाववतीत्यादि साध्यकपक्षं साधनं च पूर्ववद्व्या
ख्येयम्· मूले विषयताश्रयेति· स्वविषयताश्रयाकारन्निष्ठपृथिवीत्वप्रकारकेनेत्यर्थः· मूले साध्यमित्यनंतरं गंधवद्वि
शेष्यकपृथिवीत्वप्रकारकनिश्चयत्वादिति हेतुनेति शेषः· मूलं अर्थात्तसिध्यतीति· पृथिवीतादात्म्यारोपपदेन वि

चि॰प्र॰म॰

४०

शेषणन्नतायां पृथिव्यां विषयतेति नत्वमत्वेन सिद्धसाधनमित्युक्तप्रायं॰ यत्तु विशेषणविशेष्ययोरेकां विषय
तां मत्वा पृथिवीत्वासमानाधिकरणधर्म्मानवच्छिन्नविषयताकत्वं साध्यं वर्णयंति तन्न नञ्द्वयादिगर्भत्वगौर
वमिति पूर्व्ववदेव सर्व्वं दृष्टव्यं॰ अपृथिवीत्वासमानाधिकरणप्रवृत्तिपृथिवीत्वप्रकारकविषयताकत्वाभावाद्
निवत्वाद्यभावरूपाणि साध्यानि स्वयमुक्त्वा अन्येषां मतेन भावसाधकमनुमानमाह॰ मूले॰ अन्ये त्विति॰ तद
ति॰ पृथिवीवृत्तिर्द्धर्म्मो यां विषयतां प्रत्यनतिप्रसक्तस्तद्विषयतावत्त्वस्य जलनिर्विकल्पके सत्वान्नवारणाय गंध
समानाधिकरणेति विशेषणमित्यर्थः॰ अत्रास्वरसमाह अन्यथेति॰ वैयर्थ्येन प्रकारपदस्य धर्म्मपरत्वाभावे नि
र्व्विकल्पके विषयताविरहे वेत्यर्थः॰ इदमुपलक्षणं॰ सप्रकारकत्वमात्रेण निर्विकल्पकवारणे गंधसमानाधिकर
णपदवैयर्थ्यं जलविशेष्यके पृथिवीत्वप्रकारके समुष्टतत्ताके स्मरणे व्यभिचारित्वं चारुविवीजं दृष्टव्यम्॰ गंध
समानाधिकरणप्रकारकेति॰ गंधव्याप्यप्रकारकविषयताप्रतियोगिनिश्चयत्वमित्यर्थः॰ जलगोचरपृथिवीत्व

संशयत्वमयोर्वारणाय निश्चयपदं तस्य परस्परविरुद्धप्रकारकपरत्वात् इह पृथिव्यां रूपमिति ज्ञानस्य
वारणाय विषयताघावनं· इदं जलं द्रव्यमिति प्रमाया वारणाय गंधव्याप्येति· प्रमुष्टतत्ताकोक्तस्मरणस्य वारणा
य साध्यस्य प्रकारपदं यथाश्रुतमेवेति तादृशः बाध इति· ननु वच्छेदकत्वेन नतिप्रसक्तत्वं· तथा च शीता पृथि
वीत्यनुभवस्यापि विषयता पृथिवीवृत्तिनैयावच्छिद्यते न तु शीतत्वेनेति साध्यसत्वान्न बाधः· अत्रोच्यते· बाधपदे
ऽन्न बाधो त्र विवक्षितः गंधासमानाधिकरणप्रकारकत्वाद्विरुद्धप्रकारकत्वाच्च· यद्वा· निश्चयत्वगर्भे हेतुपदे
पृथिवीत्वासमानाधिकरणप्रकारे नतिप्रसक्तो यत्र तद्विषयतावत्त्वाभावः पृथिवीत्वासमानाधिकरणप्रकारक
विषयताकत्वाभावश्च साध्यः संभवति तत्र द्वितीयसाध्यमादाय बाधत्वं क्तः· न चैवं प्रमुष्टतत्ताकस्मरणमादाया
र्थान्तरं· अनुभवपदस्य तत्वे नैव तद्वारणादिति· वस्तुतस्तु· शीतत्वारूपप्रथमानुमाने एव वयोज्यम्· तथा हि· ननु पृ
थिवीवृत्तिपृथिवीत्वप्रकारकविषयताकत्वाभावः शीता पृथिवीति ज्ञानमेगतस्तत्कथं ज्ञमव्यावृत्तं साध्यमतआह शीतेति·

चिं·प्र·म· ८४।

ननु जलपृथिव्योरिमे पृथिव्याविति समूहालम्बने गन्धवद्विशेष्यकपृथिवीत्वप्रकारकनिश्चयत्वादिति हेतुर
स्ति अपृथिवीवृत्तिपृथिवीत्वप्रकारकविषयताकत्वाभावरूपं साध्यं नास्तीति व्यभिचार इत्यत आह· भ्रमेति· पृथि
व्यंशे साध्यहेत्वोः सत्त्वान्न व्यभिचारप्रतिभावः· ननु द्वयोर्विशेष्ययोरेकैव विषयता तथा च पृथिव्यंशेपि साध्यं नास्ती
त्यत आह· विशेष्येति· ननु पृथिवीत्वस्य प्रकारस्यैकत्वादेकैव विषयता प्रकारभेदेन विषयताभेदादित्यत आह
न च प्रकारेति· केचित्तु पृथिवीत्वासमानाधिकरणप्रकारकत्वं पृथिवीत्वासमानाधिकरणधर्म्मसमानाधिकर
णत्वान्यतरवद्विषयताकत्वाभावः साध्यं तथात्रिप्रतः तन्मांशारहितायथार्थस्मरणे पृथिवीजले वेति पृथिवीवि
शेष्यकसंशये च एकैककगर्भसाध्यस्य गतत्वेन उभयगर्भताया आवश्यकत्वात् हेतोश्च संशयवारणाय गन्धासमा
नाधिकरणप्रकारकत्वं संशये च प्रकारभेदेन विषयताभेदो नास्ति प्रत्येकस्मरणे हि विषयताभेदमानं न च संश
यस्थले तदस्तीति संशये साध्यहेत्वोः सत्त्वं नाशङ्कनीयं· पृथिवीत्वासमानाधिकरणत्वं च साध्ये पृथिवीवृत्तित्वं हे

तोचगंधासमानाधिकरणत्वंगंधानधिकरणत्वंगंधानधिकरणेरत्निवमत्तिमतंतथाचजलादिनिर्विकल्प
केगगनेगगनत्वमितिज्ञानेप्रमुष्टतत्ताकायथार्थपृथिवीस्मरणेचव्यभिचारवारणायगंधसमानाधिकरणप्र
कारकत्वं॰तत्राद्येसप्रकारकत्वेनद्वितीयेसाधिकरणप्रकारकत्वेनतृतीयेगंधेत्यादिनाव्यभिचारवारणमिति
दृष्टव्यं॰गंधसमानाधिकरणप्रकारकत्वंतादृशप्रकारसमानाधिकरणत्वंतेनव्यभिचारवारणंसंभवति॰य
द्यपिगंधसमानाधिकरणत्वमेवविषयताविशेषणमुचितंनत्वधिकंतथापियथोक्तविशेषणविशेष्यतावे
नवैयर्थ्यमिति॰शीतेति॰प्रकारभेदेनविषयताभेदादितिभावः॰ननुविशेष्ययोर्विषयतैक्येपृथिवीत्वांशेपिनसाध्य
मस्तीत्यतआह॰विशेष्येति॰ननुशीतापृथिवीतिज्ञानेपिसंदेहइवैकैवविषयतातत्कृतःसाध्यसत्वमित्यतआ
ह॰नचप्रकारेति॰निश्चयरूपज्ञानेप्रकारभेदेसत्यपिविषयताभेदेनेतिनचेत्यर्थः॰मानाभावात्॰प्रत्येकास्मर
णरूपमानाभावादितिवदंति॰तन्न॰गगनगंधयोर्विरोधग्रहेगगनवान्गंधवान्वेतिघटविशेष्यकसंशयेव्याप्ति

चारात्· साधिकरणमात्रप्रकारकत्वमत्र केचित्तु स्तदपिनः प्रमुष्टतत्ताकायथार्थपृथिवीस्मरणे व्यभिचा
रादिति· गंधाधिकरणत्वप्रकारकत्वरूपं प्रथमविशेषणं उक्तसंशयकारकं· द्वितीयस्य गंधसमानाधिकरण
सत्वप्रकारो यस्या इत्यर्थः· तेन गंधेन सामानाधिकरण्यात्मकसंबंधेन प्रकार इति लभ्यते तथा च प्रमुष्टतत्ताकायथा
र्थपृथिवीस्मरणे तेन व्यभिचारवारणं· साध्यं चात्र पूर्वोक्तमन्यतरधर्म्मवद्विषयताकत्वाभावरूपमेव· यद्वा· पृथि
वीत्वनिष्ठप्रकारकविषयताकत्वाभावः साध्यः गंधानधिकरणत्वप्रकारकनिरधिकरणप्रकारकविषयताप्रति
योगित्वं हेतुस्तच्चेदं जलमिति धीवारणाय गंधानधिकरणत्वादि गगने घट इति धियश्च वारणाय निरधिकरणे
त्यादि विशेषणं ज्ञानत्वनिश्चयत्वविशेषणमहिम्नैवोक्तहेतुलाभान्न तद्वैयर्थ्यमिति वयं· पृथिवीविशेष्यके
ति मूलं· विषयतायाः सविशेष्यकत्वमादाय· यद्वा पृथिवीनिष्ठेत्यर्थः· एवमग्रेपि पृथिवीत्वव्यधिकरणेति
मूलं· पृथिवीत्वभिन्नभिन्नमात्राप्रकारेत्यर्थः· पृथिव्यवृत्तीति मूलं· सकलपृथिवीनिष्ठात्यंताभावप्रतियोगि

मात्राप्रकारकेत्यर्थः·गंधेतिमूलं·अत्र निर्विकल्पके विषयताविरहान्न तत्र व्यभिचारः ज्ञानपदस्यानु
न्नवपरत्वात् जलविशेष्यकपृथिवीत्वप्रकारकप्रमुष्टतत्ताकस्मृतौ न व्यभिचारः·अत्र त्रिमात्रप्रकारक
पटज्ञाने व्यभिचारात् पृथिवीत्वप्रकारकेतिमूलं·इदं च चरमहेतावपि देयं·पृथिवीविशेष्यके पृथिवीजलं वे
त्यादिज्ञाने च चरमसाध्यद्वये चरमहेत्वोर्न व्यभिचारः·साध्ययोर्म्मात्रगर्भत्वादिति·मूले विषयत्वं विशेष्यत्वं·ए
वमग्रेपि मूलं·अनुव्यवसायगम्यमितिस्वातंत्र्येणेति शेषः·एवमग्रेपि तदनुव्यवसायेसतीति·ननु दाहस
मर्थत्वं प्रथमेनैवोपनेयं किमनुव्यवसायेन·न च दाहसमर्थत्ववह्निविशेष्यकत्वपर्य्यंतोपनयार्थमनुव्यवसाया
दरः·वह्निज्ञानानुव्यवसायेन पुरोवर्त्तिविशेष्यकत्वे गृहीते पुरोवर्त्तिनि दाहसमर्थत्वोपनयमात्रेण विशेष्ये
विशेषणमिति न्यायेन विशिष्टवैशिष्ट्यनिर्वाहात्·न च वह्निज्ञानानुव्यवसायेन वह्निविशेष्यत्वं न गृहीतमिति
वाच्यं·दाहसमर्थज्ञानानुव्यवसायेनापि तथा सति दाहसमर्थविशेष्यत्वस्याग्रहादिति·अत्रोच्यते·ज्ञानोपनीतं

धस्येदं वह्निविषयकत्वं मनसा परिच्छिद्यत इति मूलदर्शनाद्विशेष्यांशोपनयसिद्ध्यर्थमेवमुक्तं· वस्तुगत्या त्वनुव्य
वसायं विनाप्यनुमितसिद्धिर्भवत्येव· न चानुव्यवसायेन विशेष्यत्वांशे सत्तानिश्चयरूपेणापि दाहसमर्थत्वांशे
सत्तानिश्चयानात्मकेन कथं सत्तानिश्चयात्मकोपनीतभानमिति वाच्यं· विशेषणज्ञानमात्रस्यापेक्षितत्वात्· इदं
यानुव्यवसायस्य विशेष्यत्वग्राहित्वमभ्युपेत्योक्तं· मतांतरे तु जन्मांतरीयसंस्काराद्विशेष्यत्वांशोपस्थितिरिति
द्रष्टव्यं· वयं तु· वह्निरर्थस्वरूपसंबंधाद्यात्मकस्य विशेष्यत्वस्य मनसा ग्रहणासंभवेप्यान्तरार्थमनसा गृहीतं वि
शेष्यत्वमन्यत्राप्युपनीतं भासत इति न जन्मांतरीयसंस्कारापेक्षेति· तत्त्वानेति मूलं· तत्त्वानविषयकज्ञानव्यति
रेकाप्रयुक्तव्यतिरेकप्रतियोगिज्ञानप्रकारत्वमित्यर्थः· ग्राह्यत्वादिति पाठेत्र दर्शितहित इति न्यायेन ग्रहपदं ग्र
ह्यमाणपरं· करचरणवद्विशेष्यकशरीरत्वप्रकारकज्ञानत्वादित्यस्य हेतोः शरीरांतराभेदभ्रमे व्यभिचारो मूले
शंकितस्तत्र विशेष्यांशे व्यभिचारेऽपि नास्त्येव विशेषणांशेऽपि च न संभवतीत्यनुक्तिसंभवत्त्वं शंकाया निराकर

व्यतिरेको व्यतिरेकि वस्तु कारणता व्यापको। न च प्रकृते तत्प्रसङ्ग इत्यर्थः। तदस्य शंकेयमिति केचित्। नन्वेवं सा
मग्र्या व्यतिरेकात्प्रमाप्रमयोरंशे वा न गुणादिव्यतिरेकादित्याशंक्याह। तथा चेति। अन्यथेति मूले। सर्वत्रापि सा
मान्यसामग्री व्यतिरेकेणैव कार्यव्यतिरेकोपपत्तेरिति भावः। प्रमात्वं यमनुगतं नैव धर्मवत्त्वादित्युक्ते। अथा
नुगतत्वादिशंकानुत्थानमात्रं शंक्याह। ननु सामग्र्यातीति। उपाधित्वेनेति मूले। जातित्वे कार्यमात्रवृत्ति जातित्वं प्रमाणं स्या
दिति भावः। ज्ञानहेत्वतिरिक्तहेतुजन्यत्वसाध्ये एकविशेषविधेर्विशेषान्तरनिषेधफलकतया ज्ञानहेत्वजन्यत्वं विव
क्षितं। यथाश्रुतमेव वा। आद्ये मूलानुक्ताबाधो दत्तः। तत्र शंकते। नन्विति। ज्ञानाजनकजन्यत्वं यथाश्रुतमेवेति शेषः।
अत एवात्र न बाध इति ज्ञानजनकत्वस्य केवलान्वयितया ज्ञानहेत्वतिरिक्तहेतोरप्रसिद्ध्या तज्जन्यत्वाभावप्रमारू
पबाधासंभवादित्यर्थः। इदमुपलक्षणं अत एव यथाश्रुतो विरोधो न व्याख्यातः इत्यपि द्रष्टव्यं। न वाध्यविरोध इति
ज्ञानहेत्वजन्यत्वस्याकाशादौ प्रसिद्ध्या साध्याप्रसिद्धिरूपविरोधासंभवादित्यर्थः। मूले अप्रमायामित्युपलक्षणं स

र्वं च तदप्रसिद्धेरिति द्रष्टव्यं· केचित्तु ज्ञानाजनकत्वं चातीन्द्रियप्रसिद्धं· न च तस्यापि सामान्यप्रत्यासत्तौ भू
ज्ञानजनकत्वं तदिन्द्रियग्राह्यसामान्यस्यैव तदिन्द्रियप्रत्यासत्तित्वात्· योगिज्ञानं च न विषयजन्यमित्यभिसंधायाविरो
धहेत्वाभासपरतया प्रतिज्ञाविरोधपरतया वा विरोधादिति साध्यवैकल्यपरतया ऽप्रमायामिति व्याचष्टे· व्यर्थ
त्वस्य विशिष्यत इति विवृतत्वाविशेषणपदेन विशेष्याभिधानात् व्यर्थविशेष्यत्वादित्यर्थः· व्यावर्त्याप्रसिद्धेरित्यस्य
जन्यपदवैयर्थ्यादित्यर्थ इति स्वतंत्रावं बहेत् अत एव चकारोऽपि संगच्छत इति व्याख्यानमयुक्तं· यथाश्रुतविशेषण
पदार्थेनैवोपपन्नेः चकारस्य व्यावर्त्यत्वादेर्हेतूपपादकत्वेऽपि पूर्वहेतुपदद्वयासंगतेरेवेत्यभिप्रेत्य व्याचष्टे· ज्ञान
त्वमात्र इत्यादि· यत्किंचिदिति भिन्नं यत्किंचिज्ज्ञानस्य यज्जनकमनुमानादिजन्यसकलज्ञानानां च यज्जनकं काला
दि तद्भिन्नत्वमिन्द्रियादावस्त्येवेत्यर्थः· ज्ञानत्वावच्छिन्नसामग्र्यन्यत्वमिति· सर्वासु ज्ञानसामग्रीषु प्रविष्टं यत्कारणं
कालादि तदन्यकारणघटितत्वमित्यर्थः· ज्ञानत्वाश्रयेति· ज्ञानत्वाश्रयसामग्रीप्रविष्टकारणत्वावच्छिन्नान्यकारण

घटितत्वमित्यर्थः॰ अत्रापि कारणत्वाश्रयान्यत्वमात्रेऽभिमते पूर्ववत्सिद्धसाधनमिति द्रष्टव्यं॰ यदि तु यथाश्रुतं
ज्ञानसामग्र्या भिन्नसामग्रीजन्यत्वं तदा बाध इत्याह॰ फलेति॰ हेतुत्वसिद्धिरिति॰ ज्ञानत्वकारणस्याप्रसिद्धिरित्यर्थः॰ नि
त्यवृत्तेरपि ज्ञानत्वस्य कार्यतावच्छेदकत्वं संभवतीति शंकते मूलं॰ अपेति॰ व्योम्न इति॰ असत इति विशेषणमहि
म्ना आद्यक्षणसत्वमुत्पत्तिरूपं लभ्यते॰ तस्य च सर्वस्य हेत्वधिकरणक्षणाव्यवहितोत्तरक्षणवर्तित्वं संभवति विशे
षणादाने तु द्वितीयादिक्षणसत्वस्यापि लाभात् सर्वसत्वस्य उक्तहेतुनियम्यत्वं न संभवतीत्यर्थः॰ तथा च यद्धर्माश्रय
स्येति॰ यद्धर्माश्रयस्य सर्वोत्पत्तिर्यद्धेतुनियम्येत्यर्थः॰ कथितैवेति॰ सर्वस्य सत्वस्य हेत्वन्वयव्यतिरेकित्वाभावादि
त्यर्थः॰ ननु सर्वपदादानेऽयं दोषः तदेव किमर्थमित्यत आह॰ अत्रैवेति॰ सर्वस्येति॰ इदं चासत इत्यस्य विशेषणं तेन
सर्वोत्पत्तिर्लभ्यते॰ ननु यद्धर्माश्रयस्य तथा सति असंगत्यापत्तेरित्यवधेयं॰ तदर्थः॰ बाधकाभावरूपविशेषणार्थः॰
यद्धर्माश्रयस्य सर्वोत्पत्तिर्हेतुनियम्येत्यपेक्षया यद्धर्माश्रयः सर्वो हेतुनियम्य इत्येव लघुत्वे उत्पत्त्यप्रवेशाच्च ज्ञानत्वा

वि·प्र·म·

85

ग्रयः सर्वो हेतु नियमात् इति सिद्धांतयति· यदवच्छिन्नस्येति· अत्र उत्पद्यत इत्युपपत्तिः स्वरूपं यदवच्छिन्नस्येत्यवच्छि
न्नपदाद्वा सर्वत्वलाभः· तेन यद्धर्माग्नयः सर्व इति लभ्यते· हेतु नियमात्वं च हेत्वन्वयव्यतिरेकानुविधायित्वं· युक्त्यंत
रमाह· यदवच्छेदेन हेतोरिति· इति शाब्दानन्तरं चकारः पूरणीयः· हेत्विति· हेत्वधिकरणदृणान्तरत्वव्याप्यस्याधि
करणदृणकत्वमित्यर्थः· अत्र व्यवहितविशेषणत्यागादपि लाघवं ध्येयम्· ननु तः शंकते· यद्यपीति· दोषांत
रस्य· अप्रसिद्धिरूपस्य· उद्धरतया· सिद्धसाधनविरोधितया· ज्ञानत्वावच्छिन्नेति मूलं· अनित्यज्ञानत्वावच्छिन्नेत्यर्थः·
एकनिरूपितेति· एकस्यां हेतुतायां सामान्यस्य उपाधिरूपविशेषस्य च कार्यतावच्छेदकत्वानंगीकारादित्यर्थः· तेन द्र
व्यनिष्ठकारणतायां जन्यगुणत्वसंयोगत्वयोः कार्यतावच्छेदकत्वेपि न व्यभिचारः· यथाश्रुते ज्ञानत्वसाक्षाद्व्याप्यत्वम
सिद्धं· अनुभवत्वस्यैव साक्षाद्व्याप्यत्वादित्यन्यथा व्याचष्टे· ज्ञानत्वेति· वैशेषिकानुसारिविज्ञानकं वा द्रष्टव्यं· ननु स्वा
न्यविषयकप्रमायाविवक्षितत्वाच्छोक्तदोष इत्यत आह· मूले चांशेति· यद्विषयत्वेनेति· यद्विषयत्वावच्छिन्नज्ञानं प्रति

जनकतापित्वस्य तत्त्वांशे भ्रमत्वमेवास्ति न तु प्रमात्वमित्यर्थः· कारणेति· यया इन्द्रियसन्निकर्षव्यक्त्या प्रमैव जनिता
तज्जन्यत्वेन प्रमाप्रागभावजन्यत्वेन वेत्यर्थः· केचित्तु· प्रमापदेन सर्वांशे प्रमा विवक्षिता तत्स्वरसेन कारणेति मूल
मवतारयन्ति· जन्यत्वविशेषण इति· आपादकस्येति शेषः· कारणजन्यत्वरूपे जन्यत्वसमानाधिकरणस्योक्तकारण
जन्यत्वाभावस्याभावरूपे· जन्यत्वविशेषणवैयर्थ्यादिति· यादृशो विपर्ययस्तर्कपर्यवसानं तदेवानुमाने साध्यमि
ति तर्कविपर्ययस्य नित्यसाधारणत्वे न हेतौ जन्यपदवैयर्थ्यादित्यर्थः· यद्वा· विशेषणवति विशिष्टाभावो विशेषण
सहिते विशेष्याभावे पर्यवसित इत्यभिप्रायेण यथाश्रुत एवायं योयोज्यः· जन्यत्वविशेषणवैयर्थ्यात् व्यापक इति
शेषः· केचित्तु· आपादके ईश्वरज्ञानवारणाय जन्यपदं· परमते व्यावर्त्याप्रसिद्ध्या वैयर्थ्यमित्यर्थमाहुः· तन्न· आ
काशादिव्यभिचारवारकत्वेन सार्थकत्वात्· नापीति· द्वितीयपदे व्यापकीयाजन्यपदव्यर्थता उक्ता तदप्रवेशासाने
त्यर्थः· सिद्धसाधनादिति· स्वसिद्धेनैवापादकेनेष्टसाधनाद्यापादनादित्यर्थः· तथा च तद्व्यतिरेके साध्ये बाध इत्यर्थः·

नस्यादित्यर्थ इति· तथा च साध्यव्यतिरेकेण हेतुव्यतिरेकापादानमेवात्र विवक्षितमिति भावः· न च येऽप्रमा
तादात्म्ये प्रयोजकमिति मूलदर्शनादर्शने मातादात्म्यस्यैवापाद्यत्वं लभ्यत इत्यत आह· अयेपीति· आपादकव्यति
रेकस्यानुमानसाध्यस्य च ऐक्यभावरूपकं· न त्वापाद्यव्यतिरेकहेत्वोरपीत्यभिसंधायाह· वस्तुतस्त्विति· जन्यत्वेति·
विपर्ययरूपे साध्ये जन्यत्वपदं न व्यर्थं विशिष्टाभावस्य साध्यत्वादित्यर्थः· न च हेतौ जन्यपदं व्यर्थं तस्यैवाज्ञानयना
दिति भावः· अन्यथा· ज्ञानवृत्तित्वविशेषणानुपादाने· तत्रापि· अप्रमायामपीत्यर्थः· इत्यत आहेति· इत्यस्वरसा
दाहेत्यर्थः· अपिशब्दसमुच्चेयमाह· अनुमानं चेति· प्रमाऽप्रमान्यतरत्वादिति मूलं· ईश्वरज्ञानमुभयबहिर्भूतमि
ति न तत्र व्यभिचार इति भावः· ईश्वरज्ञानस्य प्रमात्वपक्षे मूलं· अनित्यप्रमात्वादिति· अनित्यानुभवत्वादिति मूले
निर्विकल्पके व्यभिचारवारणाय सप्रकारकत्वं विशेषणमित्येके· तस्यापि गुणजन्यत्वात्तत्साध्यमस्तीत्यपरे· बाधप
रिहाराय मूलं· ह्रदादिति· दृष्टान्ते साध्यवैकल्यपरिहाराय मूलमप्रमायां त्विति· इत्यस्वरसादाहेति· इत्यत आह

त्यर्थः प्रमाऽप्रमाऽजनकतावच्छेदकगुणत्वदोषत्वनिरूपणप्रस्तावे प्रमाऽजनकत्वं गुणत्वमित्यादिग्रंथासंगतिमालो
क्य तदुपपादनाय प्रस्तावयति तथा चेति वस्तुतः प्रमाऽजनकत्वमित्यादिमूले जनकत्वं पूर्ववन्निर्वाच्यं विवक्षितमिति सं
मुख एवार्थः यच्च प्रत्यक्षस्य यद्गुणदोषौ विनेत्यादिग्रंथपर्य्यालोचनयाऽप्रमाया दोषजन्यत्वाभावान्न प्रतिबंदिसंभव
स्तथापि तटस्थस्य शंकितुर्मतेन तथात्वेपि मीमांसकस्याप्रमाया दोषजन्यत्वाभ्युपगमोस्त्येवेत्यभिप्रायेण मूले एवमि
पौ ति यद्वि च मुख्यपूर्वपक्ष्यभिप्रायेणैव स ग्रंथो व्याख्यायते तदापि मीमांसकस्याप्रमाया दोषजन्यत्वाभ्युपगमोस्त्ये
वेत्यभिप्रायेण मूले एवमिति यद्यपि दाऽन्वयव्यतिरेकाभ्यामप्रमायां पित्तादिदोषजन्यत्वं प्रसाध्य प्रतिबंदिरियम
वतारणीया तस्मिंश्च पक्षे पूर्वपक्षग्रंथे दोषजन्यतामादायाप्रमाया दृष्टांतत्वं तदपि प्रसाध्यांगकमेवेति ध्येयं
मूले तर्हि विशेषदर्शनेनेति ननु नैयायिकानां गुणेनान्यथासिद्धो दोषाभावो न हेतुरिति चेत् न भूयोवयवेंद्रि
यसन्निकर्षस्यापि पित्तादिप्रयुक्ताप्रमाव्यतिरेकदर्शनात् स्वतंत्रान्वयाद्यनुविधायीत्सोपि हेतुरिति भावः प्रतिबं

दिमात्रस्येति॰ यद्यप्यन्वयव्यतिरेकयोरुक्तत्वान्न प्रतिबंदिमात्रमिदं तथाप्यसाधारणव्यक्तिमादायान्वयव्य
तिरेकयोरन्यथासिद्धत्वादेवमुक्तं॰ नियमस्येतिमूलं॰ अत्र ज्ञानत्वावच्छेदेनेंद्रियसंनिकर्षादिव्यक्तित्वेनेदस्य हेतु
प्रमात्वावच्छेदेन वा॰ तत्तत्प्रमात्वावच्छेदेन वा॰ त्रिष्वपि कल्पेषु प्रत्येकं हेतुतानुगतरूपेण वा॰ तत्र प्रथमद्वितीययोर्न
प्रत्येकं हेतुताव्यभिचारात्॰ तृतीयेनानुगतेन रूपेण हेतुताऽन्वयव्यभिचारात्॰ द्वितीये यद्यनुगतेन तृतीये यदिप्र
त्येकं हेतुत्वं तदाऽसिद्धो गुणः प्रमात्वव्याप्यधर्मावच्छिन्नकार्यतानिरूपितकारणताश्रयस्यैव गुणत्वात्॰ किंच प्रमात्वा
दिकमनुगतं हित्वा यां व्यक्तिं प्रति या व्यक्तिर्नियतपूर्ववर्तिनी सा तत्र कारणमिति तृतीयपक्षाश्रयणे रासभादे
र्घटविशेषहेतुतापत्त्याऽतिप्रसंगः तत्तत्त्वन्यत्वेनान्यथासिद्धिर्बाधिका न च सर्वत्राननुगतकार्यपदेन तत्संभ
वति निर्गलितार्थः॰ नियमश्च न व्यक्त्योरित्यप्युक्तं॰ रूपरसव्यक्त्योस्तद्दर्शनादित्यत आह॰ हेत्विति॰ प्रत्येकं हेतु
ता॰ अनुगतेन कार्यतेति निराकरोति॰ यदीति॰ इदमुपलक्षणं॰ अनुगतेन रूपेण व्यक्तिविशेषं प्रति हेतुत्वेऽच

यव्यभिचारः· अनुगतेन रूपेण प्रमात्वावच्छिन्नं प्रति प्रत्येकरूपेण तत्तत्प्रमां प्रति च प्रत्येकं हेतुत्वे समीहितसि
द्धिरित्यपि द्रष्टव्यम्· चरमपदे दोषांतरमाह· यद्वेति· ननु सति संभवे त्यागायोगादिति न्यायेन घटत्वाद्यव
च्छिन्नं प्रति दंडादेर्हेतुत्वं यथा तथा चान्यत्र क्लृप्तदंडादित एव कार्यसंभवे रासभोऽन्यथासिद्ध इत्याशंक्याह· तज्जा
तीयेति· तर्हि प्रकृतेपि प्रमाजातीयकार्यसंभवात्तत्रैव हेतुता सा च न प्रत्येकं व्यभिचारादित्यर्थः इदमेवोपसं
हरति· तथा चेति· प्रकारणार्थं मूलमवतारयति इत्यभिसंधायेति· प्रथमपदेऽनुगतरूपेण हेतुते[illegible]त्यंश
मादाय शंकते· ननु व्यक्त्योरिति· स्वरूपयोग्यतासामान्ययोः फलोपधानात्मिकाकारणताविशेषयोरित्यर्थः न
नु कार्यगतप्रमात्वस्य कार्यतानवच्छेदकत्वे तदाकस्मिकं स्यादित्यत आह· प्रमात्वं त्विति· आपाततः इत्यनेन यु
क्त्यसहत्वमुक्तं· तदेव विवृणोति· तादृशेति· ननु बाधकाभावपदेन सकलबाधकाभावो वा यत्किंचिद्बाधकाभा
वो वाऽभिमतः आद्ये विशेष्यवैयर्थ्यं· अकार्यवृत्तित्वस्यापि बाधकत्वात्· अन्त्ये नीलघटत्वादौ व्यभिचारः आका

चि·प्र·म·

८८

र्यवृत्तित्वरूपकिंचिद्बाधकाभावस्य तत्रापि सत्त्वादित्यत आह· अवच्छेदकान्तरेति· अवच्छेदकांतरोपपन्नका
र्यत्वाधिकरणवृत्तित्वं नीलघटत्वे बाधकं· स्वावच्छिन्नकार्यतानिरूपितैककारणासंभवो ऽनित्यघटज्ञानत्वे बा
धकं· एकव्यक्तिकत्वं तद्घटत्वादौ बाधकं एतत्त्रयाभावमात्रं विवक्षितं· नन्वकार्यवृत्तित्वरूपबाधकस्याप्यभा
वाये न विशेषणवैयर्थ्यं स्यादिति भावः· ननु स्वावच्छिन्नेत्यादिनैवाकार्यवृत्तेरपि वारणमिति चेत्· न· स्वावच्छिन्नया
वत्कार्यनियतपूर्ववर्त्त्यसंभवस्य विवक्षितत्वात्· अस्ति च ज्ञानत्वावच्छिन्नायावत्यः कार्यव्यक्तयस्तन्नियतपूर्वव
र्त्यात्ममनोयोगादीति· नन्वेकव्यक्तिकत्वं न बाधकं एतद्घटप्रागभावादीनामेतद्घटत्वाद्यवच्छेदेन जनकत्वादि
ति चेत्· न· लघुगुरुधर्मावच्छिन्नं प्रति अनन्यथासिद्धनियतपूर्ववर्त्तिसंभवः स धर्मः कार्यतावच्छेदकः तच्च तद्धर्माव
च्छिन्नयावत्कार्याणां यद्यनुगतं पूर्ववर्त्ति नास्ति यदि वा स धर्म एवाकार्यवृत्तिरूपस्तथापि नियतत्वांशाबाध इति प्रथ
मवारणाय स्वावच्छिन्नेत्यादि· द्वितीयवारणाय कार्येत्यादि· अवश्यकॢप्तपूर्ववर्त्तिन एव कार्यसंभव इत्यादि

रूपान्यथासिद्धिः द्वे पर्य्यवस्यति॰ अवच्छेदकं धर्म्मिणं वादाय॰ तत्र प्रथमा॰ यथा दंडत्वेन घटं प्रति हेतुतायां
क्लृप्तायामेतद्घटं प्रति एतद्दंडत्वेनान्यथासिद्धिः यथा वा कपालत्वेन घटं प्रति हेतुतायां क्लृप्तायां नीलकपा
लत्वेन नीलघटं प्रत्यन्यथासिद्धिः॰ द्वितीया यथा॰ दंडादिना एतद्घटस्याप्युपपत्तौ रासभ एतद्घटं प्रत्यन्यथासि
द्धः तत्राद्यायां वारकं अवच्छेदकांतरेति॰ स्वावच्छिन्नाकार्यता अवच्छेदकांतरावच्छिन्नकारणताकादेव य
स्मात्तन्निष्ठं धर्म्मांतरं कारणतावच्छेदकीकृत्य तन्नकार्य्यतावच्छेदकमित्यर्थः॰ एतावता द्वितीया न वारितेति तद्वा
रणाय एव व्यक्तिकत्वं॰ एकमसाधारणं कारणांतरोपपन्नमिति यावत् व्यक्तिर्यस्य तत्त्वमित्यर्थः॰ इदमुपलक्षणं
च अन्यथासिद्धिचतुष्टयान्यतरवन्नियतपूर्ववर्त्तिव्यक्तिकत्वं गुरुत्वाच्च बाधकतयाऽष्टव्यामिति संक्षेपः॰ ननु वा
चापि विशेष्यसन्निकर्षादितएव प्रमालक्षणाकार्य्योपपत्तिरिति चेत्॰ न॰ विशेष्यसंनिकर्षसमानेपि किंचिज्ज्ञा
नं घटविशेष्यकं किंचिद्घटत्वाभाववद्विशेष्यकमिति वैलक्षण्यस्य गुणकारणतां विनाऽनुपपत्तेः॰ यद्वक्ष्यति

चि॰प्र॰म॰

अन्यथानियामकं विनेत्यादि॰ न च घटत्वव्यक्तिविशेष्यतयैव तदुपपत्तिः तर्हि तस्यैव गुणत्वात् सिद्धं नः समीहि
तमिति संक्षेपः॰ अस्तु वेति मूलमभ्युपगमवादेन॰ नहि घटज्ञानात् सर्वत्र समानो न्यायो येन समानजातीयमदृ
ष्टं सर्वत्र हेतुः स्यादिति भावः॰ अत एवेति स्वावच्छिन्नयावत्कार्येष्वनुगतत्वर्ववर्त्यभावरूपबाधकसत्वादित्य
र्थः॰ अनित्यसाक्षात्कारेति॰ यावद्द्रव्येऽनुगतो गुणो निर्वहति तदेवात्र विवक्षितं॰ तच्चाग्रे विवेचनीयमेवेति भा
वः॰ कार्यतेति॰ समानाधिकरणत्वमात्रसाध्येन गुणसिद्धिरिंद्रियजन्यतावच्छेदकानित्यसाक्षात्कारत्वादि
सामानाधिकरण्यमादायोपपत्तेरिति व्यापकत्वपर्यंतमुक्तं॰ इति सारमिति॰ अत्र वदंति॰ यथार्थत्वं नैकं
तद्वति तत्प्रकारकत्वमित्यत्र तत्पदार्थस्य घटत्वपटत्वादेरननुगतत्वात्॰ किंच यत्र यज्ज्ञाप्यं तत्र तद्यथार्थज्ञा
नं गुण इति वाच्यं तथा चाननुगम एव॰ अत एव विशेष्यवृत्तिविशेषणज्ञानं सर्वत्रानुगतमिति केषांचिन्मतमपा
स्तं॰ येन संबंधेन यो विशेष्यवृत्तिरित्यादेर्लोहितः स्फटिक इत्यादिप्रमात्वानुरोधेनावश्यवाच्यतयाननुग

गमात्. अदृष्टमेवानुगतमित्यप्युक्तं. सर्वत्र समानजातीयभोगाभावेन समानजातीयादृष्टेमानाभा
वात्. किंच यद्यनित्यप्रमात्वमेकं न वेत्तदावच्छेदकं स्यात्. तदेव तु यत्र तत्पदार्थानुगमेनाननुगतमिति.
तस्मादाद्यपक्ष एव सम्यगिति. अत्रोच्यते. विशेष्यावृत्तिप्रकारकत्वरूपाणां भ्रमत्वानामभावसमुदायए
व प्रमात्वमिति न कार्यतावच्छेदकाननुगमः स्वप्रकारकयद्विशिष्टप्रत्ययविशेष्येतद्विषयसंबंधेन यत्रा
स्ति तत्प्रत्ययजनकानां तादृशविशेषणज्ञानानां तेद्कूयेयव्याप्तिता दृशविशेषणज्ञानं तादृशविशे
षणज्ञानविषयतापन्नविशेषणवज्ज्ञानं वा गुणत्वेन विवक्षितमिति न कारणतावच्छेदकाननुगमः. ईश्वरपर्यं
तधावनं तु अप्रामाण्यस्य पूर्वाज्ञानस्य प्रमानुरोधेनेति दिक्. यद्वा. विशेषणज्ञानं गुणः सर्वेषां ज्ञानानां प्रमात्वात्
धर्म्मिणि सर्वमिति न्यायात्. निर्विकल्पकवारणाय विशेषणपर्य्यन्तधावनं. ईश्वरधावनमभावप्रमानुरोधेने
ति. यद्वा नित्यघटप्रमात्वावच्छेदेन यथार्थघटज्ञानादिकं गुणः. न चान्वयव्यभिचारो दोषाभावरूपसहकारि

चिं·प्र·म·
९०

विरहेण प्रयुक्तस्य तस्यादोषत्वादित्यत्र तात्पर्यं· केचित्तु नित्यप्रमात्वं स्वाधिकरणमात्रवृत्तिधर्म्मावच्छिन्नका
र्य्यताश्रयमात्रवृत्ति· स्वाधिकरणमात्रावृत्तिधर्मावच्छिन्नकार्य्यताप्रतियोगिककारणताश्रयमात्रानुत्पाद्यकार्य
मात्रवृत्तिधर्मत्वात् प्रमात्ववत् अत्र साध्ये द्वितीयमात्रपदं सर्वस्य नित्यप्रमासु गुणजन्यत्वसिद्धये हेतौ आद्यं मा
त्रपदं नीलघटत्ववारणाय· द्वितीयं स्वरूपासिद्धिवारणाय· तृतीयं ज्ञानत्वादिवारणायेत्याहुः· अनित्यप्रमात्वमि
ति मूले· अनित्यतत्त्वप्रमात्वमित्यर्थः· व्याप्यान्तरमिति· व्याप्यपदं चात्र भेदपरमिति ध्येयम्· एतानि मूले ऽनुमा
नानि प्रकारार्थमिति द्रष्टव्यम्· दृष्टांते वा प्रमात्वपदं तत्त्वेन प्रमात्वपरम्· यद्वा· यथाश्रुतावेव पक्षदृष्टांतौ· कार्य
तावच्छेदकपदं च साध्यहेत्वोः कार्य्यतावच्छेदकव्यापकपरमिति· चाक्षुषप्रमात्वानीति मूले चाक्षुषपदं विशिष्टाभाव
प्रतियोगिविशेषणतया न व्यर्थं· एवं रजतमपि· चाक्षुषप्रमात्वस्य नीलघटत्वजन्यत्वादवच्छेदकत्वे मानाभाव इति के
चित्· तन्न· अंजनविशेषादिना सूक्ष्मगोचरचाक्षुषप्रमादर्शनेन तत्र गुणविशेषजन्यताया आवश्यकत्वात् त्वा

रुषप्रमात्वपदेन च तादृशाप्रमात्वमेवाभिमतं । एवं रजतप्रमात्वेप्यूह्यं । ननु दूषणतयेति । नन्वेकरूपेणादूष
णतयेत्यर्थः । ईश्वरज्ञानस्यानागंतुकस्य गुणत्वाद्यावच्छेदेऽसाधारणेत्यर्थ इति । नन्वेतावतापि परस्य किमिष्टमाग
तमित्यत आह । तथा चेति । इति भावः । शंकितुरिति शेषः । अथ विशेषदर्शनादिरिति मूलस्य तात्पर्यमाह । नन्वि
ति । अविनिगमः । दोषाभावमात्रस्य प्रमाकारणतायां गुणाभावमात्रस्याप्रमाकारणतायां च विनिगमकाभावः कार
णत्वापादकतया । गुणाभावमात्रस्याप्रमाकारणत्वापादकतया । नन्वनुगमः कारणत्वाभावापादकतयेति पाठेऽ
नेनाप्यदोषत्वमिति मूलमवतारितमित्यवधेयम् । व्यभिचारोद्धाराय स्वप्रमां प्रति पीतादेर्दोषत्वाभावं साधयितुं
मूलमथेत्यादि कश्चिद्दोष इत्यन्तमित्येके । अप्रमां प्रत्यननुगमो नोद्धृत इत्यत आह । तत्तद्विषयकत्वेति । ननुत्वमंप्र
तिदोषस्यान्वयव्यतिरेकाभ्यां हेतुत्वे सिद्धेऽप्यादेव दोषाभावस्य प्रमाहेतुत्वं सेत्स्यति न तु तत्तस्य प्रमां प्रति व्यतिरेकेद प्र
दर्शनेनेत्यत आह । अप्रमामिति । वस्तुतस्तु । दु अपि पदे विवक्षितार्थ एव । दोषाभावेन विनाप्रमामकुर्वतिज्ञाने

वि·प्र·म·

६१

तुष्टोमेमएतत्कवसांज्ञनदोषाज्ञावात्मेतिप्रमांप्रतिदोषाज्ञावस्यतत्तंत्रान्वयव्यतिरेकयोःदोषंविनाभ्रममकु
र्वतिज्ञानहेतुस्तोमे तस्माद्दोषादभ्रमेत्य प्रमांप्रतिदोषस्यस्वतंत्रान्वयव्यतिरेकयोश्चप्रदर्शनीयत्वादिति·तावद्दू
रवर्त्तित्वविशेषणस्यावच्छेदकतामाह·मूलेतूवापीति·तथाचतावद्दूरवर्त्तित्वविशेषणेआवयोर्धुर्यवो·तावद्दूरव
र्त्तिकेशविशेष्यकसाक्षात्कारत्वंवाकार्य्यतावच्छेदकंतावद्दूरवर्त्तिकेशत्वप्रकारकसाक्षात्कारिप्रमात्वंवाकार्यताव
च्छेदकमितिविचारममकेशपदंतवकेशत्वप्रकारकपदमितिप्रकारत्वांशःप्रमात्वांशश्चतवाधिकः·किंचकेशयत्र
स्थूलस्यकाकादेरन्नेदारोपस्तत्रापिसजातीयसंयोगस्यापेक्षितत्वात्मदुक्तंसामान्यहेतुत्वमेवसम्यगितिभावः·न
नुतावदिति·तच्चिदमनुपपन्नं·उक्तन्यायेनप्रमात्वस्यकार्यतावच्छेदककोटावप्रवेशादिति·मेवं·सजातीयसंयोग
विशेषस्यभ्रमविरोधितयाप्रमाविशेषहेतुत्वेनचतदसन्निधानात्·अस्तिहिकेशानांसंयोगविशेषोयस्मिन्संजनि
तकाकादेरन्नेदारोपः·किंतुकेशभ्रमएवेति·इंद्रियसन्निकर्षविशेषणस्यकृत्यमाह·अन्यथेति·ननुतच्चदूरत्वदो

षादेवप्रमानुत्पाद इत्यत आह· वस्तुतस्त्विति· भावत्वेनेति मूलं· यद्यपि भावत्वमतिप्रसक्तं· तथापि भावधर्म्मो विशेष
दर्शनत्वमेव भावत्वपदेनोक्तं· प्रमेति· अत्र सत्यंतं गुणाभाववारणाय· भ्रमजनकत्वं च भ्रमत्वव्याप्यधर्म्मावच्छि
न्नकार्य्यतानिरूपितकारणताश्रयत्वं एतच्च दोषत्वनिर्वचनं दृष्टांतार्थं· विशेषादर्शनस्यादोषत्वार्थं वा· अप्रमेति
अत्र सत्यन्तं दोषाभाववारणाय भ्रमाजनकत्वं च प्रमात्वव्याप्यधर्म्मावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं क
चित्तु· अत एव वा गुणसिद्धिः· न हि प्रमाजनकतावच्छेदकरूपावच्छिन्नाभाववत्वेन जनकत्वादन्यत्तत्र दोषत्वं· अप्र
माजनकतावच्छेदकरूपावच्छिन्नाभाववत्वेन जनकत्वादन्यद्गुणत्वमिति पाठः तत्र अत एवेति विशेषादर्शनाभाव
त्वेन जनकत्वादेवेत्यर्थः· प्रमेति· प्रमाजनकतावच्छेदकावच्छिन्नामुख्याभावो यस्य तत्वेनोपलक्षितस्य जनकत्वादि
त्यर्थः· नवेति तवापीत्यर्थः· एवं अप्रमाजनकतावच्छेदकावच्छिन्नामुख्याभावो यस्य तत्वेनोपलक्षितस्य जनकत्वादि
त्यर्थः· इत्यर्थ इति· तथा चाननुगमकतया विशेषादर्शनस्य दोषत्वं नेति भावः· ननु विशेषदर्शनप्रतिबंधकत्वेना

वि·प्र·म·

१४

नुगमात्कथमननुगमइत्यतआह·मूले मण्यादेरिवेति· तत्तन्मं प्रति तत्तद्दोषस्य हेतुत्वादित्यर्थः· प्रमां प्रति च तत्
द्दोषाभावस्य नानानुगमइत्याह· मूले तद्भावेति· ननु मण्यादेरननुगतस्य दोषत्वमनन्यगत्याइह तु न तथेत्याचा
यनशोकत·मूले सर्वं चेति· ननु विशेषप्रमाविरहस्तज्जनकगुणाद्यभावादेवस्यादित्यरुचेराह मूले· किंचेति· तत्र वे
तिमूलं· इदं च विशेषदर्शनशब्दस्य विशेषप्रमापरत्वे विशेषप्रत्यक्षपरत्वे वाऽदृष्टव्यं स हेतुरिति मूलं· स एव हेतु
रित्यर्थः· तथा चेन्द्रियसन्निकर्षस्य तेनान्यथासिद्ध्या न प्रमाहेतुत्वमिति तटस्थशंकार्थः· न च वं साक्षात्त्वमपि प्रमांशे न
स्यात् तद्दंशे इन्द्रियसन्निकर्षाजन्यत्वादित्यतआह· मूलं· साक्षात्कारित्वं चेति· लाघवादिन्द्रियसन्निकर्षजन्यत्वमेव सा
क्षात्त्वे तंत्रं· न तु तद्दंशेन्द्रियसन्निकर्षजन्यत्वमिति भावः· न च वंशेजनकत्वमिदमेव यत्तद्दंशविषयकत्वावच्छेदेन ज
नकत्वमित्यतआह· मूलं· अप्रमांशे चेति· तन्मते तद्दंशेन्द्रियसन्निकर्षजत्वस्य साक्षात्त्वप्रयोजकत्वादत एव प्रत्यभिज्ञायां
तत्तांशे परोक्षत्वं न्यायनये च स्मरणरूपसन्निकर्षजन्यत्वात् प्रमांशे प्रमात्वं स्यादिति दूषणं बोध्यम्· अतिप्रसंगइ

तिमूलंत्वमानुमित्यादेरपिसाक्षात्त्वापत्तिः·दोषविशेषस्यतथात्वेऽननुगमइत्यर्थः·वयंवक्ष्यामइति·एतत्तात्पर्यम
नित्यप्रमात्वमितिप्रकरणेदर्शितंप्रामाण्यापत्तेरिति·पक्षतावच्छेदकावच्छिन्नसाध्यविषयत्वस्यानुमितौवक्ष्यमा
णत्वात्तत्रेष्टापत्तिरित्यवधेयम्·अन्योन्याश्रयमेवविवृणोति·प्रमायाइति·विसंवादीति·सतचेश्वरस्यापिवाक्या
र्थज्ञानाभावादितिभावः·अन्यत्राप्यनुमानेति·इदंचविशेषान्वयव्यतिरेकग्रहकालेसामान्यरूपेणसामान्य
धर्मयोरनुपस्थितौयदाचतत्कालेसामान्यधर्मोपस्थितिस्तदाप्रत्यक्षतएवकारणताग्रहइति·अस्तुवेति·याव
तांविशेषाणांसामान्येनरूपेणसामान्यकार्यहेतुतातावतांस्वातंत्र्येणविशेषेऽपिहेतुतेत्यर्थः·तथाचपदज्ञाना
दिकमपिस्वातंत्र्येणविशेषेहेतुःस्यादितिभावः·पदज्ञानादिकंचतथानहेतुरितिवाक्यार्थज्ञानमात्रस्यस्वातंत्र्येण
विशेषहेतुतायांतन्मात्रनिष्ठंवक्तव्यंवाक्यार्थज्ञानत्वमुक्तनियमरक्षार्थेसामान्यहेतुतावच्छेदकमस्त्वित्याह·तेने
ति·वाक्यार्थस्यवाक्यार्थमात्रस्यापादानंतरं·यावत्सामान्यघटितविशेषधर्म्मोविशेषहेतुतावच्छेदकःतावतांसामान्या

वि·प्र·म·

९३

नां सामान्यकार्यहेतुतावच्छेदकत्वनियम इत्यर्थः। तथा च वक्तृवाक्यार्थज्ञानत्ववक्तृयथार्थज्ञानत्वाभ्यामपि सामा
न्यकार्यहेतुतावच्छिन्नतामितिभावः। अप्रामाण्यं अग्राहकत्वं। शुकाद्युदीरितप्रमाणशब्दे तदभावादाह। यथार्थे
ति। तज्जन्यप्रमायामित्युपलक्षणं। वाक्यसामान्यजज्ञाने पदज्ञानं तु बोधयिषापूर्वकवाक्यजज्ञाने वाक्यार्थज्ञानं हे
तुरित्यपि ज्ञेयं। तथा च शुकादिवाक्यजविसंवादिज्ञाने विशेषस्यातंत्र्येण पदज्ञानस्य हेतुत्वमस्त्वित्युक्तनियमास्त्वे
तिभावः। दोषांतरं सामान्याहेतुत्वे विशेषाहेतुत्वं। ईश्वरज्ञानद्वारा इत्युपलक्षणं। उक्तगत्यावतिज्ञेयम्। स्थूलेति। स्थू
लावयवकेत्यर्थः। तु योवयवेंद्रियसन्निकर्ष इत्यत्र तु यः पदेन स्थौल्याभिधानादिति भावः। पक्षतावच्छेदकाविरो
धीति। पक्षतावच्छेदकावच्छिन्नपक्षनिष्ठसाध्यव्याप्यवत्त्वप्रमा पक्षतावच्छेदकावच्छिन्नसाध्यकानुमितिप्रमायां गुण
इत्यर्थः। यद्यपि पक्षतावच्छेदकसमानाधिकरणसाध्यकायामनुमितिप्रमायां यथार्थलिंगपरामर्शो गुण इत्यर्थः। गं
धप्रागभावावच्छिन्नपक्षकानुमितेरपि पक्षतावच्छेदकसमानाधिकरणसाध्यप्रमात्वादिति भावः। इदमुपलक्षणं।

७।

ताघवोपनीतधर्म्मवत्साध्यगोचरायामनुमितिप्रमायां तद्धर्म्मवत्साध्यज्ञानं गुणइत्यपि ज्ञेयं॰ पर्य्यन्तावच्छेदके
ति॰ अनुमितिविषयीभूतपर्य्यन्तावच्छेदकसंबंधाश्रयसाध्यस्य ज्ञानमित्यर्थः॰ न चैवमित्यादिना वगुणान्तरं वदा
ति॰ विशेषणविशेष्येति॰ नन्वेकइत्युपयुक्तं॰ विशेषणतारूपादिना संयुक्तसमवायस्य विशेष्येण घटेन संयोगस्यासं
निकर्षत्वात्॰ न च विशेष्यसन्निकर्षघटितविशेषणसन्निकर्षस्तदर्थः दंडी पुरुषइत्यादावभावादिति चेत्॰ न॰
एकोविलक्षणोविशेष्यवृत्तिविशेषणसन्निकर्षोयद्वा विशेषणवद्विशेष्यसन्निकर्षइति भावात्॰ न च प्रथमेति॰
प्रथमेनिर्विकल्पकाव्याप्तिः चरमेसामान्यविशेषयोस्तुल्ययोरन्यत्वदोषान्वेत्यर्थः॰ एवमिति॰ ईश्वरज्ञानमा
दायगुणलक्षणसमर्थनइत्यर्थः॰ पर्य्यन्तावच्छेदकेति॰ अनुमितिसमानविषयकप्रमात्वादिनेत्यर्थः॰ अत्र केचित्॰ अनुमि
तिप्रमात्वादेर्यत्तत्पदार्थघटितत्वेनाननुगतत्वात्॰ कारणशरीरेपिपर्य्यन्तावच्छेदकादेर्यथार्थत्वस्य चाननुगतत्वा
न्नैवमपि लक्षणहेतुमसम्भवः॰ किंतु घटत्ववद्विशेष्यकघटत्वप्रकारकप्रत्यक्षस्यलोघटावयवसंयोगोगुणइत्यादि

क्रमेण सर्वज्ञोहनीय इत्याहुः इति दिगिति॰ अत्र केचिदाहुः यथा गुणानुरोधेन सर्वज्ञसिद्धिः तथा ग्राह्यत्व
मस्यैव सर्वत्र दोषत्वकल्पनान्नित्यत्वान्तोपि कश्चित्सिद्ध्येत्॰ यथा हि ज्ञानत्वप्रमायां यथार्थग्राह्यज्ञानस्यान्वय
व्यतिरेकौ दृष्टौ तथा शाब्दभ्रमे ग्राह्यत्वमस्याप्यन्वयव्यतिरेकौ दृष्टावेवेति॰ अत्रोच्यते॰ तदभाववति तज्ज्ञाना
पेक्षया तदभाववद्ज्ञानमेव दोषो लाघवात्॰ अयथार्थं हि भ्रमः सर्वत्रारोप्याभाववतो ज्ञानमस्ति॰ आरोपविषया
ज्ञाने आरोपासंभवात् तथा च त्वां प्रति पुरुषस्यैव ज्ञानं सर्वत्र दोष इति किं त्वां तान्तरकल्पनेन॰ न चैवं भ्रमायामपि तद्
तितत्प्रकारकज्ञानापेक्षया तद्वद्ज्ञानस्यैव गुणत्वमस्त्विति वाच्यं॰ तावतापीश्वरसिद्धेः न हि प्रमापूर्वस्त्वकार्यं विशे
षणज्ञानमात्रव्यापकं॰ क्वचिद्विशिष्टप्रत्यक्षस्य विशेषणास्मरणविशेष्यसन्निकर्षाभ्यां संभवादिति संक्षेपः॰ व्याप्य
ति॰ यथार्थव्याप्यवत्ताज्ञानमित्यर्थः॰ प्रत्यक्षस्येति॰ प्रत्यक्षसामान्यस्येत्यर्थः॰ प्रामाण्यव्याप्येति पुरुषत्वव्याप्यवति
पुरुषत्वज्ञानत्वादीत्यर्थः॰ ननु व्याप्यवद्विशेष्यकत्वमपीति॰ विशेष्यत्वांशांशाग्राह्य व्याप्यवत्वांशे सत्ताविनिश्चयात्

वाद इत्यर्थः। इदं चोपलक्षणं व्याप्यवद्विशेष्यकत्वग्रहे ऽपि तस्याप्रामाण्यव्याप्यत्वेन व्यावर्तकत्वेन वा ग्रहात्त्वकमि
त्संशय उपपद्यत एवेत्यपि द्रष्टव्यं। तद्भ्रमत्वस्येति। पुरुषत्वभ्रमत्वस्येत्यर्थः। अप्रामाण्यशंकाशून्यवि
रोधिज्ञानं सामान्यत एव स्वारसिकमन्यथाहि तं वा संशयं प्रतिविरोधीति भावः। इदं च मतभेदेनोक्तं तेनानुभ
वं दृष्ट्वेत्यत्रोक्तं न विरुध्यते। वस्तुतो ऽवधारणरूपं ज्ञानं संशयविरोधि। यथा च मम विशेषदर्शनं जन्यमवधा
रणत्वे तंत्रं। तथा त्वव्याप्यविषयकत्वमेव तत्र तंत्रमिति क्वापि भ्रमत्वरूसंशयो न स्यादिति मूलार्थः। भ्रमत्वरूहेतु
त्वे भ्रमत्वरूसामान्यहेतुत्वे। व्याप्यदर्शनं त्विति। धर्मिनिष्ठस्य ग्राह्यव्याप्यस्य ज्ञानमित्यर्थः। ननु यत्रैतादृशं व्याप्यं
व्याप्यत्वेन न ज्ञातं किंतु स्वरूपेण तत्र संशयविपर्ययोत्तरप्रमापत्तिरित्यत आह। व्याप्यग्रहरूपेति। तदुक्तं नाम
ननुगत्वादिति दूषयति। व्याप्यदर्शनेति। व्याप्यदर्शनं त्विति दूषयति। व्याप्यत्वं त्विति। तत्सामग्रीति घटगंध
भ्रमत्वरूसामग्रीत्यर्थः। तदुत्तरेति घटगंधसंशयोत्पन्नचक्षुर्घ्राणजावित्तिन व्यभिचारः। यद्वेति। प्रतिबंधकाधी

वि·प्र·म·

न विशेषादर्शनपूर्वकसंशयविपर्ययोत्तरप्रत्यक्षे विशेषदर्शनं हेतुरित्यर्थः इदमुपलक्षणं· विशेषादर्शनप्र
युक्तसंशयविपर्ययोत्तरप्रत्यक्षे विशेषदर्शनं हेतुरित्यभिप्रायः· प्रासंगिकं विशेषदर्शनस्याव्यभिचारसमर्थनं न
95 त्वादुक्तसामग्र्यास्तस्यान्यथासिद्धिं निराकर्तुमनुवदति· यत्त्विति· चक्रभ्रमिजनकदण्डत्वेन कारणत्वस्य वक्ष्यमाण
त्वात्तत्तुल्यन्यायेनेदमपि संभवत्येवेत्यस्वरसादाह· वस्तुतस्त्विति· नाननुगमेति· इदमुपलक्षणं व्याप्यदर्शनसा
मग्र्यपेक्षया व्याप्यदर्शनस्य लघुत्वादेव हेतुत्वं संभवादिति· स्वरूपसद्व्याप्यं संशयविपर्ययोत्तरप्रमाकारणमस्त्वि
ति न दूषितं तुच्छत्वात्· तथाहि· सामान्यतो व्याप्यदर्शनस्य कारणत्वे गृहीते तस्यैव प्रमात्वपुरस्कारेण प्रमारूप
कार्यविशेषहेतुत्वे संभवति कारणान्तरकल्पनागौरवमस्त्येव· किञ्च· व्याप्यस्य कारणत्वे लौकिकप्रत्यक्षमात्रे तस्य का
रणत्वसंभवान्न संशयविपर्ययोत्तरप्रत्यक्षरूपे विशेषहेतुत्वमिति· किञ्च पुरुषत्वव्याप्यापेक्षया पुरुषत्वं लघ्विति
तस्यैव हेतुत्वमुचितं· तस्मात्संशयविपर्ययोत्तरप्रत्यक्षे विशेषदर्शनं तत्प्रमायां तत्प्रमा हेतुः· अत्र कश्चिदाह·

यत्र संशयस्तत्र विशेषदर्शनाभावे सति प्रत्यक्षं न जायते तत्सत्त्वेव जायते· यत्र तु न संशयस्तत्र तेन विना
पि जायत इति प्रत्यक्षसामान्ये विशेषदर्शनविरहविशिष्टसंशयस्य प्रतिबंधकत्वात्तदभावः कारणं· सर्व
क्वचिद्विशेष्यसंशयविरहात् क्वचिद्विशेषणविशेषादर्शनविरहात्· न चैवं प्राहे - - ऊनकस्यैव विशेष
दर्शनस्य प्रत्यक्षहेतुता न स्यादिति वाच्यं· विशेषदर्शनत्वेन हेतुत्वाभावे इष्टापत्तेः प्रयोजकत्वमात्रस्य विशि
ष्टाभावसंपादकत्वेनेष्टत्वात्· एवं विपर्ययोपि विशेषादर्शनविशिष्टः प्रतिबंधकः तदभावश्च कारणमिति वि
शेषदर्शनमुत्तेजकतया न कारणं अन्यथा विशेषदर्शनत्वेन संशयविपर्ययोत्तरप्रत्यक्षं प्रति कारणत्वा
गीकारे संशयस्थले यत्र विशेषदर्शनविरहस्तत्र प्रत्यक्षसामान्यसामग्रीसत्वे प्रत्यक्षोत्पादो दुर्वारः तदस
त्वे तस्मादेव संशयोत्तरप्रत्यक्षविरहः न तु विशेषदर्शनस्य हेतुत्वेनेति· न चैवं प्रत्यक्षे विशेषदर्शनमपि गुणा
इति ग्रंथविरोधः· विशेषदर्शनत्वेनासाधारण्येन तथा कारणत्वानंगीकारादिति वाच्यं· तत्त्वेन सामान्यतः कार

वि॰प्र॰म॰

९८

णत्वानंगीकारेपि संशयविपर्ययोत्तरप्रत्यक्षभ्रमायां विशेषप्रमात्वेन गुणत्वांगीकारादिति॰ अपरस्त्वाह॰
विशेषादर्शनसहकृतसंशयस्य प्रतिबंधकत्वेमानाभावः आवश्यकदोषेणैव कार्याभावोपपत्तेस्तथाहि॰ सं
शयोत्पत्तिकालीनपुरुषत्वनिश्चयाभावे दोष एव तंत्रं कार्यसमानकालीनप्रतिबंधकाभावहेतुत्वमादाय संशय
सामग्रीप्रतिबंधकत्वमादाय वा तत्रान्यथासिद्धावपि धर्मिज्ञानकाले दैवाधीनपूर्वोत्पन्नसंशयाजनकपुरुषत्वस्म
तिमतः कुतो न पुरुषत्वनिश्चयो यदि दोषो न प्रतिबंधकः॰ विशेषदर्शने च सति विशेषादर्शनरूपदोषविरहादे
व कार्य्यं॰ ननु विशिष्टस्य प्रतिबंधकतया तदभावः कारणं॰ न चैवं विशेषादर्शने सति संशयानुत्तरप्रत्यक्षम
पि न स्याद्दोषसत्त्वादिति वाच्यं॰ तच्च तस्या दोषत्वात्॰ फलबलेन क्वचिदेव तस्य दोषत्वादिति॰ एवं व्यभिचारसंशया
देरपि नाव्यभिचारनिश्चयादौ प्रतिबंधकत्वं॰ किंतु तत्र तत्र विशेषादर्शन[illegible]दंतर्गतमेवेति॰ चिन्तामण्युक्तिस्तु
मतत्वे[illegible]नादेर्दोषस्यैवेति॰ तदयं निर्गलितार्थः॰ न विशेषदर्शनस्य विशेषकारणत्वं येन कार्य्यसामान्यापत्तिः॰

नापि विशेषादर्शनमपि तदन्तर्गतमेवेति· चिन्तामणिकृतस्तु मतभेदेनेति· तदुभयमपि न विशेषदर्शनं य
त्र भ्रमरूपं तत्र संशयेऽस्त्यपि प्रत्यक्षं भ्रमरूपं न भवत्येवेति दोषतया विशेषभ्रमस्य संशयविपर्ययोत्तरप्रत्य
क्षे भ्रमहेतुत्वस्यावश्यकत्वे सामान्यतो विशेषदर्शनस्य हेतुत्वे यत्सामान्यमिति न्यायेन प्रमा विशेषे विशेष वि
शेषप्रमाया हेतुत्वात्· किंच अपरेण स्थलविशेषे विशेषादर्शनं दोष इति वदता च संशयकालीनविशेषादर्श
नस्य दोषत्वाभ्युपगमे विशेषणविशेष्यपरावर्त्तनमात्रं कृतमिति· यच्च केनचिदुक्तं· विशेषदर्शनस्य विशेष
कारणत्वे संशयस्थले तद्विरहदशायां कार्यसामान्यापत्तिरिति· तन्न· संशयविपर्ययानुत्तरप्रत्यक्षे नवधा
रणारूपे भ्रमाभावस्य संशयविपर्ययोत्तरप्रत्यक्षेऽवधारणरूपे विशेषदर्शनस्य हेतुत्वात्· न चैवं कारणद्वयांगी
कारगौरवं अवधारणानवधारणविभागबाध्यबाधकत्वव्यवस्थान्यथानुपपत्त्या गौरवस्य प्रामाणिकत्वात्· नन्व
वधारणत्वं नाम इतरकोटिव्यवच्छेदविषयत्वं तच्चेतरकोट्यभावग्राहकसामग्र्या वशादेवोपपन्नमिति किं विशेष

दर्शनहेतुत्वाभ्युपगमेनेति॰ मैवं॰ विशेषदर्शनं विनाघटोयं नपट इतिनिश्चयेपि अवधारणत्वाभावात्
तस्मादवधारणत्वं जातिः यदालिंगितं ज्ञानं अन्याहितयापि शंकया नाभिभूयते॰ सा च जातिर्यद्यपि नानातथा
पिशंकाविरोधित्वेनानुगमान्न दोषः॰ आप्तवाक्यादि॰ नासंशयविरोधितद्वत्त्वादिना च यत्र संशयोत्तरप्रत्यक्षं
तत्र व्याप्यदर्शनं व्यभिचरतीति चेत्॰ न॰ भ्रमविरोधिदर्शनत्वेन भ्रमविरोध्यदर्शनप्रयुक्तसंशयविपर्ययो
त्तरप्रत्यक्षं प्रतिहेतुत्वात्॰ यद्वा॰ तत्रावधारणाभावान्न व्यभिचारः॰ ननु तथापि संशयसामग्र्यभावस्यावश्यं
कारणत्वाद्विशेषदर्शनत्वेन कारणत्वे मानाभाव इति चेत्॰ न॰ अवधारणत्ववैशिष्ट्यान्यथानुपपत्तेरुक्तत्वादि
ति॰ ननु विशिष्टाभावहेतुत्वे कारणान्यत्वलाघवं॰ तथाहि॰ विशेषादर्शनसहकृतव्यतिरेकज्ञानत्वेन सामा
न्यतः प्रतिबंधकत्वात्तदभावः सामान्यकारणं संशयसामग्र्यभावश्च निश्चयं प्रति हेतुरस्तु न्यायमेवमम का
रणं। विशेषदर्शनहेतुत्वे तु संशयविपर्ययोत्तरप्रत्यक्षे विशेषदर्शनं सामान्ये व्यतिरेकनिश्चयाभावः निश्च

येसंशयसामग्र्याभावश्च हेतुरितिकारणत्रयमिति· नच गंधप्रागभावावच्छिन्नपक्षे गंधानुमितौ बाधस्याप्रतिबं
धकत्वापत्त्या व्यतिरेकनिश्चयस्य दृष्टघटेऽप्रतिबंधकत्वे विशिष्टाभावहेतुत्वेपि कारणत्रयमिति वाच्यं· विशेषादर्शन
सहकृतव्यतिरेकज्ञानं प्रतिबंधकमित्यत्र विरोधिविशेषदर्शनाभावस्य विवक्षितत्वात्· तस्य चोक्तबाधस्थले सत्वात्·
गंधव्याप्यपृथिवीत्वज्ञानस्य गंधप्रागभावज्ञानाविरोधित्वादिति· तदिंद्रियजन्यप्रत्यक्षे तदिंद्रियजन्यव्यतिरेक
ज्ञानस्य विशेषादर्शनसहकृतस्य प्रतिबंधकत्वमस्तु· तथा च प्रागभावावच्छिन्नपक्षकानुमितावुक्तदोषो नत्व
तातिकेचि[illegible]दुक्तं· तन्न· घटे गंधो नास्तीति घ्राणजन्यभ्रमरूपप्रत्यक्षदशायां गंधव्याप्यपृथिवीत्वज्ञाने गंधप्र
त्यक्षतापत्तेः· न च तदिंद्रियजन्यविशेषदर्शनमेवोत्तेजकमिति वाच्यं· घृतादौ पृथिवीत्वसंदेहप्रयुक्तगंधसंदेहप्रका
रांतरजन्यपृथिवीत्वनिश्चयात् घ्राणजगंधनिश्चयदर्शनादिति· तस्माद्विशेषदर्शनहेतुत्वे कारणबहुत्वगौरवमिति· मैवं·
गौरवस्याप्रामाणिकत्वात्· अन्यथावधारणानुपपत्तेरुक्तत्वादिति· वस्तुतस्तु तथापि कारणत्रयमेव· तथाहि· सामान्य

नरूपेण हेतुत्वमसंगतं॰ तद्धि निश्चयं प्रति वा विशिष्टज्ञानं प्रति वा॰ नाद्यः विशेषादर्शनकालीनव्यतिरेकनिश्चयस्य सं
शयं प्रत्यपि प्रतिबंधकतया तदसंग्रहात्॰ न द्वितीयः संशयं प्रति विशेषदर्शनसहकृतसंशयस्याप्रतिबंधकत्वात्
किं च विशिष्टाभावापेक्षया विशेषदर्शनं लघु॰ न च विशिष्टाभावकारणत्वपक्षे कार्यदिशि लाघवमिति वाच्यं॰ स्वगतला
घवापेक्षया कार्य्यगतलाघवस्य बहिरंगत्वात् सामान्यलाघवापेक्षया लाघवं नरस्य बलवत्त्वाच्च॰ न चात्र लाघवमे
व न अवच्छेदकयोरेकव्यक्त्यसमावेशादिति वाच्यं॰ सति संभवे धर्म्मिलाघवस्याप्यादरात्॰ न चैवमुक्तरीत्या सिध्युत्त
रानुमितौ सिसाधयिषाया हेतुत्वापत्तिरिति वाच्यं॰ अशावधारणत्वस्यैव तत्रानुमितौ वैलक्षण्यस्याभावादिति संक्षेपः॰
एवमिति॰ विषये क्वसामान्यतएव प्रत्यक्षसामग्र्या बलवत्त्व इत्यर्थः॰ अथेति॰ सिसाधयिषाविरहसहकृतप्रत्यक्षादि
प्रमाणाभावस्य पक्षताघटकस्य सत्त्वादनुमित्सास्थले नानुमितिसामग्र्यभाव इति पर्य्यवसितार्थः॰ नन्वेवं ज्ञानद्वयस्य
प्रत्यक्षहेतुत्वे गौरवमित्यत आह॰ पश्यामीति॰ अनुमित्सास्थले च विशिष्टज्ञानमेव ज्ञायतेऽत्याशयः॰ आद्यं दूषयति॰ प

क्षताया इति सिसाधयिषाविरहसहकृतसिद्ध्यभाव एव लाघवेन पक्षतेति वक्ष्यमाणत्वादिति तात्पर्यं· न चोक्तदोष
त्रियामानाभावोपि पक्षतान्तर्गत इति वाच्यं· समाधानस्य लघुनो वक्ष्यमाणत्वात्· द्वितीयं दूषयति· अनुमितीति· तथा
च विनिगमनाविरहात् तदुभयत्र विशिष्टज्ञानमेव हेतुरिति भावः· इच्छाघटितेति· यत्रोभयोः सामग्री इच्छारहिता तत्र
समाने विषये प्रत्यक्षसामग्र्या बलवत्त्वं· यत्र चान्यतरेच्छा तत्र इच्छाघटितसामग्र्या बलवत्त्वमित्यस्यायमर्थो यत्साप्रति
बंधिका· तथा च सिसाधयिषाविरहसहकृतप्रत्यक्षादिसामग्रीविरहो हेतुरागत एवेति वाच्यं· प्रत्यक्षादीच्छासह
कृतप्रत्यक्षादिसामग्रीविरहस्य हेतुत्वेप्यनुमितावसाधारण्याभावात्· तदिदमुक्तमाह· अर्थादौ ज्ञानादाविति·
अत एव मानाभावस्य पक्षताप्रवेशापेक्षया च लाघवक्लृप्तसामान्यहेतोरेव कार्योपपन्ने र्विशिष्य हेतुत्वे मानाभावा
त्· तथात्वेपि वा न पक्षताप्रवेशः किंतु पृथगेव हेतुत्वमित्यनुमानालोके वक्ष्यते· तदभिप्रेत्याह· इति दिगिति· उत्तरं·
करस्त्वमरुप्यपुरुषत्वमस्यापि स्थाणुप्रमाबाधकत्वं· प्रत्यक्षविशेषदर्शनमिति मूले प्रत्यक्षविपरीतदर्शनमित्यर्थः·

चि·प्र·म· तथाच तदेव तज्जनकमित्यागतमतो हेतुतया व्याचष्टे·इदमेवेति·ननु भ्रमविरोधिविशेषत्वप्रकारकदर्शनं
विनापि भ्रमोत्पत्त्या व्यभिचार इत्यत आह·पृथिवीति·तथाच भ्रमविरोधिसामग्रीत्वेन हेतुता न तु विशेषत्वप्रकारक
१५ दर्शनत्वेनेति भावः·तदपेक्षयेति·अत्रावच्छेदकमात्रकल्पनाल्लाघवमिति भावः·तत्राप्यभावस्यावच्छेदकत्वे गौरवापा
तः प्रमेति·दोषाभावहेतुत्वेनेति·दोषाभावमात्रस्य हेतुत्वे इत्यर्थः·मूले वाक्यार्थज्ञानस्येति·वाक्यार्थप्रमाया इत्यर्थः·मूले
उक्तनयमप्राप्तिवाक्यार्थप्रमात्वमाद्यभावस्येत्यर्थः·नित्यत्वे सतीति निर्दोषत्वं विशिष्टं प्रामाण्यप्रयोजकमिति दूषयति·मूले लौ
क इति·निर्दोषत्वमेव प्रामाण्ये तंत्रं नित्यत्वं तु वेदे निर्दोषत्वोपपादकत्वमात्रेणोक्तमित्याशंकते·अथेति·तंत्रं तत्प्र[illegible]ता मूले
रकस्थले भ्रमो भिन्नविषयक एव·प्रतारणापि न दोषरूपा अविद्यमानप्रतिपादयिषाया एव तथात्वात् करणापा
टवमप्यविद्यमानविषयकमेव दोषो न तु विद्यमानविषयकमित्यरुच्या मूले·किंचेति·योग्यतासहितः संवादः प्रामा
ण्यतंत्रमित्याशयवत्तो मूले यच्चेति शंका·यद्वा·तरस्यस्याशंकेयं·घटवतीत्यादि मूलस्य यथाश्रुतस्यालग्नकतया

विकल्पयति॰ अथेति॰ द्वितीयविकल्पे कारणपदं प्रयोजकपरं अकारणीभूतेति पाठेपि प्रयोजकत्वमेवार्थः॰ व
स्तुतो वाक्यार्थाबाध इत्यत्र वाक्यत्वेन तदर्थाबाध इत्यत्र च वक्तृवाक्येन वाक्यस्य प्रवेशात् विकल्पयोर्भेदः॰ आद्य इति॰
तथा च वाक्ये कारणमाहात्म्यात् ज्ञानमेव तद्विषयस्याबाधितत्व एवेत्यर्थः॰ द्वितीये तु॰ वाक्यप्रयोजकत्वं त्वमस्यापातितः पू
र्वदोषालग्नकतया दोषान्तरपरं मूलं॰ किंचेति॰ वस्तुत इति व्याख्यानेऽपूर्वदोषालग्नकत्वे उक्तदोषगौरवपरं
मूलं॰ किंचेति॰ तदवतारयति॰ द्वितीय इति॰ लाघवादिति मूलं॰ यद्यपि यथाश्रुते वाक्यजन्यप्रतिपत्तिविषयस्य वा
क्यार्थतया न लाघवं प्रत्युतानन्यथासिद्धिप्रवेशात् उक्तापेक्षया गौरवं॰ तथापि परंपरया तन्ममूलकत्वासत्त्वाद्वाक्य
प्रयोजकेत्यादेर्यथाश्रुतस्यासंभवितया प्रकृतवाक्यप्रतिपाद्यविषयकप्रकृतवाक्यप्रयोजकज्ञानविषयाबाधो वा
क्यस्तथा च सति प्रकृतेरुत्पत्तावपि वस्तुगत्यनुरोधेन प्रकृतवाक्यप्रतिपाद्याबाध एव योग्यतास्थितिलाघवं मूलं॰
वस्तुत इत्यादि व्याख्यानेतद्वाक्यार्थाबाधप्रवेशात् स्फुटं लाघवं॰ वस्तुतस्तु मूलमेवं विकल्पनीयं संवादे सत्यपि योग्य

चिं·प्र·म·

100

तामास्तीति वक्तुः अन्नतवाक्यार्थस्य कारणज्ञानविषयस्य बाधो वाऽन्नतवाक्यार्थस्य प्रयोजकज्ञानविषयस्य
बाधो वा योग्यता विवक्षिता· इयं इष्यत इति मूले घटवतीति· किं चेति च· अत एव समानविषयतया किं चेति संगच्छ
इति ज्ञेयं· विकल्पद्वयान्तरमाह· गोत्वेनेति· आद्यं दोषं विवृणोति· त्वयापीति· द्वितीयं विवृणोति· न चेति· तत्र लिं
गज्ञानं· विशेषप्रमेति· समानाधिकरणविशेषप्रमेत्यर्थः· इदमप्युपलक्षणं· सादृश्यप्रत्यक्षमूलिकायां प्रमोपमिता
वीश्वरसादृश्यप्रमेयगुण इत्यपि ध्येयम्· वस्तुत इत्याद्यापाततः प्रमाणत्वेन जनकत्वे गौरवाद्यथार्थत्वमात्रस्यापरि
तत्वादिति· ननु विशिष्टवैशिष्ट्यमिति· प्रकृतवाक्यार्थविषयकत्वावच्छिन्नप्रमन्नतवाक्यजनकताकप्रमात्वेन गुणत्वं
गौरवान्नेत्यर्थः· दिगिति· अबाधितार्थकवाक्यप्रयोक्तुः पदज्ञानादिकमपि गुणः संभवतीति भावः· नैयायिकस्येश्वर
निराकरणमयुक्तमित्यालोक्य सांप्रदायिकोक्तयुक्तिनिराकरणमात्रे मणिकृतन्तस्तात्पर्य्यमाह· वाक्यार्थेति·
योग्यतेति· इदमुपलक्षणम्· संसर्गात्मकयोग्यतापक्षेऽपि संसर्गस्यातीतादावजनकत्वादित्यपि द्रष्टव्यं· बाधाभावेति·

अनुमितिविषयपक्षतावच्छेदकसंबंधावच्छिन्नसाध्यस्य ज्ञानमित्यर्थः इदमप्युपलक्षणं विशेष्याप्रमत्वमप्यसंशय
विपर्ययोत्तरप्रमाणोयथार्थबाधितत्वज्ञानं यासत्वतिव्याप्यज्ञानं वाऽग्रेवक्ष्यमाणं गुणः उपमितिप्रमायां च
प्र उपमितिविषयवृत्तिनिमित्तवाच्यत्वस्य ज्ञानं ग्राह्यत्वत्पतिदशावाक्यार्थज्ञानं वा गुण इति ध्येयं साध्याभावनिश्चयः
साध्याभावो वा बाधः आद्येस्वरूपसन्नेवेति अंत्ये साध्याभावाभावस्येति साध्याभावं बाधमादाय समाधत्ते मे
वामिति पक्षतावच्छेदकेति एतदर्थः प्रागेवानुमितिविषयेत्यादिनोक्तः यथाश्रुतेऽशंकने एवमिति पक्षतावच्छे
दकसाध्याविरोधित्वशालयस्य ज्ञानकाले तद्विघटकस्य विरोधज्ञानस्य व्याप्तिज्ञानविघटकव्यभिचारज्ञानस्येवप
रंपराप्रतिबंधकत्वेपि पक्षतावच्छेदकसाध्यसामानाधिकरण्यरूपव्याप्यविरहावगाहितया बाधान्तर्भावात्
नहेत्वाभासाधिक्यं तथापि स्फुटत्वादिदमुपेक्ष्य गुणांतरस्यैवसुलभत्वात् हेत्वाभासाधिक्यं चाकापि नेत्याश
येनाह अत्र क्रमइति वयंतु क्रमइति पाठः प्रामाणिकेन वक्तरणायमित्यत्र हेतुमाह वस्तुतइति व्यापकत्व

वि॰ प्र॰ म॰

10

ति व्याप्यज्ञानादिकमप्यत्र गुणः संभवतीति दिगर्थः। स्वत उत्पद्यत इति मूलं। ज्ञानसामान्यकारणमात्रप्रयोज्य
मित्यर्थः। एवमग्रेऽन्यपदमपि प्रयोज्यपरं। योग्यतावच्छेदकेन रूपेण तेन निरूप्यत्वे तदधीनमिति यावत्। रूपतये
त्यनंतरमावश्यकतया तस्यैवाप्रामाण्यरूपतायामिति शेषः। तेनोपधानपदेनासंगतिरिति ध्येयं। असंसर्गेति ज्ञा
ने एकत्वासंसर्गाग्रहसहितधर्मधर्म्यसंसर्गाग्रहस्यैव योग्यतावच्छेदकत्वादिति भावः। दोषहेतुकोऽसंसर्गाग्र
हः धर्मधर्म्यसंसर्गाग्रहः तस्माद्धर्मधर्म्यसंसर्गाग्रहरूपं योग्यतावच्छेदकं एकत्वासंसर्गाग्रहसहितं भवति। धर्म्मि
धर्म्यसंसर्गाग्रहात्। एकत्वासंसर्गाग्रह इति यावत्। यद्वा। यथा धर्म्मधर्म्यसंसर्गाग्रहो दोषात्तथा एकत्वासंसर्ग
ग्रहोऽपि दोषादेवेति। प्रथमो ज्ञानोत्पत्तिद्वारेण। द्वितीयोऽग्रिमद्वारेण इति विशेषः। तत्राद्यपक्षे विनिगमनाविरहो
स्वरसबीजं। एतच्च पदद्वयपरतया व्याख्यानं मध्येचाकारदर्शनात्। वस्तुतो मूले व्यवहारप्रवर्त्तकत्वं व्यवहारो
पधानं तच्च दोषहेतुकज्ञानादित्याद्यः पक्षः। यथार्थज्ञाने दोषस्य न जनकत्वमित्यरुच्या द्वितीयमाह। दोषेति। दो

षेति॰ दोषहेतुकासंसर्गाग्रह इत्यादित्यर्थः॰ तृतीयमाह उत्पन्न इति दोषसहकृतज्ञानादित्यर्थः॰ तत्किं दोषज्ञा
नयोरेव व्यवहारोपधानेतं चत्वं नत्वसंसर्गाग्रहस्येत्याशंक्य व्यवहारोपधानं विशिनष्टि॰ धर्म्मेत्यादिरूप्यतेका
र्य्यतयेति रूपं सहितं कारणतयेत्यर्थः॰ मध्येचवाकारः प्रामादिकः॰ उपाध्यायास्तु विपरीतव्यवहारजनकज्ञानो
त्पत्तिकालीनेन धर्म्मधर्म्मिणोरसंसर्गाग्रहे दोषस्योपस्योपयोगोऽग्रे ज्ञानयोरेकृत्वा संसर्गाग्रहे धर्मधर्म्यसंसर्गा
ग्रहो मूलमित्याद्यः कल्पः॰ तादृशज्ञानसामग्रीकालीनेन धर्मधर्म्मिणोरसंसर्गाग्रहे दोषो मूलमग्रे च धर्मधर्म्य
संसर्गाग्रह एवेति द्वितीयः॰ तादृशज्ञानोत्पत्त्यनंतरमेकृत्वा संसर्गाग्रहे दोष एव मूलमिति तृतीयः धर्मधर्म्यसं
सर्गाग्रहेण कारणेन रूप्यत एकत्वा संसर्गाग्रहेण कारणेन सहितमित्यर्थमाहुः॰ अप्रामाण्यं धर्म्मादोषादिति॰
पूर्वोक्तेन तु तदादिमत एव धर्म्मिण एव परतस्त्वमुचितमित्याशंक्य सिंहावलोकितन्यायेनाह॰ मूले ज्ञानस्वरूपचेति॰
तथा च धर्मएव दोषा न तु धर्मीत्यर्थः॰ दोषाज्ञावग्रहणं च दृष्टान्तार्थं॰ व्यभिचारादिति मूलं॰ अन्वयव्यतिरेकानु॰

चिं॰प्र॰म॰

102

विधानस्यान्यथासिद्धेपि सतः कारणतायां व्यभिचारादित्यर्थः मूले जन्यत्वे च प्रयोज्यत्वमेव॰ अप्रमारूपज्ञाने दोष
स्य हेतुत्वमुक्त्वा सर्वधीयथार्थत्वपक्षे दोषतदभावयोर्न ज्ञानस्वरूपे हेतुत्वमिति पूर्वोक्तं स्मारयति मूले ऽयथार्थत्वे
तियत्र [illegible] ज्ञाने ऽयथार्थत्वं तत्र दोषपूर्वकत्वमिति व्याप्तिमात्रं न तु दोषतदभावयोर्ज्ञानस्वरूपे हेतुतेत्यर्थः॰ यद्वा॰ यथा
र्थत्वायथार्थत्वशब्दाभ्यां धर्मिण एवोक्तौ तत्र तु नांतरीयकौ इत्यस्य नियमतः पूर्ववर्त्तिनावित्यर्थः॰ ज्ञप्तिमधिकृत्याह॰ य
थार्थत्वं चेति मूलं॰ ज्ञानप्रकाराश्रयत्वे सति विशेष्यत्वमर्थगतं॰ विशेष्यगतप्रकारकत्वं ज्ञानगतं वा प्रामाण्यमित्यर्थः॰ इदं
रजतमिति मूलं॰ पुरोवर्त्तिनो रजतत्ववत्त्वं गृह्यत इति सर्वजनीनमेव तादृशस्य विशेष्यत्वं तादृशविशेष्यकत्वं च ज्ञानस्य
स्वप्रकाशतया ग्राह्यं प्रकारवत्त्वग्रहणं च सर्वजनीनमेवेति भावः॰ नार्थतथात्वनिश्चयस्वरूपमिति मूलं नोक्तरूपमि
त्यर्थः॰ अस्मन्मते विपरीतसमूहालंबने ऽतिप्रसक्ततया ऽवच्छेदकघटितस्य प्रामाण्यस्य वाच्यत्वादिति भावः॰ गुरुमते पा
घमाह॰ धियामिति॰ अगृहीतासंसर्गादेरिति मूलं॰ यद्यपि परस्परनिरूपितधर्म्मत्वधर्म्मित्वविषयकत्वरूपतयेत

तद्याख्यातं तज्जयग्रहीतुं शक्यमेव । तथापि लोहितः स्फटिक इत्याद्यनुरोधेन संबंधविशेषघटितमेव तद्रूपमिति
दुर्ग्रहमेवेति भावः ॥ छ ॥ ॥ छ ॥ उत्पत्तिवादः समाप्तः ॥ छ ॥ ॥ छ ॥ हेत्वभावात् पक्षधर्मताज्ञानात्मककारण
भावात् हेत्वभावादिति पाठे लिंगस्य पक्षधर्मत्वेनाज्ञानादित्यर्थः । तादृशीति समानविषय इत्यर्थः साक्षात्त्वादिनेति
यद्यपि सर्वानुभवानां धर्म्यंशेप्रमात्वात् साक्षात्त्वादिव्यापिकैव अप्रमात्वजातिरिति न जातिसंकरः तथापि यथार्थ
ज्ञानमात्रे वा यथार्थानुभवमात्रे वा प्रमात्वं जातिः आद्ये प्रमुष्टतत्ताकयथार्थस्मरणे प्रमात्वं विहाय स्मृतित्वमस्ती
ति स्मृतित्वेन सह जातिसंकरः साक्षात्त्वादिनेति चात तद्गुणसंविज्ञानो बहुव्रीहिः अंत्ये प्रमात्वात्वं ताभावसामानाधि
करण्यमयथार्थसाक्षात्काराद्वारोप्यांशेसाक्षात्त्वादेरस्त्येवेति साक्षात्त्वादिना सह तस्य संकर एव अत्र शंक्यते सम
स्तं ज्ञानं व्याप्यैव प्रमात्वं जातिरस्ति अप्रमात्वमपि तद्व्याप्या जातिस्तथैव धर्म्यंशे प्रमेति व्यवहारस्य च धर्म्यंशे प्रमात्वप्र
युक्तं कार्यमित्यर्थः । अवच्छेदकाव्याप्यवृत्तित्वं तथापि किं हीयते एतादृशजातिसंकरस्यानुभववचनादंगीकारात्

वि·प्र·म·

103

प्रथमकल्पेपिजातिसंकरस्यदोषत्वंपरिभाषामात्रं·नचद्वितीयेऽनुगतवत्वेनतुल्यव्यक्तिकत्वाज्ज्ञेयंजातिरितिवाच्यं·
तुल्यव्यक्तिकत्वस्यान्यत्रजातिबाधकत्वेपिप्रकृतेतद्व्यवहारभेदात्तदभावात्·अतएवमहत्त्वदीर्घत्वह्रस्वत्वाणुत्वेजा
तीव्यवहारवैचित्र्यनिर्वाहायलीलावतीकारैःस्वीक्रियते·नचकार्यतावच्छेदकतयाकारणतावच्छेदकतयावाजा
तिःसिध्यतितदभावान्नेयंजातिरितिवाच्यं·संवादिव्यवहारजनकतावच्छेदकतयाप्रमापदप्रवृत्तिनिमित्तत्वेनवात
त्सिद्धिसंभवादिति·अत्रोच्यते·नतावद्व्याप्यवृत्तिप्रमात्वमारोप्यांशेनप्रमेतिव्यवहारानुपपत्तेः·नचप्रमात्वप्रयुक्त
कार्य्यंनारोप्यांशइतिनतत्रप्रमेतिव्यवहारइतिवाच्यं·नहिघटपटावितिसमूहालंबनज्ञानेघटांशमात्रप्रवृत्तिज
नकपटविषयेनज्ञानमितिव्यवहारोदृष्टः·नाप्यव्याप्यवृत्तित्वं·स्वात्यंताभावविरोधस्यजातावेवधारितस्यसतिसंभ
वत्यागानुपपत्तेः·नापीदृशोजातिसंकरोनदोषइतिपरस्परात्यंताभावसमानाधिकरणजातिद्वयसमानाधिकरण
स्यैवजातिसंकरपदार्थत्वात्·नापिव्यवहारवैचित्र्यात्तुल्यव्यक्तिकजातिद्वयं·विषयविशेषांकितव्यवहारस्यप्रमात्वज

त्य निर्वाह्यत्वात्· उपाधिसंकरवज्जातिसंकरोपीयतां यथाहि क्वचिदुपाध्योः सांकर्येपि क्वचित्सांकर्यदर्शनबला
त्क्वचिज्जीयते तथा जात्योरप्यस्त्विति परिशिष्यते· तच्चोच्यते· अस्ति हि आकाशपरिमाणादेः स्वन्यूनाधिकरणकस्व
व्याप्यादन्यतत्स्वाधिकरणकसमवेतं यावन्नित्यं तत्त्वव्याप्यता तत्र च समवेतनित्यत्वमेवावच्छेदकं लाघवाद्गृहीत
मिति तद्वद्गगनत्वजातिसंकरो नांगीकार्यः यथा हि लाघवाद्वह्नित्वेन धूमत्वावच्छिन्नं प्रतिजनकताग्रहोतेति वह्निं विना
धूमोत्पत्तिर्न्नशंक्यते· तथा जातिसंकरोपि नाशंक्यः· न हि कारणतावच्छेदककल्पनायाः सकाशात् व्याप्यव्यापकता
वावच्छेदककल्पनन्यूनतायां किंचिन्नियामकमस्ति· न त्वस्ति· अनुगतमवच्छेदकं विनाऽनुगतकार्यं प्रति व्यभिचारेण
कारणत्वानिर्वाहात्· तत्र घटत्वं प्रति तत्तद्घटत्वेः कारणत्वे च प्रवृत्त्यनुपपत्तेः कारणतावच्छेदकस्यावश्यकत्वं· व्याप्यता
वच्छेदके तु नैवमिति चेत्· मैवं· यत्र कारणे ज्ञानादेः प्रवृत्तिस्तत्रानुगतावच्छेदके तावच्छेदके चानुगते मानाभावात्· कार्य्य
प्रति व्यक्ति कार्यत्वादि दुर्ग्रहं सति संभवेत्वागायोगश्चेति व्याप्यतायामपि तुल्यं संवादिव्यवहारजनकतावच्छेदकतया

वि॰प्र॰म॰

104

उन्नप्रमात्वज्ञातिसिद्धिः सर्वासु प्रमास्वनुगतसंवादिव्यवहारानिर्वचनात्॰ प्रवृत्तिनिमित्तमपि न प्रमात्वं ज्ञातिः
ज्ञानत्ववद्विषयविशेषावच्छिन्नप्रमापदप्रयोगानुपपत्तेरिति संक्षेपः॰ कार्यकारणभावेनुपलक्षणं समवेतनित्यत्वा
वच्छेदेन स्वान्यूनाधिकरणकस्वव्याप्यान्यस्वसमानाधिकरणयावन्नित्यव्याप्यव्यापकतानंगीत्मकबीजस्येत्यनुशयं॰ वि
षयस्यन्येति॰ अस्त तोरजतस्य सतानादित्यत्रिमानः॰ वस्तुतस्तु॰ शुक्ताविदं रजतमिति भ्रमे धर्म्मिरूपो विषयः प्रमानुवृत्त्या
ववच्छेदको वाच्यः तस्य चावच्छेदकत्वं न संभवति यत्र हि स एव धर्म्मी क्वचिदन्यत्रारोप्यते॰ तद्भ्रमे तद्विषयतावच्छेद
नाप्रमात्वस्य वृत्तेरिति मूलार्थः तेन तद्विषयत्वस्येति तत्पदं संगच्छते॰ यथार्थग्रहीतेति मूलं प्रथमद्वितीयविशेषणा
भ्यां भ्रमस्मृत्योर्व्यवच्छेदः॰ अन्यथेति मूलं॰ यदि स्थूलकालोपाधिग्राहित्वं तदा सामग्रीसाम्यात् ज्ञानानां योगपद्या
पत्तिरित्यर्थः॰ तथापीत्यादिकमापाततः आगामिनो ज्ञानोत्पत्तिक्षणस्य पूर्वकाले ज्ञानसंभवात्॰ परमार्थतस्तु यत्र न
तादृगुपनयः तत्रैवाव्याप्तिरिति॰ ज्ञानसामान्यसामग्रीमहिम्ना अज्ञातोपि स्थूलकालोपाधिर्भासते॰ तेन ज्ञाने कालभान

नैयत्यमिति ये मन्यंते तन्नीत्या सर्वत्र क्षणभानं तथा चाव्यमिति चेत् । नैतैरपि कालांतराभाने सति वर्त्तमानकालभानानि
यमस्य चाव्यवस्थितत्वात्तथा चातीतानागतोद्भवविधाराबाह्यिकज्ञानं तत्र च वर्त्तमानक्षणभानाप्रसंगेनाव्याप्तेर्वक्रत्वेपत्त्वादिति । क्षणाग्रा
हित्वेपि ज्ञानायोगपद्यमुपपादयति मूले । स्वरूपेति । ननु पूर्वक्षणस्यानधिकरणतयाऽधिकरणक्षणस्य च पूर्ववर्त्तित्वाभावा
त्कारणत्वं कारणकारणक्रमं च विना न कार्यक्रम इति चेत् । न । पूर्वक्षणोत्पत्तिक्षणघटितकालोपाधेः कारणत्वमादाय
कार्यक्रमसंभवादिति । तज्ज्ञाह्यता तस्य संग्राह्यता । यथार्थत्वाभावादिति भावः । ज्ञाततायाइति । तज्ज्ञानज्ञेयसंबंधतज्ज्ञान
जन्यत्वस्य निराकरिष्यमाणत्वादित्यर्थः । अतो न सिद्धसिद्धिव्याघातः । अतीतानागतस्थले तदसंभवमभिसंधाय वाच्या
हेनाख्वरसः सूचितः । साकारज्ञानवादिमते ज्ञाने घटत्वादिकमस्त्येवेत्यत आह । साकारेति । भ्रमेतीति । तथा च भ्रमात्वनि
रूपणे सति गुणत्वनिरूपणं गुणत्वनिरूपणे च सति भ्रमात्वनिरूपणमित्यन्योन्याश्रय इति भावः । विपरीतेति । तथा चाव्या
प्यन्योन्याश्रय इति भावः । फलोपधानं जनकत्वं यदि तदा मूलमुपेदेति । यदि स्वरूपयोग्यत्वं तदा मूलं तद्योग्यताया इति ।

चि· प्र· म·

105

तद्व्याचष्टे· कारणतेति· अवस्त्विति मूलं नवीनन्यायमतमाश्रित्य· ननु वंध्यापुत्रादिशब्दजन्यं ज्ञानं असत्ख्यातिरूपं ख्या
वत्त्वं प्रसिद्धमत आह· न तावदिति· परिदृश्यमाने प्रत्यक्षादौ· कारणाभावादिति भावः· वस्त्वनुभवत्वेति· न च वस्तुमात्रा
नुभवत्वं विवक्षणीयं· नवीनमते भ्रमे तस्यापि सत्त्वात्· अत एवोक्तं तथाभावेनेति· वस्तुतस्तु मूले सदुपरागेणासदपि
भासत इति मतमाश्रित्य भानं चेत्युक्तं· मात्रपदाश्रवणाद्भ्रमसाधारण्याभिधानं· इदंत्वमादाय भ्रमसाधारण्ये सत्येव मू
ले दोषांतरमाह· संयोगादीति· व्याप्यवृत्तिभिन्नेति· स्वात्यंताभावाधिकरणवृत्तिभिन्नेत्यर्थः· अधिकरणैकदेशानवच्छिन्नवृ
त्तिकत्वस्य व्याप्यवृत्तित्वस्य सत्त्वादिति ध्येयम्· यद्यपि प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वरूपव्याप्यवृत्तित्वेना
त्र दोषस्तथापि निर्विकल्पकाव्याप्तिर्द्रष्टव्या· एकदेशिमतमाश्रित्य मूलमव्याप्यवृत्तीति· ननु विशेष्यनिष्ठेत्यादिलक्षणदो
षेणैवेदमपि दूषितमित्याशंक्याह· नत्विति· तथा च व्याप्यवृत्तित्वविशेषणमादाय यो दोषः स निर्विकल्पकाव्याप्तिरूपस्तद्दो
षोऽत्र न भवति· विशेषणांतरदानाद्विशिष्टाभावस्य निर्विकल्पकेपि सत्त्वाच्चेति भावः· लक्षणांतरकरणाय मूलमिमारचयति·

मूले अपेति· कश्चिदिति मूलं· क्लृप्तपदार्थातिरिक्तः संबंधरूप इत्यर्थः· प्रमाणांतरमाह मूले अथेति· तथा च विषय
तैव तृतीयार्थ इति भावः· ननु प्रकारत्वं तृतीयार्थो न्यथा विशेष्यपदे पि तृतीयापत्तेरित्यत आह· मूले प्रकारत्वमपीति·
ननु प्रकारत्वं स्वरूपसंबंध एवास्त्वित्यत आह मूले न तु विषयत्वमतिप्रसंगादिति· न तु स्वरूपसंबंधमात्रं विशे
ष्यादावपि तत्सत्त्वादित्यर्थः· यदर्थं तन्निरूपणात्तदाह मूले एवं चेति· मूले स्वं विषयत्वं· अग्निमूलदृणधर्म
पदं प्रकारपरं· तेन प्रकारघटितानां सर्वेषां निर्विकल्पकाव्याप्तिः संगच्छते· प्रकारीभूतधर्मस्य प्रकारत्व
संबंधेन आधेयावच्छेदकतासंबंधेनोत्ते विशेषणत्वाच्चरूपयोर्भेदः· वस्तुतो विशेष्यत्वं निर्विषयतेत्युक्तत्वा
न्निर्विकल्पके विषयताविरहादेवाव्याप्तिर्द्रष्टव्या· ननु पूर्वं प्रकारत्वं विषयस्य ज्ञाने विशेषणता विशेष इत्यु
क्तं इदानीं च विषयतायाः सप्रकारकत्वमुच्यत इति विरोध इति चेत् न· तत्प्रकारकज्ञानविषयतायास्तत्प्रकार
कत्वाभिधानात्· यद्वा विषयते व सप्रकारिकाज्ञाने तु स्वीयविषयताप्रकारकत्वं परंपरासंबंधि· पूर्वग्रंथेपि वि

सिं·प्र·म· शेषणतामात्रविशेषणएवविशेषणतानाघटितएवेत्यर्थः तु न च यमपि सप्रकारकमिति उ नयुक्तं गौरवात् निर्विकल्प
कासंग्राह्यतापत्तेः मूलं विषयतासमानाधिकरणेति उक्तलक्षणे नेति मूलं यद्यप्यंशे भेदविवक्षा संभवति
106 तथापि विषयताविरह एव तात्पर्यं अयथेति मूलं अत्र धर्मत्वमविवक्षितं तेन नाकाशाभावादितिभ्रमेनातिव्याप्तिः
ननु स्वव्यधिकरणत्वं विषयताधिकरणनिष्ठात्यंताभावप्रतियोगित्वं न च विषयतानधिकरणवृत्तित्वं भ्रमे
यमितिज्ञाने विषयतानधिकरणाप्रसिद्धेः तथा च घटपटावितिसमूहालंबने स्वव्यधिकरणं घटत्वादिक
मादाय व्याप्तिरित्याशंक्याह मूलं समूहेति भ्रमांशेति मूलं धर्मानवच्छिन्नत्वस्य धर्मप्रकारकत्वस्य वत्तत्वा
सत्वादिति भावः एतच्चोपलक्षणं आकाशे शशशृंगत्वाद्यव्याप्तिर्द्रष्टव्या स्वाधिकरणेति मूलं अनवच्छिन्नत्वा
प्रकारकत्वयोरसंभवात्पर्यंताभावरूपतया न पौनरुक्त्यं ततएवेति मूलं भ्रमांशे प्रमायामव्याप्तेरेवेत्यर्थः अ
न्यथेति मूलं अप्रमाविरोधेन प्रमात्वस्यैव प्रमात्वविरोधेनाप्रमात्वस्यापि निराकरणसंभवादिति भावः प्रमे

यमित्यादि दोषस्य प्रथमेऽलग्नकत्वादाह प्रथम इति द्वितीये स्वप्रकारानधिकरणवृत्तिविषयत्वप्र
तियोगित्वविशिष्टत्वं निर्विकल्पके संभवति प्रथमे तु विषयताप्रतियोगित्वं न संभवति विषयताया विशेष्य
वृत्तित्वादिति भावः किंचेतीति रजतत्वप्रकारिका रजतमात्रनिष्ठा रजतत्वमेतन्निष्ठं च विषयतेति निरूपिता
सः तत्र शंकते मूले अपरजतेति ननु निरूपकत्वघटितमेव प्रमात्वमप्रमात्वं च न तु तद्विशेषप्रकारत्व
मात्रघटितमित्यत आह मूले वैशिष्ट्यस्यैवेति ननु भासमानवैशिष्ट्यप्रतियोगित्वं प्रकारत्वं न च वैशिष्ट्य
निरूपितं वैशिष्ट्यांतरं भासत इत्यत आह प्रकारत्वेनेति मूले नापि स्वव्यधिकरणेति अयं स्वव्यधिकर
णत्वं च विषयताधिकरणनिष्ठात्यंताभावप्रतियोगित्वं स्वव्यधिकरणत्वं विवक्षितं प्रकृते तु विषयतानधिक
रणवृत्तित्वमत एवाह विषयताश्रयस्येति अतो धर्मद्वयस्य तत्रयथाश्रुतत्वाद्धानपौनरुक्त्यं प्रतियोगि
तावच्छेदकावच्छिन्नप्रतियोगिज्ञानं भ्रमरूपं संभवत्येवेत्यपौनरुक्त्यं व्यावच्छे ननु सामग्र्या इत्यादिनेति ननु दोषगुणा

स्वि·प्र·म·

17

तिरिक्तसकलोपलंभकगर्भयोग्यानुपलब्धिहेतुतयानायं दोषइत्यस्वरसादाह· विस्तरश्चेति· ननु स्वत्व
धिकरणत्वमिति· न च त्रांकितपोनरुक्त्यात्त्वायमस्वरसः साधुरितिवाच्यं· अन्योन्यात्यंताभावगर्भतयापि पौ
नरुक्त्यपरीहारादितिभावः· ननु तत्वेत्तिसंबंध्या अधिकरणत्वमर्थः तत्रानुभवं प्रतिप्रकारं प्रतिवान्याघः· घ
घटादेरनुभवानधिकरणत्वात्· नांत्यः· गगनेगगनत्वमित्यादिप्रकारकप्रमायामव्याप्त्यापत्तेः· रजत
त्वस्यापिरजते अवस्थितस्यरजतत्वमेप्रकारतया तत्रातिव्याप्त्यापत्तेश्च· अस्तीतिवर्त्तमानता वायुक्ता· अ
तीतादिविशेषणकप्रमायामव्याप्तेः· संबंधभेदानुक्त्या वलोहितः स्फटिक इतिसाक्षात्संबंधावगाहिनि
भ्रमेऽतिव्याप्तिः· परंपरासंबंधेन स्फटिकेपिलौहित्यस्य सत्वादित्यत आह· यत्र धर्मिणीति· तत्र धर्मिणी
ति· तद्धर्म्यनुयोगिकतयेत्यर्थः· तथा चाधिकरणत्ववर्त्तमानत्वयोरविवक्षया संबंधस्य भेदस्य च विवक्षया
यद्धर्म्यनुयोगिको यद्धर्मप्रतियोगिकश्च यः संबंधः तद्धर्म्यनुयोगिकतया तद्धर्मप्रतियोगिकतया वतत्संबंध

मवगाहमानोनुभवस्थितयत्रप्रमेत्यर्थः· नन्वेवंविशेषणविशेष्यसंबंधानवगाहिनि निर्विकल्पकेऽव्या
प्तिरत आह· निर्विकल्पकेति· निर्विकल्पकसंग्राह्यतेवेति· तथा च धर्मप्रत्ये वाधिकरणत्वं न च संबंधविशेष
स्य प्रवेश इति भावः· भेदानुपपत्तिं दूषयति· विशेषांतरस्येति· अनुयोगित्वाप्रवेशेन ज्ञाननिरूपितसं
बंधविशेषप्रवेशस्येत्यर्थः· धर्मप्रत्ये वाधिकरणत्वं दूषयति· तत्संयह इति· संबंधविशेषाप्रवेशं दूषयति· य
नेति· ननु तदनुयोगिकत्वादेः स्वरूपसत्वं वा विशेष्यत्वं वा प्रकारत्वं विवक्षितं· नाद्यः· समूहालंबनाद्विशि
ष्टधियोर्भेदानापत्तेः· न द्वितीयः· दंडपुरुषसंयोगानुयोगित्वप्रतियोगित्वानि समूहालंबनाद्दंडातिवि
शिष्टधियोर्भेदानापत्तेः· न तृतीयः· पुरुषानुयोगिकत्वदंडप्रतियोगिकत्वयोः प्रकारतायां तत्संबंधेपि वि
शेष्यानुयोगिकत्व विशेषणप्रतियोगिकत्वयोः प्रकारकत्वे एवमेवाग्रेधावनेऽनवस्थानात्· अननुभवाच्च·
अयापुरुषानुयोगिकत्वदंडप्रतियोगिकत्वयोः भासमानवैशिष्ट्यप्रतियोगित्वेन प्रकारत्वं किंतु ज्ञाननिरूपि

वि·प्र·म· तः कश्चन स्वरूपसंबंधोऽभावत्वादेरिव घटत्वाज्ञातयोरेव· अतो नानवस्था· यद्वा संसर्गमर्यादया पुरुषानु
योगिकत्वं दंडप्रतियोगिकत्वेनाभासेते· सा च ज्ञाननिरूपितसंबंधविशेषरूपा· तथा च विशेष्यत्वं विशेषण
108 त्वं संसर्गमर्यादेति तच्चितयमपि ज्ञाननिरूपितविषयताविशेषात्मकमेवाभ्युपेयमिति चेत्· मैवम्· एवं सत्य
नुयोगित्वादेर्मानाभावात्· त्वदुक्तरीत्या दंडस्य प्रकारतां संयोगस्य संसर्गमर्यादतां दंडादेर्विशेष्यत्वं पुरु
षमात्रविशेष्यतां वा आदाय विशिष्टबुद्धेः समूहालंबनाद्भेदोपपादनात्· अनुयोगित्वादिसत्वेपि पुरुषा
नुयोगिकत्वं दंडप्रतियोगिकत्वप्रकारकत्वापेक्षया दंडप्रकारकत्वस्य लघुनः प्रमालक्षणप्रवेशस्यो
चितत्वाद्दिति स्वरसेनाग्रिमलक्षणमवतारयति· नन्विति· तद्विषयत्वात्· तस्य निरूपकत्वस्याविषयत्वा
त्· न चेति· तथा च दंडे संबंधप्रतियोगित्वं पुरुषे संबंधानुयोगित्वं भासत इत्यर्थः· नामेत्यनंतरं तथा च प्रका
रत्वाद्यात्मकज्ञाननिरूपितस्वरूपसंबंधविशेषात्मकमेव तदुच्यतामिति शेषः· न त्वेवं तथा किमायातमत

आहुः। इदमेवेति। ज्ञाननिरूपितस्वरूपसंबंधविशेषात्मकमेवमयांगीक्रियते लघुत्वादित्यर्थः। अत्रापी
ति। नन्वेवं पुनरपि संबंधेन तत्र स्वरूपसत्त्वादिविकल्पस्तदवस्थ इति चेत्। न। संबंधत्वेनावच्छिन्नप्र
कारत्वस्य संबंधभेदेन भेदात्। अनन्यगत्या प्रकारत्वस्यैव तद्रूपस्यापि कल्पनात्। नन्वेवमपि घटपटयो
र्विपरीतसमूहालंबने तिव्याप्तिः। मैवम्। घटत्वावच्छिन्नविशेष्यकत्वावच्छेदेन घटत्वावच्छेदेन वा घटत्वप्रकार
कत्वस्य विवक्षितत्वात्। न चातिप्रसक्तत्वरूपमवच्छेदकत्वं समूहालंबननिष्ठस्य घटत्वावच्छिन्नविशेष्यक
त्वस्य घटस्य वास्त्येवेति वाच्यं। स्वरूपसंबंधविशेषस्यावच्छेदकपदार्थत्वात्। तस्य च तत्राभावात्। एतादृशा
वच्छेदकत्वाग्रहादेव प्रामाण्यं न स्वतो ग्राह्यमित्युक्तं। केचित्तु भ्रमसमानविशेष्यप्रतियोगित्वं प्रकारत्वमाद्य
यथार्थज्ञानसाधारणं प्रमायाः एकं लक्षणं कान्ततज्ज्ञानविषयत्वं प्रकारत्वमादाय तथा च द्वितीयं ल
क्षणमभिप्रेतमित्याहुः। सर्वमिति। यः संबंधो यदनुयोगिको न भवति यत्प्रतियोगिको वा न भवति तदनुयोगि

प्र॰म॰ 109 कत्वया तत्प्रतियोगिकत्वया वा तस्य ज्ञानं भ्रमः। न वा ननुगमः। अन्यतरत्वेनानुगमात्। यद्वा तत्संबंधाव
च्छिन्नतदभाववद्विशेष्यकं तत्संबंधावच्छिन्नतत्प्रकारकं ज्ञानं भ्रम इत्यादिव्याख्यानं पूर्ववदित्यर्थः। अवधे
यमिति। यद्यपीदं रजतमिति भ्रमे रजतत्वाभाववद्विशेष्यकरजतत्वप्रकारकत्वं भ्रमत्वं इदंत्ववद्विशेष्यके
दंत्वप्रकारकत्वं च प्रमात्वं सकलज्ञानवृत्ति। तथा च कथं भ्रमत्वप्रमात्वयोरत्यंताभावोऽव्याप्यवृत्तिः। न च प्रम
त्वघटकप्रकारावच्छिन्नभ्रमत्वाभावो विवक्षितः। तथा सत्यव्याप्यवृत्तित्वस्य अन्योन्याभावत्यागस्य चानुपप
त्तेः। प्रमाभ्रमरूपैकप्रकारके वह्नौ इति समूहालंबनेऽव्याप्तेश्च। तथापि यच्च यस्य प्रतियोगिवैयधिकरण्याव
च्छेदकावच्छिन्नोऽभावस्तदन्यविशेष्यकत्वे सति तत्प्रकारकोऽनुभवः प्रमेत्यत्र तात्पर्यं। इदं च घटत्वादिप्रकारक
प्रमाभिप्रायेण। प्रमेयत्वादिप्रकारकप्रमायामभावादाहुः। वस्तुतो यस्य प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्ना
ऽभावस्तद्विशेष्यकस्तदन्यप्रकारकोऽनुभवः प्रमेत्यर्थः। तेन न केवलान्वयिप्रमायामव्याप्तिरिति। न द्विष्यति।

नासमानवैशिष्ट्यप्रतियोगित्वात्मकेप्रकारत्वेप्रतियोगित्वेनासमानत्वान्वयात्पूर्वोक्तदोष इत्यर्थः॥ भ्रमातिव्या
प्तेरिति॥ इदं रजतमिति शुक्तिगोचरभ्रमे शुक्तित्ववति शुक्तित्वप्रकारकत्वरूपप्रमात्वापत्तेरित्यर्थः॥ इदमुपल
क्षणं॥ अनुमित्यादेः पक्षादिज्ञानजन्यतया तत्प्रकारकत्वापत्तेरित्यपि द्रष्टव्यं॥ अव्याप्त्यापत्तेरिति॥ सविकल्प
क इति शेषः॥ यद्विशेषणेति॥ यद्विशेषणज्ञानजन्यतायां यद्विशिष्टज्ञानत्वमवच्छेदकं तज्ज्ञानं तत्प्रकारकमिति
समुदायार्थः॥ इदं च प्रकारत्वं समाधिसौकर्यादुक्तं॥ वस्तुतो ज्ञाननिरूपितस्वरूपसंबंधविशेष एव प्रकारत्वं
प्रमालक्षणप्रविष्टमित्युक्तं॥ तदेव चानुव्यवसाये प्रकारीभूतमिति ध्येयम्॥ यत्र यदिति मूलं॥ अन्योन्याभा
वस्याव्याप्यवृत्तित्वानुपगमपक्षे॥ तदनभ्युपगमपक्षमपि प्रेत्यास्वरसमाह॥ नन्विति॥ ननु संयोगादेरवच्छेद
कत्वं स्वरूपसंबंधाज्ञानविषयतापन्नं वा॥ आद्ये भ्रमेतिव्याप्तिः॥ अंत्ये संयोगवानित्यादावव्याप्तिस्तदवस्थेत्यरुचे
राह॥ वस्तुतस्त्विति॥ न चैवं मूलवृक्षत्वादेस्तद्विरुद्धत्वाभावात्तदवच्छेदेन संयोगग्रह इति व्याप्तिः॥ तदत्यंताभावाव

प्र॰म॰ छेदकावच्छेद्यस्य तदनवच्छेदकस्य वा तद्विरुद्धपदेन विवक्षितत्वात्· ननु भ्रमस्यापि यदवच्छेदेन यन्ना
स्ति तदवच्छेदेन तत्ज्ञानमिति लक्षणं वाच्यं· अन्यथा संयोगप्रमायामतिव्याप्तेः· तथा च शुक्तिविशेष्यकप्र
110 मुष्टतत्ताकरजतस्मृतावव्याप्तिः· न च वस्तुगत्या तदवच्छिन्ने तत्ज्ञानं विवक्षितं· तथा च प्रमुष्टतत्ताकरजतस्मृ
तावपि वस्तुगत्या शुक्तित्वावच्छिन्ने रजतत्वज्ञानमस्त्येवेति वाच्यं· वृक्षः संयोगीति प्रमायामतिव्याप्तेः· तत्रापि वस्तु
गत्या संयोगाभाववावच्छेदकमूलावच्छिन्ने वृक्षे संयोगज्ञानात्· न च यत्रापि यदवच्छेदेन यन्नास्ति तद्विरुद्धध
र्मानवच्छेदेन तत्ज्ञानं भ्रम इति विवक्षितं· तथा च विशिष्टाभावसत्त्वान्नोक्तस्मृतावव्याप्तिरिति वाच्यं· वृक्षः क
पिसंयोगीति प्रमायामतिव्याप्तेः· न च स्मृतिरसंग्राह्यैवेति वाच्यं· तत्राप्रमाव्यवहारानापत्तेः· उच्यते· अप्रमा
लक्षणेऽवच्छेदकप्रवेशो न कर्त्तव्यः· वृक्षः कपिसंयोगीति प्रमायामतिव्याप्तिश्च अन्योन्याभावस्याव्याप्यवृत्ति
तया संयोगाभाववदन्यस्यैव वृक्षस्य विशेष्यत्वान्निरसनीयेति यथाश्रुतमेव मूलं· अव्याप्यवृत्तित्वादेव च अन्यो

न्याभावस्य भ्रमान्यत्वरूपे भ्रमालक्षणे भ्रमांशाप्रमानुपसंग्रहेणेति· यद्यप्रकारीभूतधर्मस्यानवच्छेदकं य
द्वृक्षत्वं मूलं चा तदवच्छिन्नत्वेनानुल्लिख्यमानस्य तद्वत्तोयाविशेष्यता तन्निष्ठायातदभाववतोविशेष्यतास
तद्विरुद्धधर्मानवच्छेदेनेतिविशेषणेन विवक्षिता· अतो वृक्षः कपिसंयोगीत्यत्र नातिव्याप्तिः· सामानाधिक
रण्यमात्रेण वृक्षत्वग्रहात्· नापि वृक्षत्वमूलावच्छेदेन कपिसंयोगं गृह्णाति कपिसंयोगभ्रमेऽव्याप्तिः· नाप्यन्यो
न्याभावस्याव्याप्यवृत्तित्वं नाप्युक्तस्मृतावव्याप्तिरिति· वस्तुतस्तु· अवच्छेदकप्रवेशो मणिकृता कृतो व्याख्यातृ
त्रिश्चानुमतोपि मह्यं न रोचते· न तावत्तत्प्रवेशः भ्रमालक्षणे· तथाहि· मूलावच्छिन्नः कपिसंयोगवान् वृक्ष
त्यावच्छिन्नः कपिसंयोगवानित्येवंविधभ्रमवारणाय अवच्छेदकप्रवेशः स चायुक्तः· वृक्षविशेष्यक संयोग
क प्रकारांशे तयोरनुभवयोः प्रमात्व इष्टापत्तेः· संयोगविशेष्यकवृक्षत्वमूलावच्छिन्नत्वप्रकारांशेवतयोर्भ्रमयो
स्तद्विशेष्यकत्वमेव नास्ति· नहि शाखावच्छिन्नस्य कपिसंयोगस्य विशेष्यस्य वृक्षत्वमूलावच्छिन्नत्वे· तस्मान्न

प्र॰म॰

प्रमालक्षणेऽवच्छेदकप्रवेशो नाप्यप्रमालक्षणेऽवच्छेदकप्रवेशः तथाहि॰ वृक्षः कपिसंयोगीति वृक्षत्व
मानाधिकरणकपिसंयोगावगाहिनिश्चयत्वावच्छिन्नो वृक्षः कपिसंयोगीतिनिश्चयत्वावच्छिन्नकपिसंयोगाव
गाहिनिश्चयप्रमारूपे ज्ञानेऽतिव्याप्तिवारणायावच्छेदकप्रवेशः सचायुक्तः॰ प्रतियोगिव्यधिकरणतदभाववतीति
तद्वदन्योन्याभाववतीति वा विवक्षयाऽतिव्याप्तिवारणात्॰ वृक्षत्वावच्छिन्नमूलावच्छिन्नकपिसंयोगयोः प्र
तियोगिव्यधिकरणविशेषणाभाववत्त्वात्तदुभयान्योन्याभाववत्त्वाद्वा ज्ञानेऽतिव्याप्तिर्नाशंकनीयेति संक्षेपः॰
अस्त्वात्यादेरिति॰ आदिपदेन तद्वतीति मतुपः संग्रहः॰ तथा चेति मूलं॰ लक्ष्यानुगमे हि लक्षणाननुगमो दोषान
तु तदननुगम इति भावः॰ विशेषेति मूलं॰ तथा च न प्रवृत्त्यर्थमनुभववत्त्वं लक्षणं स्मृतावसत्त्वात्॰ किंत्वितरभेदव्य
वहारयोः साधनायेति भावः॰ अर्थान्तरं विवृणोति॰ एवं तदिति॰ अतिव्याप्तिवारं विवृणोति॰ भ्रमांशोपीति॰ मूले विषयता
श्रयेति॰ अत्र निर्विकल्पकं संग्राह्यमेव गगने शब्द इति प्रमायां च नाव्याप्तिः॰ येन संबंधेन यस्य विषयताश्रयत्वं नि

|||

त्वं तेन संबंधेन तत्प्रकारकत्वाभावस्य विवक्षितत्वात् । तस्य च गगने शब्द इत्यत्रसत्त्वादिति भावः । यत्प्रकारिकेति
मूलं । निर्विकल्पकस्यासंग्राह्यत्वं विषयताया अपि सप्रकारकत्वमभ्युपेत्येदमुक्तं । यत्पदश्रवणात्प्रकारभेदघटि
तमिदं । स्वप्रकारेतिमूलं । स्वं विषयता । यत्पदश्रवणात्सकलप्रकारघटितमिदं । अत एव न पौनरुक्त्यं । प्रकारस
मानाधिकरणत्वं च प्रकारतानिर्वाहकसंबंधघटितं विवक्षितमतो गगने शब्द इत्यादौ नाव्याप्तिः । नापि संबंधां
तरमादायातिव्याप्तिरिति ध्येयं । यत्प्रकारिकेतिमूलं । विषयताप्रकारभेदघटितमिदं । स्वप्रकारेतिमूलं । यापिस्व
स्वं विषयता । प्रकारपदं सकलप्रकारपरं । अतो न पौनरुक्त्यं । द्वितीयतुरीययोः प्रकारत्वावच्छिन्नघटितयोः
विषयतैक्ये विरोधादाह । मूले प्रकारभेदेनेति । इदं च समाधिसौकर्यादुक्तं । वस्तुतस्तु द्वितीयचतुर्थयोरपि सा
नप्रकारभेदघटितत्वेन न पौनरुक्त्यं न वा विरोध इति ध्येयम् । प्रकारेति । प्रथमतृतीयलक्षणवद्विषयतैक्येप्यवि
रुद्धं लक्षणान्तरमाहेत्यर्थः । तदवच्छिन्नत्वानवच्छिन्नत्व इति । द्वितीये तुरीये च प्रमालक्षणे व्यधिकरणप्रकारास

प्र.म.

वच्छिन्नत्वं भ्रमलक्षणे व्यधिकरणप्रकारावच्छिन्नत्वमेकस्यां विषयतायां विरुद्धमित्यर्थः। विशेष्यत्वेति
विशेष्यनिष्ठात्यंताभावाप्रतियोगीत्यादिप्रथमलक्षणेऽप्रमालक्षणे च प्रविष्टे इति शेषः। प्रागिति। प्राक् प्रथ
मलक्षणं विषयतैक्यपक्षे विरुद्धं विशेष्यत्वादिरूपं येषां न दत्तमिति भावेनेत्यर्थः। अत्र तु प्रथमलक्षणे। विषयत्व
प्रतियोगित्व तदप्रतियोगित्वयोरिति मूलं। स्वव्यधिकरणप्रकारावच्छिन्नविषयत्वप्रतियोगित्वं यत्र भ्रमलक्षणं
तृतीयं च यत्र प्रमालक्षणं तयोरित्यर्थः। यद्यपि विषयताभेदपक्षे विरोधोऽस्त्येव तथापि प्रकारतत्त्वावच्छेदेन वि
षयताप्रतियोगित्वतदभावयोरंगीकाराकारणीय इति भावः। सर्वत्र स्वसंबंधभेदप्रवेशाऽगमनेनाव्याप्त्यादोन
दोष इति पूर्वोक्तमनुसंधेयम्। ननु समूहालंबने घटपटोभययत्किंचिदेकविषयता। भावघटात्मकविशेष्यनि
ष्ठात्यंताभावप्रतियोगिपटत्वावच्छिन्नापीति भ्रमलक्षणं तत्राव्याप्तं। भ्रमलक्षणं चातिव्याप्तमित्यत आह। मूले स
मूहेति। विषयताभेदेन घटनिष्ठा विषयता न पटत्वावच्छिन्नेति नोक्तदोष इति भावः। एकदेशपरिमतां मतिरिक्तां

112

५

विषयतां दूषयति॰ मूले वस्तुतस्त्विति॰ तथा च तद्वृत्तितानिलरूपणानि न संभवंतीति भावः॰ ज्ञानेनैवेति॰ इच्छा
याः सविषयकत्वसिध्यर्थं तद्विषयकतया अवश्यमभ्युपेयेनेत्यर्थः॰ सर्वज्ञानविषयस्वरूपाविषयतेत्यभिमते
इदानीं ज्ञानस्वरूपैव सेत्याह॰ वस्तुतस्त्विति॰ यद्यपि ज्ञानेऽतीतविषयेऽविद्यमाने विशिष्टव्यवहारदर्शना
द्विषयतायां किं बाधकं॰ न चानेकविषयस्य ज्ञानस्यैकत्वाद्विनिगमना॰ अनेकज्ञानगोचरस्य विषयस्याप्येकत्वप
र्यनात्॰ तथापि ज्ञानव्यक्तीनाम -- त्वात् सर्वस्य विषयतया विषयव्यक्तीनां बहुत्वात्॰ अभावज्ञाने विषयस्याभा
वरूपत्वादतीन्द्रियज्ञाने च विषयस्यातीन्द्रियत्वादभावरूपमैन्द्रियकं ज्ञानमेव संबंधतया कल्प्यत इति भावः॰ स
त्वेति॰ विशिष्टबुध्यादेर्विशिष्टज्ञानाविषयत्वात्तज्ज्ञानयोग्यत्वं न संबंध इत्यर्थः॰ यत्त्विति मूलं॰ यद्यपि विषयता
प्रस्ताव दंडादिविशेषणतासाधनमुक्तं॰ तथापि तद्विशेषणं तद्विशेषणतावदिति दंडादिस्थलसिद्धे तद्दृष्टांते
न ज्ञानाधारस्य तज्ज्ञानस्य घटविशेषणताविषयतात्मिका साधनीया॰ दृष्टांत एव यत्र्यासिद्ध इति भावः॰ वैशिष्ट्यति॰

प्र॰म॰

113

न्नासमानं यद्वैशिष्ट्यप्रतियोगित्वं तज्ज्ञत इत्यर्थः॰ नचैवं वैशिष्ट्यप्रतियोगित्वस्यातिरिक्तस्य स्वीकारापत्तिः॰ त
स्य संबंधनिरूपितस्य विशेषणनिष्ठत्वात्॰ स्वरूपसंबंधविशेषत्वाच्च॰ विशेष्यविशेषणनिरूपितातिरिक्तवि
शेषणतानिराकरणस्यात्रमुख्यत्वात्॰ वस्तुतः प्रकारत्वं विशेष्यत्वं च ज्ञाननिरूपितः स्वरूपसंबंधविशेषा
न तु न्नासमानं विशेषणनिष्ठं वैशिष्ट्यप्रतियोगित्वं प्रकारत्वं न वा न्नासमानं विशेष्यनिष्ठं वैशिष्ट्यानुयोगित्वं
विशेष्यत्वमित्युक्तं भ्रमालक्षणे॰ तद्वतीति॰ भ्रमालक्षणे व्यावर्त्याप्रसिद्धिरिति मूलपाठ इदं सम्यगेव॰ विशेषणे
व्यावर्त्याप्रसिद्धिरिति पाठे तु विशेषणस्य विशेषणांशाद्वस्य तद्वतीत्यादीतिशेषः॰ आदिगतोध्याहार इति या
ज्यं॰ तेन तद्वतीत्यादिविशेषणस्य व्यावर्त्याप्रसिद्धिरिति फलितं भवति॰ सिद्ध्यसिद्धिव्याघातभयादाह॰ ज्ञान इति॰
ननु रजतत्वाणीत्यादिमूलमनुपपन्नं॰ रजतत्वप्रकारकं रजततदन्ये इत्यनुभवरूपं समूहालंबनमादाय सिद्ध
साधनात्॰ रजतत्वप्रकारकानुभवविषयत्वशालिन रजतत्वप्रकारांशेनुभवविशेष्यत्वस्य विवक्षायामपि निषे

धादिधीहेत्वाहार्यारोपमादायारजते प्रमांचादायरजते तस्य सतः केवलान्वयित्वेन किमितिपदं विशेष
णं उपरंजकतयातदुपादाने तु धर्मत्वादित्येव हेतुरस्तु टिप्पण्यपि न संगता केवलान्वयिनोऽत्यंताभावाप्रसि
द्धेः व्याप्यत्वेच स्वसमानाधिकरणात्यादिरूपे साध्यात्यंताभावासामानाधिकरण्याप्रवेशाद्वैयर्थ्यासंगतेरिति
उच्यते रजतत्वप्रकारांशेऽनाहार्यानुभवविशेष्यत्वस्य विवक्षितत्वान्न मूलासंगतिः तथाच टिप्पण्यामपि न साध्य
केवलान्वयित्वप्रयुक्तो दोषः न दत्यंताभावासामानाधिकरण्ये सति तत्सामानाधिकरण्यस्य व्याप्यतापदार्थता
मभिप्रेत्य च वैयर्थ्यमुक्तं एवं चाहत्त्वावपि साध्यसत्वादाह रजताद्यर्थीति रजतत्वविशेषेति रजतार्थिप्रवृत्तिविष
य रजते त्वर्थः न साधनवैकल्यमिति रजतत्वादौ रजतार्थिप्रवृत्त्यविषयवृत्तेः तेऽरजतत्वादौ चेति शेषः ननु वृत्ति
मत्वावच्छिन्नसाध्यव्यापकं रजतवृत्तित्वमेवोपाधिरस्त्वित्यत आह मात्रेति समेऽनुमानविषये सहेतोः हेतुसा
ध्ये व्याप्तिर्यस्येति व्युत्पत्त्या समव्याप्तिकशब्देन शुद्धसाध्यव्यापकोच विवक्षितः तथाच मात्रपदं दत्ते रजतेतराद

प्र·म·

114

त्तित्वरूपः शुद्धसाध्यव्यापकत्वमुपाधिर्लक्ष्यत इति भावः· यद्धारऊत्ववृत्तित्वस्य प्रवृत्तिमत्त्वावच्छिन्नसाध्यव्यापकत्वे
पि तादृशसाध्यव्याप्यता नास्ति प्रमेयत्वादौ व्यभिचारादिति न तत्समव्याप्तिकं किन्तु मात्रपदसमभिव्याहार
लभ्यं रऊतेनरावृत्तित्वमेव शुद्धसाध्यसमव्याप्तिकमिति भावः· केचित्तु स्वसमानाधिकरणात्यन्ताभावाप्रति
योग्यनाहार्यानुसरवरऊ तत्प्रकाराविशेष्यत्वसामानाधिकरण्यात्मकं साध्येन वैयधिकरण्यं· हेतुश्च रऊतार्थिप्रव
त्तिविषयेतरावृत्तित्वसतिवृत्तिमत्त्वं· तच्च रऊ तु मात्रवृत्तित्वं रऊतेतरावृत्तित्वसतिवृत्तिमत्त्वरूपं समव्याप्तिकमुपा
धिः· यद्वा सत्प्रतिपक्षोत्थापकतापदे पदार्थत्वेनैवोपाधितया पदार्थवृत्तिविषमव्याप्त रऊतेतरावृत्तित्वोपाधि
लाभाय मात्रग्रहणमित्याहुः· अतिरिक्तविषयतापदं मालंब्य मूले उक्तिरवृत्तीत्यादि· ज्ञानपदमिच्छाविष
यतायामंशतः सिद्धसाधनवारणाय· तदपि रऊतार्थिताऽजन्यप्रवृत्तिहेतुज्ञानपरं· अन्यथा स्तुतित्वादिप्र
कारकज्ञानविषयतायामंशतो बाधापत्तेः· मूले रऊतार्थिताऽजन्यप्रवृत्तिविषयवृत्तित्वं तादृशप्रवृत्ति

नकज्ञाननिरूपितत्वं॰ अतो न शुक्तित्वादिप्रकारकविषयताविशेषे व्यभिचारः॰ रजतार्थिप्रवृत्त्यजनकज्ञा
ननिरूपितायां द्रव्यत्वादिप्रकारिकायां रजतनिष्ठविषयतायां साधनवैकल्यादाह॰ साधनेति॰ साधनाधिकर
णीभूतो रजतवृत्तिर्विषयताविशेषो दृष्टान्त इत्यर्थः॰ उपाधिः रजतवृत्तित्वरूपः॰ ज्ञानविषयतावच्छेदकमिति
मूलेऽवच्छेदकं प्रकारः॰ रजतारजतसाधारणे द्रव्यत्वादौ॰ सिद्धसाधनमिति॰ अंशत इति शेषः॰ ज्ञानगर्भमिति॰
अत्र ज्ञानपदेनारजतविषयकप्रवृत्तिहेतुज्ञानमभिमतं॰ अन्यथा सत्यरजतज्ञानविषयतायां अंशतो बाधा
पत्तेरिति॰ तादृशज्ञानविषयतामात्रस्य पक्षत्वे शुक्त्यादिज्ञानविषयतायामंशतः सिद्धसाधनं स्यादिति रजत
त्वप्रकारिकेति विशेषणमित्यपि द्रष्टव्यं॰ द्रव्यत्वादौ साध्याव्यापकत्वभयादाह॰ विषयतात्वेति॰ न च रजतारज
तविषयसमूहालंबनविषयतायां तथापि साध्याव्यापकत्वमिति वाच्यं॰ विशेष्यभेदेन विषयताभेदादिति भा
वः॰ उक्तस्यैव सिद्धसाधनवारणस्यैव॰ शुक्तिविषयप्रवर्त्तके शुक्तिविशेष्यकशुक्तित्वप्रकारकज्ञानेंऽशतः सि

द्धसाधनं न दोषाय प्रकारतावच्छेदकैकत्वादित्यत आह · प्रकारतेति · अंशतो बाध इति · सत्यरजतज्ञान इति शेषः ·
मूले ज्ञानपदं चेच्छायामंशतः सिद्धसाधनवारणाय · निर्विषय इति · तथा च न तत्र शुक्तिविशेष्यकत्वं साध्यमस्ती
115 ति भावः · कथमिति · प्रवर्त्तकत्वे प्रवृत्त्यनुकूलत्वं तच्चापि गतमिति प्रष्टुर्भावः · प्रवृत्त्यभावेपीति · यद्यपि प्रवृत्तिप्रत्य
न्वयव्यभिचार एवैतावता दर्शितः स च कारणांतरासत्वप्रयुक्तो न हेतुत्वबाधकः · तथापि फलज्ञानस्यान्यथा
सिद्धत्वे तात्पर्यं · नन्विदं त्वसिद्धिरिति · इदं च प्रकारतावच्छेदकविशिष्टपक्षे हेतोरसिद्धिरित्यभिप्रेत्य प्रकारताव च्छ
च्छेदकाश्रयत्वाभिमते धर्मिणि हेतुसत्वरूपात्त्वसिद्धिः संभवत्येवेति ध्येयम् · विशेष्येति · विशेषणविशेष्यगतवि
षयतावादिमते शुक्तिनिष्ठं रजतमित्यादिज्ञानविषयतामादाय सिद्धसाधनात्मतभेदाश्रयणमिति भावः · मूले रज
तज्ञानेति · रजतत्वप्रकारिकायाज्ञानविषयतानदाश्रय इत्यर्थः · यथाश्रुते शुक्तौ रजते इति समूहालंबनविषय
तामादाय सिद्धसाधनान्नत्र विशेष्यभेदेन विषयताभेदात् · मूले शुक्ताविति · रजतार्थिप्रवृत्तिमात्रस्य पक्षत्वेंऽशतः

कर्त्तैवस्वाश्रयग्राहकमित्यर्थपर्यवसाने यावत्स्वाश्रयग्राहकग्राह्यत्वं लभ्यते· तथा च ज्ञानप्रामाण्यं स्वग्राहकताव्याप्यस्वाश्रय
ग्राहकताकस्वाश्रयग्राहकताव्यापकीभूतस्वकर्मकग्रहताकत्वं ताकं वेत्यादिना च ज्ञानप्रामाण्यपदार्थकस्वतस्त्वसिद्धिरितिरीति
स्तदा सुस्थमेव सर्वमिति· विशेषणोपादानेति· न चानुपादाने पदस्य संकोचेऽप्रामाण्यग्राहकसामग्र्यसमवहितत्वपदं विशेष
णानिश्चयः· स्वमात्रप्रतीतवस्तुधीप्रामाण्ये तन्निश्चयसंभवात्· न च पूर्वविप्रतिपत्त्या च पि ज्ञानपदं स्वाश्रयपरमेवेति तेन कर्त्त
भेदः· तदाज्ञानांतर्भावोऽस्त्विति पर्यालोच्य न यास्वाश्रयज्ञानत्वेन प्रवेशादिति दिक्· किं चेति· ननु तुल्यन्याय तया व्यापकेपि व्या
प्यत्वात्तु पं न गुरुमते व्यर्थत्वं· विकाशकत्वाभिधानं च वैधर्म्यमात्रं नियतोपस्थितिक लघुगुरुधर्मद्वयमध्ये लघुधर्मे वच्छेदकत्वं
प्रमाणविषयो न गुरुधर्म इति व्यर्थताबीजस्य विकाशकेपि सत्वान्नवैकधर्मिगतत्वेनापि धर्मद्वयविशेषणं प्रकृते स्वाश्रयद्व
योः समावेशात् घटैकं बुग्रीवादिमत्त्वादपि घटत्वास्फूर्त्तिदशायां व्याप्यतावच्छेदकतोपगमेन नियतोपस्थितिकत्वविशेषणाव
श्यकत्वे एकधर्मिगतत्वांतर्भावे गौरवात्· अत एव धूमप्रागभावो न हेतुरिति मणिरपि· अन्यथा धूमत्वस्य प्रागभावत्वे

118 यत्वं तच्च गगनादावत्र नो भासमानसंबंधप्रतियोगित्वेपि नास्तीति तत्रेत्यर्थः । अत्र गगनत्वमित्यत्र च गगनवृत्ति
त्वमेव प्रकार इत्यवधेयम् । एतेन प्रामाण्यघटत्वज्ञानापेक्षया धर्मिषु ज्ञानघटात्मसु नञ्चापि प्रसिद्धिराद्ययोर
नुव्यवसायेः त्वे अत्रात्मत्वमित्यत्रात्मप्रकारत्वेन प्रसिद्ध्यसंभवादत्र सत्त्वमित्यत्र सत्तात्रस्यैव प्रकारत्वादिति निरस्तम् । नच
तथा साध्यविवक्षायां मानाभावः अखंडत्वेन व्याप्यताविरहे व्यतिरेकप्रसिद्धेरवबीजत्वादिति दिक् । धर्मिणि घटप्रमात्वा
वच्छिन्नप्रतियोगिकाभाववत्त्वापत्तावित्यर्थ इत्यन्ये । तार्किकास्तु सर्वज्ञानं गुण इति प्रामाण्ये बाधो ज्ञास्यते घट इति ज्ञानानंतरं द्वि
तीयक्षणे घटोयमिति तदाग्रिमक्षणे तदुभयजन्योनुव्यवसायस्तत्राप्यप्रामाण्ये च बाधः प्रमा वा नित्यानुमितिविषयप्रा
माण्ये सिद्धसाधनमिति बाधसिद्धसाधनवारणाय तत्तानविषयानागतविषयज्ञानाजन्यसामान्यव्याप्तिग्राहकशब्दादिनिबंधनवि
शेषप्रकारकान्यज्ञानग्राह्यं नवेत्यर्थो ज्ञानं पारमेश्वरमादाय न बाध इति । एवकार इति । यद्यपि कुमुदं श्वेतमेवेत्यत्र कुमुदे श्वैत्यस्य
विधेयतया यथा नियमस्तथा प्रामाण्यकर्मकग्रहणकर्तृकत्वस्य स्वाश्रये विधेयतया नियमे एवकारतात्पर्यात्प्रामाण्यकर्मकग्रहण

सायस्य प्रत्यक्षात्मकलिङ्गधीजानुमितिविषयत्वेन तयानुमित्यनुव्यवसायानुमितिप्रामाण्येतद्ध मुरारिगुरूणां बा
धवारणायोपात्तं तत्पदं स्फुटप्रयोजनमिति तदुपेक्ष्याह· अत्र प्रथममिति· तेन त्वादित्रिरित्ति· अतद्गुणसं
विज्ञानबहुव्रीहिणाकारारैरित्यर्थः· आत्मनो व्यतिरेकाप्रतियोगितया चांकानात्पदत्वादिति· तयाचेति· प्रमा
णान्तरगोचरेण ज्ञानेन जनिताये छात तत्प्रकारत्वेन प्रामाण्ये यदर्थान्तरं तद्वारणायेत्यर्थः· गृह्यमाणेति· गृह्य
माणसकलप्रामाण्यनिष्ठमित्यर्थः· उक्तक्रमेणेति· नन्वयं विशेष्यावृत्त्यप्रकारकधीमानित्यनुमितिविषयसम
नियतप्रामाण्ये आलोकजन्मत्तेपि संकोच इति· अत्र प्रतिभाति· विषयत्वेपि प्रकारत्वाभावात् संकोचलिखनं च
प्राचीनमतानुसारित्वादुपाध्यायमतेवयाप्त्यस्यैवसाध्यत्वेन संकोचावश्यकत्वादिति· अन्ये तु· साध्यरूपमेक
मेवव्यंजकजन्येदाक्षिन्नतयागृह्यते यन्मते तन्मतेनेदं दूषणं नान्वयेति वदन्ति· ननु प्रामाण्यघटकान्विशाकलितपदा
र्थमज्ञानं नविशेष्यविशेषणमित्यादिन्यायोत्पन्नमानसज्ञानमादाय सिद्धसाधनं· किंच विषयत्वं विहाय प्रकारत्वधा

वन्नमर्थान्तरवारणाय॰ तत्र किं प्रकारत्वं न तावज्ज्ञानकाधीविषयत्वं॰ परमते बाधात्॰ नापि ज्ञासमानधर्म
त्वरूपसंबंधत्वं॰ अभिधेयवानित्यादिशाब्दबोधमादायसिद्धसाधनात्॰ अप्यसाधारणधर्मानवच्छिन्नस्य प्र
117 कारत्वमेवं विषयत्वमेवाभिधीयतां॰ व्यापकतावच्छेदकप्रकारकधियस्तन्मतेपि प्रयोजकत्वात्प्रमावानि
त्यनुमित्यासिद्धसाधनं॰ परं बहिर्भावोपि न॰ तादृशानुमित्यविषयतानिश्चयाभावादिति॰ यद्यप्यप्रमाज्ञानप
दप्रयोजनं तन्न तन्मतेपि साध्यतावच्छेदकप्रकारकधियः प्रयोजनकत्वादिति॰ अत्र विशिष्टं प्रकारत्वे नाभिमतं॰
न च विशेष्येत्यादिनोक्तं तन्न विशिष्टप्रकारीकरोति विशिष्टनिविष्टविशेषणतावच्छेदकविशेषणसंबंधस्य प्र
र्वमज्ञानान्नप्रथमः॰ नापि द्वितीयः॰ न त एव प्रकारत्वधावनात्प्रवृत्तिजनकतावच्छेदकधर्मावच्छिन्नधीमानि
त्यनुमितौ नद्वतीत्यस्य प्रकारत्वात्प्रमावानित्यत्र शंका॰ परं बहिर्भावस्य स्वमात्रप्रतीतवस्तुधीज्ञामात्रपरत्वाकर
णेज्ञावयएवेति॰ धर्मिणीति॰ धर्मितनयेवभाते नत्वितरघटवत्त्वे नापि कोप्रेरेहत्यर्थः॰ यद्वा साध्यस्यं प्रकारत्वमाधे

त्रापीति॰ प्रमापदादिजज्ञाने सिद्धसाधनं पदार्थस्मरणाहेतुत्वेनार्थान्तरमुक्तरीत्यावेत्यर्थः॰ योगिनो व्यवहितयोग्य
मात्रज्ञानं योगजेन न त्वयोग्यधीगोचरमपि चक्षुषा रसग्रहापत्तेरित्ययोग्यप्रामाण्यधीविरहान्न सिद्धसाधनमि
त्यपि कश्चित्॰ सर्वज्ञानमिति॰ यद्यपि गुणत्ववति गुणत्वप्रकारकत्वादेरुक्तधीप्रामाण्यस्वरूपं गुण इति ज्ञानान्तरेपि
स्यत्वान्नत्रापि साध्यसत्त्वमेव॰ तथापि स्वविषयकधीमात्रवृत्तिप्रामाण्ये बाधापत्त्या संकोच आवश्यक इत्यत्र तात्पर्य
तयैवेति॰ विषयताख्येन संबंधेन घट एव यत्र प्रमात्वानुमितौ लिंगं यत्र वा प्रमात्वव्याप्यज्ञानत्वविशिष्टघटज्ञा
नवानयमिति व्यवसायस्तत्र स्ववृत्तित्वस्वविषयज्ञानाजन्यत्वादनुमितेः सिद्धसाधनं न भवत्येवेति भावः॰ एतेन स्ववृत्तित्व
पक्षधर्मताज्ञानापेक्षित्वात्स्वरूपसिद्धसाधनं॰ न च तन्मते ज्ञानत्वस्य प्रमात्वव्याप्यतया तद्वैशिष्ट्यावगाहितया तदेवप
क्षधर्मताज्ञानं॰ व्याप्यतावच्छेदकज्ञानत्वत्वरूपेण तथापि तदनवगाहनादित्यपास्तमिति॰ ज्ञानविषयकव्याप्ति
धीजज्ञाततालिंगकानुमितिव्यवसायजानुव्यव [redacted]

वोत्. न. ज्ञानत्विन्नत्वेन शाब्दनानुरोधेन पूर्वज्ञानस्यावच्छेदकत्वात्. पूर्वाज्ञातप्रकारत्वस्य शाब्दमात्रे घटमहं जाना
मीत्याकारानुपपत्त्या शाब्दस्य लक्षणएवोपगमाच्चेति. इत्यादिनेति. इदं ज्ञानं प्रमेत्यप्रमारूपानुमितिर्न्न ह्यमतेप्यादि
११८ पदार्थः न्त्रमस्य पक्षत्वादच्छग्राह्यशाब्दमात्रप्रत्यविषयकज्ञानाऽन्यत्वमस्त्येव. सिद्धसाधनमपर्यान्तरमित्यप्यन्य
थानैयायिकैरताद्दशानुमित्यनुपगमेनासंगत्यापत्तेरिति कश्चित्. तार्किकास्तु. इत्युक्तप्रायमित्यत्रापि वदन्तीत्यनुषं
नीयं. तथा च तन्मते तस्य पूर्वाज्ञातत्वेनाप्रकारतया सिद्धसाधनाप्रसंग एव. एतच्च वैशेषिकानुमाने एतानि पदानि
तात्पर्यविषयेत्यत्र पटोऽस्तीति वाक्यव्याप्तिग्रहोपि घटोऽस्तीतिवाक्ये घटसंसर्गस्य पूर्वमनुपस्थितस्यापि प्रकारत्वोपग
मात्. यत्र स्यामनुमितौ विशेषानुपस्थितोपि प्रकार इति तदनुसारेणाशंकितमित्यवधेयम्. एतेन व्यापकतावच्छे
दकप्रकारकज्ञानस्यानुमितितावपेक्षणीयात्वपमताद्दशानुमितिमादाय सिद्धसाधनशंकेत्यपास्तम्. वस्तुतो विषयो
पिन भवति. नचैतानि पदानीत्यत्र का गतिः संशयस्य तत्र सिद्धित्वादच्च तथात्वे स्वाश्रयज्ञानापेक्षापत्तेरिति. एवमस्य

ज्ञानत्वमपीत्यवधेयम्· एतेन यत्रत्वमेइच्छागृहीततद्वृत्तितत्प्रकारकत्वारोपेण तद्वृत्तितत्प्रकारकज्ञानत्वेन· यत्राइच्छा
यां तद्वृत्तितत्प्रकारिकायां ज्ञानत्वारोपानन्तरमुक्तक्रमेण सामान्यलक्षणा तत्र सिद्धसाधनं स्वाश्रयज्ञानविषयकज्ञाना
प्रयोज्यत्वात्सामन्यप्रत्यासत्तिजज्ञानस्य· किंच काशीमरणजं तत्त्वज्ञानमादाय सिद्धसाधनं· नहि तदपि निदिध्यासनजम्·
न च तत्रापि स्वाश्रयज्ञानमपेक्षितमेव पूर्वमुज्ञानेऽप्रकारत्वापत्तेः प्रमात्वस्येति वाच्यं· अप्रमावप्रतीतोप्रतियोगित्वाभावस्य
योरित्यादिदर्शनेनाज्ञानस्यैव तस्यतेः प्रकारत्वोपगमादिति निरस्तम्· इच्छाया अपि स्वाश्रयत्वात्· न च त्वन्मते ज्ञानत्वघटत्वप्रका
रकत्वेन गृहीते घटविशेष्यकपटत्वप्रकारकेच्छायां तद्विशेष्यकत्वेन गृहीते तद्वृत्तितत्प्रकारकत्वेन सामान्यलक्षणायां तथा
पि सिद्धसाधनं· त्वन्मते समूहालंबनसाधारण्यवारणाय तद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वस्य प्रामाण्यत्वे तस्य च वि
शिष्टस्य पूर्वमज्ञाने प्रत्यासत्तित्वानुपपत्ते र्ज्ञानेव स्वाश्रयज्ञानापेक्षणादितिदिक्· अनुव्यवसायज्ञाततालिंगकानुमिति
व्यवसायेष्वेव च पूर्वाज्ञातस्य प्रामाण्यस्य मीमांसकैः प्रोव्याप्रकारतोपगमादिति काशीमरणजमित्यादिनिरस्तं बोध्यम्·

ग्राहकेण परज्ञानप्रामाण्याग्रहेण बाधविघटनं च प्रयोजनमिति। अत्र प्रथमसाध्ये केवलान्वयित्वं। द्वितीये चाप्राप्तका-
लत्वमिति प्रतिभाति। अप्रामाण्यस्य व्यधिकरणेति। इदमुपलक्षणं विसंवादित्वं प्रवृत्तिजनकतावच्छेदकग्रहसामग्र्यस-
119 मानकालत्वस्याप्रमाव्यवहारजनकासमानकालत्वस्य विवक्षितत्वे दोषाभावएव। तच्च तन्मते किंचिदस्त्येवत्यपि दुष्ट-
त्वं। तेनागृहीतेति। एतेन तृतीयासमासोपि सूचितः। तज्ज्ञानविषयकेति मूलं। नैयायिकमतसिद्धप्रामाण्यग्राहकभिन्न-
ज्ञानग्राह्यत्वं तज्ज्ञानविषयकेत्यादिविधिकोट्यर्थो तो न कोपि दोष इति गौडप्रांचः। तेन तद्विषयकेश्वरेति। यद्यपीश्वरधी-
निराकरणाभिप्रायेणैव परेण तादृशसाध्यकरणान्न तदादाय सिद्धसाधनं दोषस्तथापि निषेधसाधने बाधो विधिसाध-
नेऽर्थान्तरं तु वारमेवेति भावः। परमत इति। समानाधिकरणपदेऽसमानाधिकरणज्ञानस्य व्यावर्त्यस्याप्रसिद्धावपि निःप्रयो-
जनत्वं। अन्यपदे व्यावर्त्याप्रसिद्धिरिति फलतो न विशेष इति भावः। अनागताविषयकत्वमुपयत्र ज्ञाने विशेषणमन्यथा-
गतज्ञानप्रामाण्यं च न पक्ष इत्यपि गौडनव्याक्रमणेनैव प्रत्युक्तमिति। तज्ज्ञानविषयकेत्यत्र च स्वाश्रयत्वमात्रं विवक्षितं। नतु

न्यायापत्तिस्तद्वन्नमित्यचलुमस्मत्तपष्ण्या अप्रतिपादकत्वे सर्वनाम्निलक्षणानुपगमेऽन्वेदान्वयाभावेन सर्व
नाम्नि व्युत्पत्तेर्भेदात्। न च तद्वा घटविषयकत्वावच्छिन्नज्ञानत्वावच्छिन्नशक्तिस्यामुपपत्तिर्नव घटविषयकत्वे
न ज्ञानोपस्थापकतत्वदेवाधतादवस्थ्यं। ज्ञानत्वविशिष्टधीग्राहकसामग्र्या विवक्षितत्वादत एव ज्ञानत्वे प्रसि
द्धिरुक्तेति। ममत्तुप्रतिभाति। यत्रैकः सन्निकर्षः यत्र शक्तिरेकाव्यतिरेकास्वाश्रयज्ञानं वा विषयविशिष्टस्वा
श्रयग्रहसामग्री तत्र साप्रामाण्यं गृह्णातीति। प्राभाकरसाधारण्याय सन्निकर्षधावनं। यत्तु। उपनयादिनावि
षयाविषयकस्यापि प्रत्यक्षस्य संभवादसंभव इति। तन्न। ज्ञानीयलौकिकप्रत्यक्षे तथा नियमादिति। प्रगल्भास्तु।
उपनयवादिसिद्धप्रामाण्यग्राहिकायाः सामग्रीतन्निन्नयावत्सामग्रीग्राह्यत्वमर्थ इतियदं श्रोज्ञानग्राहकत्वेत
दं श्रोउपनयवादिसिद्धप्रामाण्यग्राहकभिन्नत्वं। तेन ज्ञानज्ञानं भ्रमेत्यत्र विषयाभूत ज्ञाने प्रामाण्यग्रहेपि न दोषः।
न च ज्ञानग्राहकपदवैयर्थ्यं। तमोवयव्याश्रयचाक्षुषजनकसामग्र्या तद्ग्रहेण बाधात्। यद्वा। उक्तार्थतात्पर्यात्।

नुमितेर्व्याप्तिपक्षधर्मतान्यतरस्य ममूलकत्वावच्छेदकत्वे प्रामाण्येत्यस्य वैयर्थ्यापत्तेरिति भावः एतेन गुरुनये
विषयग्राहकताया ज्ञानग्राहकताऽप्रयुक्तत्वे प्रस्तुतविषयग्राहकताप्रयोजकस्यैव ज्ञानग्राहकताप्रयोजकत्वं
121 सर्वस्यैव विषयग्रहस्य ज्ञानविषयत्वात् किंच किं सामग्र्योरेकं विवक्षितम् अव्यभिचारो वा आद्ये बाधो व्यवसा
येसंयुक्तसमवायेन विषयज्ञाने न ग्रहणोपगमात् नान्त्यः शब्दत्वावच्छिन्नइवानुव्यवसायत्वावच्छिन्नेप्यनिय
मात् प्रत्यक्षानुव्यवसायत्वावच्छेदेन ज्ञानघटग्राहकयोरव्यभिचारे घटज्ञानवाकत्वावच्छिन्ने नियम इहापि
किंच तदादिपदेन प्रकरणवशात् घटविषयकज्ञानोपस्थापकेन प्रामाण्यग्रहाबाधः किंच पदार्थतावच्छेद
कावच्छिन्ने शक्तिवच्छक्यतावच्छेदकावच्छिन्ने लक्षणोपगमात् लक्षणया शक्त्यन्तरेण वा यत्र बुध्यादिपदं घट
ज्ञानोपस्थापकं तत्र बाधावकलेप एवेति परास्तं किंच न हि घटज्ञानत्वावच्छिन्ने काशक्तिस्तत्पदे घटत्वावच्छि
न्नज्ञानत्वावच्छिन्नशक्तिस्त्वामुपपन्नो विशिष्टशक्तौ मानाभावान्नबहु प्रातिपदिकार्थयोर्घटज्ञानयोरभेद

तमेवेति । केचित्तु नन्वयत्वासेनाप्रामाण्यानात्मवपदं तद्वतीत्यादिपरं तथा च तद्वतीत्यादिग्राहिकायाः सर्वथा
स्वातंत्र्येण गृह्यते न वेति नैयायिकमते स्वातंत्र्येणानुव्यवसायो न गृह्णातीति विवादकाष्ठा । स्वातंत्र्यविशेषणा
देवचनसिद्धसाधनं । घटत्ववतीत्यादिनातद्द्विषयत्वग्राहकसामग्र्या एवोक्तत्वादनुव्यवसायस्य च तथात्वा
त् । अन्यज्ञानग्राहिकसामग्र्या अन्यज्ञानप्रामाण्यग्राहकत्वनिबंधनबाधवारणार्थोपात्ततत्पदं ज्ञानान्वितं त
ज्ज्ञानग्राहकसामग्रीति पर्यवसन्नमिति न तत्पदवैयर्थ्यं । न चैतितत्प्रकारिकेच्छात्येवमिच्छाग्राहकसामग्र्या ज्ञान
त्वगर्भप्रामाण्यग्रहाद्बाध इति ज्ञानपदम् । यच्च गुरुमतसिद्धग्राह्यप्रामाण्यं यज्ज्ञानसमानाकारज्ञानग्राह्यत्वमि
ति मान्यैरुक्तं । तन्न । घटज्ञानवानयमित्यनेन प्रामाण्यग्रहेण बाधतादवस्थ्यमिति । उपाध्यायास्तु । सर्वमेव प्रामा
ण्यं परतो ग्राह्यं वृत्तित्वधर्मावच्छिन्नत्वलक्षणं ग्राह्यज्ञानीयत्वं च साध्यं । स च धर्मः प्रामाण्यमेव । यद्वा । प्रामाण्यत्वमेव
पक्षस्तादृशग्राह्यवृत्तित्वं च साध्यं तत्पदं च ज्ञानविशेषणम् । तज्ज्ञानग्राहकसामग्र्यास्त्वर्थः पर्यवस्यति । घटज्ञान

न तत्पदवैयर्थ्यमिति। तन्न। ज्ञानंऽव्यमित्यन्यथाख्यातिसामग्र्या गुरुमतासिद्धत्वेन तद्भिन्नयाऽग्रहादुक्तसा
121 ध्ये बाधात्। किं च घटज्ञानपदालिकासामग्र्यन्वयितावच्छेदकोपस्थितिदशायां नव्यमते गुरुमते च प्रामाण्यग्राहि
केत्युभयसिद्धप्रामाण्यग्राहकभिन्नतया यावत्त्वगर्भसाध्ये मुरारिमते बाधः। उभयपदेन च वादिवद्धष्टया त्रिधा
ने च नैयायिकग्रहणं व्यर्थं तद्विनापि सामंस्यात्। यदि चोभयवादिपदं तत्र वादिपरं तथा च तन्नैन्मतसिद्धप्रामाण्य
ग्राहकभिन्नज्ञानग्राहकसामग्रीग्राह्यत्वपर्य इति नोक्तदोष इति वाच्यं। तदा ज्ञावृसामान्यमात्रं न त्वर्थस्येति न त्रितयसा
धारणी विप्रतिपत्तिः। न चैवमपि संगतिर्नहि मुरारिमते गुरुसिद्धप्रामाण्यग्राहकभिन्नासर्वाप्रामाण्यग्राहिका।
न च तन्मतसिद्धप्रामाण्यग्राहकभिन्ना तन्मते प्रामाण्यग्राहिकेत्यर्थ इति वाच्यं। सिद्धसाधनापत्तेस्तथा हि। न हि नै
यायिकोपचतादृशसामग्र्याः प्रामाण्यग्राहकत्वं प्राभाकरसिद्धान्त इति तादृशसामग्र्या तन्मते प्रामाण्यं गृह्यत
इति विप्रतिपत्तिवाक्यस्य निर्गलितविधिकोट्यर्थे विप्रतिपद्यते। तथा सामग्रीग्राह्यत्वे विप्रतिपद्यते तत्र बाधेन इषि

उतद्विशेष्यकत्वावच्छिन्नं तत्प्रकारकत्वं· तत्रवावच्छेद्यावच्छेदकभावरूपस्वरूपसंबंधस्यानुव्यवसायवि
षयत्वं· नवविशेष्यत्वं यथा पूर्वाज्ञातं प्रकारत्वयावच्छेदकत्वमपि स्यादिति वाच्यं· ससंबंधिकपदार्थज्ञानत्वावच्छेद
नसंबंधिज्ञानस्यहेतुत्वात्· विशेष्यत्वरूपस्वरूपसंबंधस्यावच्छेदकत्वं प्राग्विशेष्यत्वाज्ञाने न ज्ञातुं शक्यमिति
न स्वतः प्रामाण्यग्रहः इति दिक्· अत्र घटावच्छिन्नघटत्वप्रकारकत्वेन भ्रमसाधारणत्वं न वा ज्ञानानुपपत्तिरिति प्र
तिभाति· यासामग्रीति· यस्यां सामग्र्यां विषयाविषयत्वमापाद्यमानं ज्ञानाविषयत्वमापादयति· तत्पदार्थेन विषया
विषयत्वेन ज्ञानाविषयत्वं ज्ञाप्यापादनं बुद्धिस्थतायां नियामकतया तद्बुद्धिस्थतायां तद्भाषात्· प्रमापदेव तदापा दना
दनात्सिद्धसाधनवारणाय यावत्पदसार्थकमिति· यद्वाय ज्ञातीयबुध्युत्पादकनियतसंबंधेज्ञानोपस्थापकां ज्ञानत्वमा
मत्वके जनकतावच्छेदकावच्छिन्नातिरिक्तविशेषसामग्र्यानापेक्षते· तत्पदं जनतयाऽतिरिक्तबुद्धिस्थत्वापेक्षत्वात्·
अप्रामाण्यग्राहकसामग्र्यपि ज्ञानांशेत्रमात्मलिकेवेति नाप्रामाण्यग्राहकपदवैयर्थ्यमन्यथाप्रमायामप्रामाण्य

र्वचनत्वात्तस्यागृहीतत्वात्· अत्रापि प्रामाण्यं गृह्यत एवेति चेत् परं· सत्त्वानिश्चयाकारज्ञानाज्ञनवत्स्यापि प्रामा
122 ण्यग्राहकत्वे घटज्ञानमित्यत्र प्रामाण्यग्रहे ष्टापत्तौ का क्षतिः· किंतु प्रकारीभूतधर्मविशिष्टविशेष्यकत्वं प्रामाण्यं त
च्चानुव्यवसायाग्राह्यमेवेति· एवं च प्रामाण्यग्राहकपदमपि व्यर्थं तद्ग्राहकसामग्र्यास्तद्विशेष्यकत्वेन ज्ञानाग्राह
कत्वात्· ननु नैयायिकमते प्रकारत्वभानानुरोधेन तद्विशेष्यत्वभाननैयत्ये उक्तोऽनुव्यवसायेन प्रामाण्यभानमिति·
अनुव्यवसायेन विषयप्रकारत्वं ज्ञाने तद्विशेष्यकत्वं यदपि विषयीक्रियते तदपि न विशिष्टं अन्यथा संशयानुपप
त्तेरिदं च वाच्यमेवान्यथा व्यवसायानन्तरं स्वारसिको यथा न तद्वत्त्वसंशयस्तथा प्रामाण्यसंशयोपि न स्यात्· प्रामाण्य
ग्रागांतरे संशयात्· तथा च तद्वत्त्वनिश्चयस्य स्वतंत्र तत्संशयविरोधित्वेपि विशिष्टशरीरप्रविष्ट तत्संशयाविरोधित्वं
यथा तथा प्रत्येकं तत्सर्वग्रहेपि न विशिष्टविषयत्वमिति तार्किकाः· इदं तु विशिष्टस्यानतिरेकादसम्यगिव प्रतिभाति·
अत्र नव्याः· घटत्ववद्विशेष्यकत्वघटत्वप्रकारकत्वमात्रं हि न प्रमात्वं घटपटयोः पटघटाविति भ्रमेपि तत्सत्त्वात्· किं

गिति॰ अन्वयितावच्छेदकसम्बन्धतो भासतां घटेनेत्यादाविवापरपदार्थानन्वयेन अलिङ्गिकत्वेनातिप्रसङ्गा
स्यापि घटत्वादिप्रकारकत्वादेर्ज्ञानसंभवान्नैवमस्तु तथाऽऽसत्तिसविषयकत्वमपि त्यज्यतां ज्ञानमित्यपञ्चाप्योत्सर्गिक
त्वाद्भासत एवेत्युपेयतां॰ किंच मुरारिमते नये निरपेक्षोत्सर्गनियामकत्वे व्यवसायविषयत्वादिनियामकोपदर्शन
विरोधापत्तिर्व्यवसायरूपप्रत्यासत्तिविरहेऽप्युत्सर्गादेव प्रतीतिसंभवादिति॰ इत्थं तत्प्रकारकघटविशेष्यकज्ञा
ने घटत्वप्रकारकत्वबाधावतारे घटज्ञानमिति वाक्ये च बाधः स्यात्॰ ज्ञानप्रकारकप्रकारकतयेति॰ इदं रजतत्वेन ज्ञा
नामीत्यनुव्यवसायरूपा च सामग्री भवति तथा॰ विशेष्यत्वेनेदंपदार्थस्य प्रकारतया रजतत्वादेरनुव्यवसाये भा
नोपगमात्॰ न्यायनये ज्ञानविशेषणतया ग्रहेऽपि स्वातंत्र्येणाग्रहान्न सिद्धसाधनमिति भावः॰ तथाहीति॰ अयमभिसं
धिः॰ पुरोवर्त्तिविशेष्यकरजतत्वप्रकारकज्ञानवानित्यत्रापि प्रामाण्यग्रहापत्त्या न प्रकारीभूतधर्मविशेष्यविशेष्य
कत्वं प्रामाण्यं तज्ज्ञानप्रकारीभूतवैशिष्ट्यानुयोगितावेन तज्ज्ञानविषयत्वमेव तज्ज्ञानप्रकारत्वं तदन्यस्याशाकत्वनि

वेत्याद्यपि न भवति। किं च विशेषणं च देयं किंतु यद्वस्तुगत्या तादृशं तदेव पदं तथाप्यशेषमात्रज्ञानं यावत्प
123 दमिति ऊसदृष्टिरेव नानेकाशेषज्ञानत्वेपि विशेष्यैलक्षणाविरहाद्धक्षणापत्तेपि साध्यस्य यावत्पदेन सा किंतु
पदस्य ज्ञानपद इत्यत्र विनिगमनाविरह इति दिक्। बाधविच्छेदादिति। यद्यपि साध्याप्रसिद्ध्या तदभावरूपबा
धासंभवस्तथापि बाधपदमप्रसिद्धिपरम्। ननु चाशास्त्रीत्यारभ्य तस्मात्सविषयत्वं दुर्वचमित्यन्तं शंकेत्यवधेयम्।
ज्ञानत्वइति। घटज्ञानमित्यत्र घटविषयकं ज्ञानमित्यर्थस्तत्र च घटविषयकाभेदस्य न ज्ञानत्वमवच्छेदकं पटज्ञान
तिप्रसक्तत्वात्। नापि ज्ञानाभेदे घटविषयकत्वमिच्छादौ गतत्वादतो ज्ञानदिशि घटत्वप्रकारकधीत्वं घटविषयक
प्रिशितद्विशेष्यकधीत्वमन्वयितावच्छेदकं। न च घटविशेष्यकधीत्वं ऽद्यत्वप्रकारकत्वातिप्रसक्तं कथं तदवच्छेद
कं स्यादिति वाच्यं। घटत्वविशिष्टघटविशेष्यकधीत्वस्य तत्त्वात्। न घटविशेष्यकत्वमन्वयितावच्छेदकमिति न घट
विशेष्यकत्वं प्रतीत्यर्थः। घटत्वप्रकारकज्ञानत्वमविशेषः। यथाश्रुतेऽवच्छेद्यातिप्रसंगेपि लक्ष्यत्वाभावादिति दिक्।

वेद्यवासामग्रीयत्रज्ञानग्राहिकातत्रैतत्पर्य्योविषयेऽपितत्रैवप्रसिद्धिरिति॰ननुनैयायिकमतेतादृशानेकमेवज्ञा
नमित्ययुक्तमित्यस्वरसादाह॰तद्विषयेति॰विषयतावच्छेदकइत्यर्थः॰एतेनयावत्स्वाश्रयग्राहकग्राह्यत्वस्यप्रत्ये
कंसर्वत्रज्ञानव्यक्तावसंभवइत्यपास्तं॰ज्ञानत्वइति॰ननुघटत्ववतितत्प्रकारिकानुमितिरित्यादिज्ञाद्यालकयथोक्त
सामग्र्याज्ञानत्वाग्रहणाद्बाधंतत्रप्रसिद्धिः॰नचानुमितित्वजात्यसिद्ध्यालिंगधीजज्ञानत्वस्यानुमितित्वेकथंतदग्रहः॰
तद्वतितत्प्रकारकोगुणइत्यादिनातदग्रहणेनघाप्यसंगतेः॰किंचप्रमापदेऽननुभवांशमपहाययचलक्षणासा
मविषयज्ञानग्राहिकासंभवतिनतुज्ञानत्वग्राहिकेतितत्राप्रसिद्धिरेवेति॰न॰ज्ञानत्वविशिष्टज्ञानग्राहिकायाःसा
मग्र्याउक्तत्वात्तज्ज्ञाप्यत्वंचास्त्येव॰एवंचपरमतइत्यनुभवत्वजातेरितिचोपलक्षणमस्मन्मतेऽप्यदोषएवेत्यवधे
यम्॰ममतुप्रतिज्ञातिघटविषयकोगुणइत्यादिविलक्षणैववक्ष्यमाणसामग्रीतिदिक्॰किंचेति॰यद्यप्यनुगतेन
तादृशज्ञानेकसामग्रीग्राह्यत्वेनपरत्वेएकज्ञानपदस्याननयपरत्वेहत्तभावोऽशोकवनिकान्यायेनतुल्यत्वाद्यपि

मिति· न ज्ञानत्वसमानाधिकरणप्रमात्वाद्यप्रवृत्तिनिमित्तमिति तदर्थात्· ज्ञानप्रमेत्यपदप्रवृत्तिनिमि
124 त्तस्यपदत्वतया न ज्ञानप्रमेति संकेतविषयत्वाशरीरज्ञानतो प्रसंगः शरीरेऽपि ज्ञानप्रमेत्यपदं न संकेतार्हं· द्वा
दशोऽहन्नीत्यादौ नाम्नो विधेयतयैकत्वसंख्यायास्तन्त्रतया विवक्षितत्वादित्यन्ये· परे तु वस्तुमात्रसामग्र्यानिवि
ष्टपरं ज्ञानपदमित्यपरे· ज्ञानप्रामाण्यपदमिति· ज्ञानत्वेन सकलज्ञानपरं ज्ञानपदं प्रामाण्यशब्दवाच्यत्वेन स
कलपरत्ववत्तात्वादिपरं प्रामाण्यपदं· न च प्रत्येकपरत्वे पदतावच्छेदकेकमादाय सिद्धसाधनपरीहार
विरोधः सिसाधयिषयात त्परीहारे तस्य निर्भरत्वादिति· गुरुमतमिति· न च एकज्ञानग्राहकसामग्रीकतरप
ताभट्टमुरारिमतानुरोधादपीति गुरुपदं व्यर्थं न भट्टमते यस्यैकेवानुमितिसामग्र्या गुरुमते स्वप्रकाशमादाया
नैकैवसतिस भट्टमते तस्य पदत्वापत्तौ पुनरपि बाधापत्त्या अस्वप्रकाशवादि सिद्धानैकग्राहकसन्निविष्टत्वेवा
र्थं· तथा च साध्यकं गुर्विति· नत्वाने ति· ईश्वरानंगीकारादिदं त्वादिप्रकारकमेकमेव ज्ञानं यत्र स्वाश्रयनानात्वप्प

पदमनुपादेयमेव ग्राहकसामग्रीसन्निविष्टेच्छाज्ञानप्रामाण्यमात्रमेव वपरं इत्यर्थः अत एव ज्ञानानन्तर्ग
वइति क्वचित्पाठः नैवं प्रामाण्यमिति नन्वविषयत्वेऽपि घटत्ववतीत्यादिप्रामाण्यं न तिष्ठेत् अन्यथासिद्धासिद्
धियोरपि नैवं प्रामाण्यं स्यात् नच प्रकारत्वेनासमानेत्यादिघटितं नेच्छायामिति तत्रैकाविषयीकृतेत्यादिग
र्भं वाच्यमिति नैकमिति वाच्यं स्वविषयकविषयीकृतेत्यादिनासाधारण्यस्यैव तस्य संभवादिति न यन्मतेऽसि
द्धघटत्वं प्रकारस्तन्मते ज्ञानेच्छयोः प्रामाण्यभेदात् नो वासिद्धो घट इति ज्ञानेन समं तथाप्येकमेव यत्र नैतादृ
शी ज्ञानं तदिच्छाप्रामाण्ये बाधसंभवात् यद्वा नैकं नैकग्राहकसामग्रीकमित्यर्थः ज्ञाने प्रामाण्यं ज्ञापकग्रहं वि
षयोपरक्तस्य ज्ञानस्य ज्ञानान्तरं त्विच्छायां प्रामाण्यग्रहसामग्री तन्मते नागतज्ञानोपायाभावेन तदुपरक्तग्रा
ग्रहसामग्रीविरहेणासिद्धस्यैवतरस्य धीविषयतास्थितेरिति दिक् निगर्वस्त्विति ज्ञातीयत्वं च याव्याप्यानतिरिक्त
वृत्तित्वेन नच विशेष्यावृत्तित्वादि निर्विकल्पकवृत्तितयातिप्रसक्ततयासप्रकारकत्वविशेषितस्य जनकताव

छेदकत्वेन तत्संभवादिति· एतेन तज्ज्ञातीयत्वं व्याप्यत्वेन व्यापकत्वेन सममनियतत्वेन सामानाधिकरण्येन
125 वा· नाद्यो विशेष्यत्वादीनां निर्विकगतत्वात्· नापि द्वितीयः· एतज्ज्ञानत्वादेः तद्वृत्तीत्वादिव्यापकत्वाभावात्· अ
त एव न तृतीयो नापि चतुर्थो व्याप्तिज्ञानत्वादेः करणप्रमाकरणत्वस्य सामानाधिकरण्यसत्त्वात् द्वारकविशे
षणानुपादानापातात्· न च प्रत्यक्षप्रमाकरणत्वादेः तद्वारणाय तत्· एतन्निर्विकल्पकत्वादेः तथापि बाधात् न च
तन्न समर्थप्रवृत्तिजनकमिति वाच्यं· निर्दोषेन्द्रियत्वादिसंग्राह्यतानुरोधेन समर्थप्रवृत्तिप्रयोजकतावच्छेदकस्यै
वसंग्राह्यत्वादित्यत आह वस्तुत इत्यपास्तं· जनकतावच्छेदकस्यैवसंग्राह्यत्वान्निर्दोषालत्वादिवारणाय च ज्ञान
पदोपादानादिति· यत्तु यदवच्छेदेन समर्थप्रवृत्तिजनकत्वं तदेव तज्जनकतावच्छेदकं तच्च तद्वृत्तीत्वाद्येव न वि
शेष्यत्वादिगौरवादिति तत्राप्रसंग एवेति तन्न· तन्मात्रवृत्तित्वस्यावच्छेदकपदार्थत्वादिति· न न्वेवं परिशेषात्
तद्वृत्तीत्वादेस्वतन्त्रत्वसिद्धिरित्यप्राप्तकालत्वमित्यत आह वस्तुत इति· ननु यत्र ज्ञानं प्रमेति संज्ञातज्ज्ञातो कथं तद्वारण

वपिबाधतादवस्थ्यमितिपरास्तं॰ ननु ज्ञानपदादिबाधवारणाय वक्ष्यमाणसामग्र्येच्छाप्रामाण्यं गृह्यत एवेत्यनु
न्यायेनाह॰ यदिच्छेति॰ तदा ज्ञानान्तर्भावेप्यस्तु साध्य इति शेषस्तथा च साध्यव्यापकत्वादव्यर्थविशेषणत्वादिच्छापद
दयमिति केचित्॰ तथा च यत्रेच्छायामवग्राहकसमवधानं न ज्ञाने तत्र स्वाश्रयज्ञानग्राहकसामग्र्यप्रसिद्ध्या बाधवार
णाय ज्ञानपदमिति भावः॰ वस्तुतस्तु॰ अपिशब्दस्तदाशब्देन योजनीयस्तत्र हेतुमाह॰ तथापीति॰ इच्छाग्राहकेणेच्छा
प्रामाण्यग्रहे पदेपीत्यर्थः॰ यत्रेच्छाज्ञानयोरुभयोरपि प्रामाण्यमगृहीतं तत्रेच्छायास्तत्प्रामाण्ये स्वाश्रयग्राहकासत्त्वे
न बाध इत्यर्थः॰ न चैवमप्यगृहीतज्ञानसमानविषयकेच्छेत्येवास्त्वां प्रामाण्यपदं व्यर्थं॰ किंचेच्छाधावनं तथापि व्यर्थम्
वागृहीतज्ञानप्रामाण्य एव बाधवारणार्थत्वसंभवात्॰ ज्ञानपदस्य ज्ञायमानपरत्वादिति वाच्यं॰ ज्ञानपदस्याज्ञानं
व्यावर्त्यमुचितमितीत्यस्यागृहीतप्रामाण्ययोरिति ज्ञानेच्छे एवं विवक्षिते इत्याद्यस्य दोषस्य निराकरणसंभवादिति॰
इतरे तु॰ ज्ञानपदान्तर्भावेप्यस्तु अप्रसिद्धिरित्यनास्थयानुवर्तते इति विशेषः स्फुरितो भवति॰ तथा च प्रमाणाभावात्पदं ज्ञान

निश्चयाभावस्यान्यथासिद्धत्वादिनापि प्रतिबंधप्रयोजकत्वं विवक्षितं प्रामाण्यसंदेहसतीत्यादिसिद्धान्तेन तत्
दनुसरणापातात्· प्रयोजकत्वस्य तथाप्यखंडनादिति· न· प्रतिबध्यत्वाभिमतनिष्ठकार्यत्वनिरूपककारणतावा
126 वप्रतियोगित्वस्य स्वविषयव्यतिरेकप्रतियोगिविषयकनिश्चयाविघटनद्वाराप्रतिबंधप्रयोजकत्वस्य वा विवक्षि
तत्वात्· न च व्याप्तौ स्वविषयेत्यादिद्वारेत्यन्तप्रवेशे मानाभावः· घटत्वप्रकारको घटधीप्रमात्वज्ञानप्रमात्वबुद्धेरप्र
वर्त्तकतया तत्र व्यभिचारवारकत्वादिति वदन्ति· यत्तु वस्तु· संशयपदं ग्राह्याभिन्नत्वार्थकं तद्व्यतिरेकनिश्चयप्रति
बध्यग्राह्यनिश्चये व्यभिचारवारणाय· एवं च योग्यतापि ग्राह्येत्यादिना [illegible]भिचारवारणे संशयेति व्यर्थमित्यपास्तं·
एतन्मते साधुत्वज्ञानं हेतुरित्यवधेयम्· नन्वित्थमूलं· परतस्त्वव्यवस्थापनेन माध्यमिकमीमांसकोभयनिराकरणं
युगपदिति माध्यमिकमनिरासनत्यत उपन्यस्तमिति भावः· भावत्वं तु तन्त्रस्येति· तथा च ज्ञानपदोपादानाद्बाधि
क्यादिति न्यायात्करणत्वेन प्रमितिनिष्ठधर्मपरं प्रामाण्यपदमिति भावः· व्याप्तिज्ञानस्य करणत्वात्· भावत्वं तु तन्त्रा

याव्यवहितपूर्वलक्षणज्ञानस्मारणप्रवर्तकत्वापत्तिभीत्याप्रवृत्तिविशेषगृहीतप्रामाण्यज्ञानप्रयोजकत्वस्यावि
वक्षणाद्युक्तत्वाच्च॰ यद्वैतदस्वरसादाह॰ तदभाव इति॰ द्वितीयविकल्प इति॰ तदभावेऽभाव इति पदं इत्यर्थः॰ अ
त्र चेति॰ एतच्चोपाधिसंशयाहितव्याप्तिसंशयबोध्यमन्यथेतरथाव्याप्यसंशयवत्प्रतिबंधसंशयस्याप्यप्रतिबंधक
त्वमेवेति॰ इदमुपलक्षणमत्यन्ताभावगर्भव्यभिचारसंशयेमणिवदन्योन्याभावगर्भव्याप्तिधीप्रतिबंधकत्वन्ना
भावगर्भव्यभिचारनिश्चयस्यप्रतियोगिज्ञानत्वेनाजनकतयासंसर्गमर्यादयाभावाव्यभिचारकज्ञाद्यबोधेवाज
नकतयाप्रथमसागमाच्चोपादानेव्यभिचारएवेति॰ व्याप्तिज्ञानेऽव्यभिचारज्ञानइत्याहुः॰ नन्वेवंसंशयोपादान
वैयर्थ्यं॰ अत्रनिर्वह्नित्वसिद्धिप्रतिबध्यायांवह्न्यभावानुमितौवह्निनिश्चयाजन्यायांव्यभिचारवारणायसंशयप
दोपादानमितिप्रतिभाति॰ नचप्रतियोगिज्ञानतयातज्ज्ञानजनकमेवेतिवाच्यं॰ निश्चयत्वेनजनकत्वस्योक्तत्वादिति॰
ननुप्रतिबंधकत्वंयदिकारणीभूताभावप्रतियोगित्वंतदादृष्टान्तासंगतिर्व्याप्तिनिश्चयेनव्याप्तिसंशयव्यतिरेक

॥ अथेति मूलं॰ प्रमाणत्वं चमत्र विविक्षतइतिसंबंधः॰ वक्ष्यमाणेतिमूलं॰ प्रवृत्त्या प्रामाण्यावधारणं तेन ।
च प्रवृत्तिरित्यन्योन्याश्रयो वक्ष्यमाणदूषणं॰ तथा चाथग्रंथेन काप्यसंगतिरिति भावः॰ निश्चयत्वेनेति॰ न ।
127 न्वर्थान्तरं प्रामाण्यनिश्चयानुपयोगे पूर्वपक्षिणे तन्निश्चयकारणत्वमात्रस्योचितप्रदर्शनत्वात्॰ अत्र तार्कि
काः॰ निश्चयत्वेन जनकतोक्तावपि पूर्वपक्षनिराकरणं भवत्येवेति नार्थान्तरं॰ किं चैवं साधूपाध्यायमतस्समर्थ
नं॰ ते हि ग्राह्यव्यभिचारयोर्व्यभिचारवारणाय संशयव्यतिरेकत्वमुपाददते॰ न च ग्राह्यसंदेहेपि विशेषादर्श
नदशायां प्रतिबंधकइति संशयविशेषितेपि व्यभिचारः विशेषादर्शनकालप्रतिबंधकसंशयवारणाया
निश्चितप्रामाण्यस्य सत्त्वाद्व्याप्यकप्रतिबंधकताकसंशयस्योक्तत्वादिति॰ न च निश्चयत्वेन जनकत्वाविवक्षा
यां तत्संभवति नागवकुष्ठिजत्वेन व्यभिचारास्पर्शादिति॰ नन्वप्रामाण्यशंकास्कन्दज्ञानत्वेन प्रयोजकत्वं न तु प्रा
माण्यनिश्चयत्वेन तथा च कथं संगतिरिति॰ न॰ स्वाश्रये सति तच्छास्त्रसिद्धद्वारा घोषपवर्णयिष्यमाणप्रामाण्यसंशा

नन्वर्थनिश्चयोऽप्रामाण्यशंकाशून्यः प्रतिबंधको न वाऽप्रामाण्यसंशये सत्तथेत्वन्यथासिद्धावन्वयव्यतिरेको। किं
च विषयसंशयस्य सामान्यसामग्रीत एव संभवात् एतत्संशयहेतुत्वे मानाभावः। किं चाप्रामाण्यसंशयवदप्रामाण्य
स्यापि संशयहेतुत्वे वैजात्यकल्पनापत्तिः साधारणासाधारणधर्मविप्रतिपत्तिधीहेतुत्वेन त्रैविध्यगणनविरोधा
पत्तिश्चेति। अत्र भ्रमः। प्रामाण्यसंशयाव्यवहितपूर्वक्षणवर्त्तमानघटस्मरणप्रतिबंधेन तत्तृतीयक्षणे घटसंशया
नापत्त्यातिरिक्तसामग्रीकल्पनविभागोपलक्षणता कल्पनानां प्रामाणिकत्वमेव। स्मरणस्य ज्ञानान्नावाच्छंकास्पंदि
तत्वस्यासंभवादित्तिदिक्। ननु मा च गर्त्तसाध्यमतो मूलं स्वस्यापातीति। एवं मात्रपदव्यवच्छेद्यं परतस्त्विन्नमप्रसिद्धमित्य
पि बोध्यम्। अग्राह्येति मूलं। वस्तुतोयज्ज्ञानं प्रमाणं तत्तद्ग्राह्यप्रामाण्यमेवेति परत्वं अप्रमापेक्षये वेत्यप्रमायां प्रा
माण्यग्राहकस्याप्रामाण्यापत्तिरित्यर्थः। स्वग्राह्येति पाठे सर्वं स्वग्राह्यप्रामाण्यमेव मीमांसकमते तथा चैतदपेक्षयाप
रत्वेऽप्रामाण्यप्रसंग इति भावः। न च हेत्वोरिति। अन्यतरान्यतरपदं निर्द्धारितपरमेव। तथा च प्रथमहेतौ द्वितीयहेतुः

128 पदतावच्छेदकोन्यथाद्वितीयहेतौपदंविशेषणमनुपादेयमेवत्यग्निमालोकविरोधापत्तेरिति·वस्तुतस्तुभगवज्ज्ञा
नमात्रवृत्तिप्रामाण्येऽसिद्धिवारणायानन्यासद्वृत्तीतिपदंतदन्यपरमिति·भागासिद्ध्यभावस्यान्यासानन्यासद्वाप
त्तेर्धीप्रामाण्यभेदाभावप्रतिपादनेनालोकवृत्तेवनिरस्तत्वादिति·भागासिद्ध्यभिधानंतुसकलप्रामाण्यानुमिता
वुद्देस्थायामेकदेशाभिप्रायेण·नस्वाश्रयेतिमूलं·यावत्त्वघटितमिदं·अन्यथायोगिज्ञानस्यसर्वप्रामाण्याश्रयतया
बाधापत्तेरिति·अनेनपरमतेनिषेधेपिस्वमतसिद्धयेव्यतिरेकांतरापेक्षामाभूदितिसाध्यांतरमाह·स्वाश्रयेती
ति·स्वाश्रयग्राह्यत्वेपिपरग्राह्यत्वासिद्धसाधनवारणायमात्रपदंपूरणं·ननुतथापिस्वाश्रययोगिज्ञानग्राह्यतया
बाधइति·न·तदन्यस्वाश्रयास्मदादिज्ञानग्राह्यत्वस्यमात्रपदेननिषेध्यत्वात्·नचपूर्वसाध्यसिद्धिरप्येतेनेतितद्वै
यर्थ्यं·विशिष्टाविशिष्टोपाधिभेदेनभेदादिकं·नचज्ञानंगुणइति·ज्ञानप्रामाण्यसंशयाहितसंशयविषयज्ञान
त्वगुणत्वयोर्व्याप्तिवारकतयासार्थकतापदंदृष्टान्तसाधारणैकरूपाभावेनव्यतिरेकितापत्तेरितिस्वपदंश्रा

माण्यपरमेवेतिदिक्. संशयजननादिति. तन्मतेत्वमाप्रावेनकोटिस्मरणधर्मिज्ञानयोरेवसंशयत्वेनसंशय
जननादितियद्यप्यसंगतंतथापिसंशयविशिष्टत्वसंभवादित्यर्थः. प्रामाण्याप्रामाण्यमात्रकोटिकसंशयकोटित्वा
दिति. समुच्चयांतरहेतुसत्वेप्यप्रयोजकंबहुतरमप्यनर्थकमेवेतिविपक्षबाधकस्यावश्यकत्वंहृदिनिधायाह.
अपिरिति. तादृशेति. अत्रकेचित्. रजतमिदमितिनिश्चयाग्रिमक्षणजातकोटिस्मरणस्यसंशयत्वापत्त्याव्यवस्था
येनापरकोटेरगृहीतासंसर्गत्वेसाकांक्षत्वंवाविचारणीयं. एवंचव्यवसायात्मकप्रामाण्यनिश्चयेजागरूकेऽग्रिम
क्षणेप्रामाण्यसंशयोऽनुपपादनीयएव. अविरोधेवाप्रामाण्यनिश्चयेसत्यपिगुरुमसंशयेनसंशयानुपप
त्यानैयायिकव्यवस्थानमसंगतमेवस्यादिति. एवंचाग्रेव्यभिचारप्रदर्शनमप्यसंगतंद्वितीयक्षणेप्रामाण्यसंश
याभावात्. तदातत्संशयेपिचनदोषः. वस्तुगत्याक्षणेज्ञानानन्तरमेवंयस्यार्थस्यसंशयसामग्रीतत्क्षणप्रामाण्यस्या
पक्षत्वादन्यथासिद्ध्यापत्तेः. पक्षसंकोचस्यचप्रागेवयुक्त्यादिनत्वादितिव्यभिचारःशंकानिरासएवेति. तन्मतइतिय

त्तदपि न· धर्म्मत्वविषयत्वेविशिष्टज्ञानतासमूहालंबनव्यवच्छेदाय तथैव व्युत्पादनात् तथा च धर्मत्वाविषयत्वा
न्नान्यथाख्यातिः किं च सतीतिमहिम्नासामानाधिकरण्यं लभ्यते· तेन वैयधिकरण्यसंशयमादाय नार्थव्यभिचारः·
129 यत्र द्वितीये प्रामाण्यसंशयः घटत्वतदभावस्मरणंवत्तृतीये तदुभयार्थस्मरणं केवलज्ञानघटावितिसमूहालंबनं
वातत्रार्थव्यभिचारो वज्रलेप एवेति· अत्र तार्किकाः किं चेत्यादि न तत्प्रामाण्यस्य पदकृत्यत्वात्· यत्तु तैरुक्तं अन्यथास्वरूपा
सिद्ध्यापत्तेरिति· तन्न· समूहालंबनपदे स्वरूपासिद्ध्यभावात् तृतीयदृष्टान्तवह्निसंशयविषयप्रामाण्यत्वेनैव पदकृत्यमि
तिसाधकं तन्मते तदुभयार्थ एव दृष्टान्तो संशय इति· यदपि धर्म्मत्वविषयत्व इत्यादि तदपि नापूर्वस्यापि त्वत्स्वर्गजनकत्व
यागविषयत्वानामगृहीतासंसर्गाणामेकैव यदिस्मृतिस्तदापूर्ववत्वमितिरितिलिखनदर्शनेन धर्म्मत्वादिधर्मान्तर
स्वीकर्त्तृमतेनास्य प्रकारस्य व्युत्पादनादिति· विषयत्वं कोटित्वमिति· नन्वेवमप्यर्थव्यभिचार एव· प्रामाण्यशरीरनि
विष्टतया तस्यापि कोटित्वादिति चेत्· न· तादृशकोटितावच्छेदकपर्याप्त्यधिकरणत्वस्योक्तस्य तत्रासत्त्वात्· प्रामाण्यैवं त्वं

23

तीयक्षणावर्त्तिसंशयविषयार्थे व्यभिचारवारकमुत्तरपदमिति कथं तद्वैयर्थ्यम्· संशयोत्तरप्रत्यक्षस्य विशेष
दर्शनजत्वेन प्रामाण्ये तत्रासंशयेन तस्यापक्षतयासाध्यसत्त्वाद्यद्यप्यंधकारकालीनतदुत्तरप्रत्यक्षविशेषदर्श
नहेतुत्वेन विशेषादर्शनजन्यघटनिश्चयपूर्ववर्त्तितृतीयक्षणे संशये बाधकाभावस्तथापि तत्प्रामाण्यस्यापक्षत्वेनै
वसामंजस्यमिति· यद्वा न हि पूर्वकालीनं संशयमादाय स्वाश्रयावधिकसंशयविषयत्वं भवति· तत्संशयस्य तदृष्ट
त्वादिति· नायमुत्तयमतेति· यद्यपि सकंपप्रवृत्तिजनकधीविषयत्वमुत्तयसिद्धं भवति तथाप्यप्रवृत्तिस्थानीयज्ञान
प्रामाण्ये नागासिद्धिर्योग्यत्वं वावच्छेदकरूपपरिचयज्ञेयमिति भावः· स्वाश्रयानिर्वचनीय इति· न चैवमर्थान्तरम्
स्याभिमतपरतत्त्वस्य तथापि सिद्धेरिति· किं च स्वाश्रयानिर्वचनीयेति न साध्यविशेषणम्· तथा सति स्वव्युत्पादि
तस्वाश्रयानिर्वचनीयप्रामाण्यसंशयजनितार्थसंशयविशेषणरूपनिष्ठतया गुणत्वेन गृहीते व्यभिचाराभावापत्तेः
किंतु साधनविशेषणं तथाच तथात्वतत्तृतीयक्षणवृत्तिस्वाश्रयानिर्वचनीयसंशयकोटित्वादिति हेतौ न व्यभिचारः

विशिष्टपर्याप्तं न केवलेदंडित्वमिव । यद्वेति । यद्यपीदं यथाश्रुतं धर्म्मिणि व्यभिचारि । तथापि विषयत्वं संशयनिरू-
प पकत्वेन स्वेन धर्म्मीसंशयनिरूकोपितु कोटिरेवेति भावः । एवं चेति । प्रामाण्यसंशयात्मकविशेषसामग्र्यनप
130 द्दसंशयविषयत्वादित्यर्थो न यथा विशेषसामग्रीसहितायाः सामान्यसामग्र्या जनकतया तन्मात्रोत्पन्निकत्वस्या
प्रसिद्ध्यापत्तेः तथा च ज्ञानमिति । न च स्थाणुर्न वेत्यत्रैकत्रेत्यादिना सत्त्वऽव्यत्वादिना न वदत्र संशये ज्ञानत्वना नावि
रोधः । विशिष्टवैशिष्ट्येनैव ज्ञानमित्येतन्मतावलंबित्वादिति । अत्र भ्रम इति । न च स्वाश्रयपूर्वसत्त्व इत्येवोच्यतां । अ
स्य हेत्वंतरत्वादिति । न चाप्रामाण्यशंकास्कन्द्यस्मरणेकथं प्रामाण्यसंशयेनापि संशयोऽन्याहितेतस्याप्रतिबंध
कत्वादिति । वस्तुतस्तु अप्रामाण्यशंकास्कन्द्यप्रतिबंधकमित्यत्र प्रकृतप्रामाण्यघटकाधीभावावगाहिसंशयसा
मग्रीसमहितमेव प्रतिबंधकमिति तस्मिन् शंकास्कन्द्येपि न समानविषयसंशयप्रतिबंध इति । परे । अप्रामा
ण्यशंकायोग्यतास्कन्द्यं प्रतिबंधकमिति ताहृशस्मरणे संशयप्रतिबंध इति वदन्ति । परे नैतस्येति । न च स्वाश्रयपूर्वत्व

न चार्थान्तरं प्रामाण्यसंशयतदाहितसंशयान्यतत्कोटिकसर्वसंशयानां स्वाश्रयनिवर्त्तनीयतया तन्निविषयतया·
निवर्त्तितस्यापि ज्ञानधर्मिकसंशयस्य स्वाश्रयनिवर्त्तनीयोग्यतया हेतुसत्त्वादिति· स्वाश्रयावधारितार्थनिष्ठधर्मकोटिकान्य
तद्वत्त्वनिश्चयविरोधिसंशयकोटित्वादित्यर्थ इत्यन्ये· प्रामाण्याप्रामाण्यमात्रकोटिकसंशयकोटित्वादित्यपरे· तादृशद्विमा
त्रकोटिकसंशयकोटित्वादिति हेतुः साध्ये प्रामाण्यपदं तादृशसंशयविषयप्रामाण्यपरं· तथा च समूहालम्बनसंशये हेत्वभावात्
ज्ञानं गुणो न वेति संशये सर्वसत्त्वाच्च व्यभिचार इति भावः· केचित्तु यथोक्तक्रमेणार्थसंशयस्य ज्ञानप्रामाण्यं न परं भवतु वा पर
स्तथापि विरोधिसंशयविषयत्वे हेतुर्विरोधी च स्वाश्रयनिष्ठप्रवृत्तिजनकत्वस्य· न चायं तथा· अत एव न हेतावपि वैयर्थ्यम्·
विरोधार्थबाधकत्वादिति· तदपीति· स्वाश्रयविशेष्यकाप्रामाण्यसंशयजसंशयायोग्यत्वं वा विवक्षितं· वस्तुमात्रस्यैव
प्रामाण्यसंशयजन्यसंशययोग्यत्वादप्रसिद्धिवारणाय स्वाश्रयेत्यादिकमिति न स्वरूपासिद्धिवारक· तया तद्वैयर्थ्यशं
कनीयम्· संदेहत्वेन जनकत्वं विवक्षणीमिति संशयस्य धारावाहिकत्वे विशेषणज्ञानत्वेन पूर्वसंशयजनितं धारा

वाह्निकसंशयानुगमे धर्म्मिज्ञानजनितं द्वितीयसंशयमादाय नासिद्धिः योग्यताच तद्वत्त्वघटकार्थत्वेनेति॥ अ
प्रामाण्यवदितिमूलं॥ पक्षीभूतप्रामाण्यसंशयमादाय नासिद्धिः योग्यताच तद्वत्त्वघटकीभूतकार्यत्वेनेतन्मूलं॥ व्या
।३। प्यविशेष्यत्वमपि बोध्यं॥ ग्राह्यत्वस्य केवलान्वयितयाऽव्यावर्त्तकत्वात्॥ एतेन प्रामाण्यसंशयानुरोधेन x ति॥ अप्रा
माण्यवदितिमूलं॥ पक्षीभूतप्रामाण्यसंशयकोटीभूताप्रामाण्यवदित्यर्थः॥ स्वतोऽवेद्यत्व इति॥ इदमुप x स्वविषयकस
विकल्पकत्वेन प्रत्यासत्तित्वकल्पनेपि न स्वातंत्र्ये वैशिष्ट्यमुपनाययति दोषोपि विशेषादर्शनमेवेतादृशमितिसि
द्धान्तसंक्षेपः॥ अतएवानुमितेर्व्यापकतावच्छेदकप्रकारकत्वनैयत्यात्प्रामाण्याज्ञानेन स्वप्रकाशत्वनिराकरणेन
नद्गुरुनिराकरणेपि मिश्रमते बाधकाभाव॥ नचस्वातंत्र्येण ज्ञानसामग्रीविरहः॥ मनसाचैवमित्यादिनोपनीतस्यापि
स्वातंत्र्येण ज्ञानव्युत्पादनात्प्रत्यक्षसुखादिधीप्रामाण्यपि तथापि बाधकाभावाच्च॥ तच्चस्वातंत्र्येणापि संभवात्॥ किंचैवं
रजतत्वादिजातिरपि नव्यक्तिग्राहकग्राह्या नस्यात्तथासति धर्म्मिज्ञानएव रजतत्वादिज्ञाने संशयानुपपत्तेः॥ यदिच

संशयानुपपत्त्याद्दोषाद्धर्मिज्ञानं न रजतत्वविषयं दोषादिप्रतिबंधकाभावे वा व्यक्तिविशिष्टे वैद्याज्ञातिस्तदेतत्प्रामाण्ये
पित्तत्वं दोषस्य ह्यवित्त्वकस्थिदिति मिश्रमतेस्त्वतस्त्वेन बाधकमित्यपास्तं· एवमाकारवैचित्र्यमनुव्यवसाययोर्बाधावतारा
नवतारकालीनयोरापद्येत विषयवैचित्र्ये आकारवैचित्र्यादर्शनाद्बाधकाभावे सति विषयस्य तन्मते तद्विशेष्यकत्वं बा
धावतारेत्र न तदिति· न चेष्टापत्तिर्निराकारे विवाद इत्याकारविरोधादिति वदंति· आदिपदं तदन्यकेवलान्वयिधर्मपरमि
त्युपाध्यायव्याख्याने केवलान्वयिपरतागौरवं मनसि निधायाह· सामान्यतः सिद्धविषयेति· वस्तुन इति· अलीकविषयत्वेपि न
रुतिरितादमुच्यते नत्विदं वस्तु· अन्यथाख्यातिस्यस्वलिखविरोधाद प्रामाणिकत्वाद्वाप्रकारार्थव्यतिरेकीति· वस्तुतस्त्वन्वयि
हेतुकसिद्ध्याद्यविषयापरमन्वयी अन्यथा विशेष्यत्वस्य केवलान्वयितया प्रमाण्याववर्त्तकत्वेन वज्याद्यघटितमेव विशेष्यात्
न्नित्याद्यपि न्यर्त्तव्यं· तथा चान्वयी निरर्थक एव स्यात्· न चैवं व्यतिरेकि वैयर्थ्यं· ज्ञानविशेषनिष्ठतया तज्ज्ञानस्य प्रवर्त्तकत्वात्· तच्च
न पूर्वानुवृत्तमित्यनुमीयते· केचित्तु· वह्निर्वह्निज्ञानमित्यर्थः· प्रमाविषयः प्रमेत्यर्थः· ज्ञेयत्वादिनेत्यत्र तद्गुणबहुव्रीहिणाह

स्वादिकमेवोक्तमित्यन्वयिवैयर्थ्यं अनुमानोपालंभ इति॰ एतेनानुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमेन वह्निप
रकानुमाने विशेष्येत्यादिनैव सिध्येत् तथा च वस्त्ववृत्तिप्रकारानवच्छिन्नत्वमुद्देश्यं न सिध्येदेव॰ अप्रसिद्धेः॰ न च पक्ष
132 धर्मताबलात्प्रसिद्धिः साध्यतावच्छेदकप्रकारेणैव तथाप्यप्रसिद्धेः॰ तस्याप्रयोगत्वात्॰ अन्यथा वह्नित्वप्रकारकमिदं ज्ञानं
विशेष्यावृत्तिप्रकारानवच्छिन्नमिति व्यतिरेकिणैव पक्षधर्मताबलात्तादृशसाध्यसिद्धोऽन्वयहेतुकान्वयिवैयर्थ्या
पत्तिः॰ वस्तुतस्तु इदं ज्ञानं विशेष्यावृत्तिप्रकारानवच्छिन्नमिति ज्ञानादपि निश्चयप्रवृत्त्यनुपपत्तेर्न तावत्पर्यन्तमुद्
देश्यमप्यस्याप्रामाण्यशंकानिवर्त्तनक्षमत्वात्स्वातंत्र्येण तस्याप्रवर्त्तकत्वादिति निरस्तं॰ अप्रामाण्यनिषेधरू
पस्येति मूलं॰ यद्यपि व्याघातो विरोध इति न तस्य निषेधरूपता॰ तथापि निषेधनरूप्यत इति व्युत्पत्त्या सामानाधि
करण्ये न निर्दिष्टः॰ प्रामाण्यमशक्यत्वाच्चेति॰ ननु परपक्षानुमाने परस्यैव तत्र तथापि सिद्धमेव तत्र आह॰ प्रामाण्यमिति॰ प्रा
माणास्तीति निश्चयस्य प्रतियोगिज्ञानाद्विना अशक्यत्वादिति तावदस्यापि मूलं योजयति॰ सर्वत्रा मतिमूलं॰ यथा

शाब्दस्य सर्वनामसमहिम्ना विशेषप्रतिपादकत्वं तथानुमानेपक्षधर्मताबलादिति दृष्टान्तार्थमिदमिति॰ संशयस्यं
तातिः वस्तुतस्तु प्रथममेव प्रामाण्यज्ञानमितिटीकाफक्किकाः प्रामाण्यानावपरतया योज्येतिमूलार्थः॰ अपूर्वंदेवद
त्तादिधीप्रामाण्यस्य -- पूर्वमज्ञानादनुमानादेवप्रवृत्तिरित्यपि बोध्यं॰ ओवपदं संपातायातं मनत्यानुपपत्तिमात्र
वास्यमित्यपि बोध्यं॰ तदुभययोग्यतेति॰ ननु संशययोग्यतापेक्षया संशयस्य लघुत्वात्तच्छून्यमेवज्ञानं प्रवर्त्तकं॰ ननु तथा
स तत्पक्षनिश्चयव्यतिरेकादेव प्रवृत्तिव्यतिरेकात्प्रामाण्यसंशयो न प्रतिबंधकः स्यादिति वाच्यं॰ उत्कटक्रमेणानविषय
त्तान प्रामाण्यसंशयोत्पत्त्यागिमहणार्थं निश्चयानन्तरं प्रामाण्यसंशयेनाप्रवृत्तौ लाघवेन संशयस्यैव प्रतिबंध
कत्वादिति॰ अत्र वदंति॰ संशयविशिष्टव्यवसायेऽव्यवसायान्तराछंकासत्त्वादपि न प्रवृत्तिरेवं संदेहवत्संशयसामग्र्या
मपि न प्रवृत्तिरित्यन्वयव्यतिरेकाभ्यां योग्यताप्रवृत्तिप्रतिबंधिकेति दिक्॰ न चायमनियमः विज्ञाने नित्यत्वस्य उपपत्ती
तल्लिंगस्य पक्षतावच्छेदकस्य च ज्ञानेन व्यत्तिकारादितिवाच्यं॰ लिंगं न ज्ञासते अनुमितावुपनीतभानानिषेधात् शा

ननित्यत्वेलाघवस्ययद्रूपावछिन्नःपक्षोभासतेपरामर्षेतद्रूपावछिन्नानुमितौविशेषस्यपक्षतावछेदकेनन्यगत्या
133 नियामकत्वमित्याशयेनाह·तथासत्यपीति·वङ्लपत्वादिति·नचाखंडाभावत्वेननवैयर्थ्यं·अप्रामाण्यस्याभावरू
पतयाऽखंडाभावत्वाभावादितिभावः·नचैवमप्रामाण्याभावोनतथापिसिद्धइतिवाच्यं·वह्नित्वप्रकारकानुभव
वह्नित्वाभाववद्विशेष्यकत्वस्यवाप्रामाण्यत्वात्·तदभावसिद्धौतत्सिद्धिपर्य्यवसानात्·एवंतदभाववतितत्प्रका
रकत्वव्यतिरेकःसिद्ध्यन्निसादिमूलमपितत्प्रकारकत्वतदभाववद्विशेष्यकत्वपरतयैवयोजनीयं·नचवह्निप्रत्वद्रू
रूपादेरपिविशेष्यतयातस्यचावह्नितयातदभाववद्विशेष्यकत्वाभावसाध्येनबाधेनतद्वारणायवह्नित्वप्रकार
कपदं·तथाचतत्प्रकारावछेदेनतदभाववद्विशेष्यकंनेतिसाध्यार्थइतिवाच्यं·अत्यंताभावस्याव्याप्यवृत्तित्वे
नअंशावछेदेनतत्रापिसाध्यसत्वात्सर्वावछेदेनसाध्यस्याविवक्षितत्वात्·एवंचविशेष्यवतिविशिष्टाभावस्यवि
शेषणाभावपर्य्यवसन्नत्वनियमादित्यग्रिमग्रंथोविरुध्यतइतिनशंकनीयं·तत्रह्यप्रतियोगिविशिष्टाभावइ

त्पर्य्यादिति॰ वह्नौ वह्नित्वप्रकारकनिश्चय इतिपदीयपदञ्च यस्यार्थः अन्यथा भ्रमनिर्विकल्पकसंशयपदस्तताप्रसक्तौ
बाधस्यागासिद्ध्यापत्तेरिति॰ समूहालंबने तत इति॰ न चैवं दाहसमर्थविषयकेति व्यर्थं॰ भ्रमस्य निश्चयपदेनैव वारणा
दिति वाच्यं॰ वह्नित्ववह्निवृत्तीदं त्वारोपे व्यभिचारस्य संभवेन तद्वारणार्थत्वादिति॰ वस्तुत इति॰ फलज्ञाने व्यभिचारणा
य विशेषणोपादानमिति पूर्वस्माद्भेदः॰ न च भ्रमेपि दाहसामर्थ्यवैशिष्ट्यमिति वैशिष्ट्यमनुयोगित्वमित्यर्थः॰ पीतः शं
ख इत्यस्यापीति॰ ननु वह्निगुंजापुंजयोरिमौ वह्नी इति भ्रमे व्यभिचार इदं चास्य विरुद्धस्यास्फुरणेपि तदभावा
गोचरत्वात्॰ नाप्येकधर्म्मिकभावाभावगोचरं ज्ञानत्वं संशयत्वं॰ तरुः संयोगवांस्तदभाववांश्चेति अस्य संशयत्वापत्ते
रिति॰ तथा च यत्र कोट्योर्विरोधः संसर्गः स संशय इति॰ अत्र तार्किकाः विरुद्धप्रकारकत्वं निश्चयपदार्थस्तथा च विरो
धनिरूपकतया सिद्धिवारकत्वेन वह्नित्वपदं सार्थकं॰ तथा च तादृशप्रयत्नहेतुवह्नित्वविरुद्धाप्रकारकत्वादिति
पर्यवसन्नं॰ यत्त्विति॰ एतेन गुंजापुंजयोर्वह्नी इमौ इति भ्रमवारणाय दाहसमर्थमात्रविषयकत्वापादेयावच्छेदकत्वे वह्नि

त्वप्रकारकेति व्यर्थमित्यपास्तं॰ विरुद्धप्रकारकत्वेन तद्यवच्छेदात्॰ अवह्निह्रदत्वीदंतारव्यप्रकारोनेति विवक्षितं॰
134 तथा चानुमा वह्निरित्यादाव वह्निह्रत्त्विप्रकारकोनेत्यत्र न व्यभिचारः॰ न च दोषाद्यज्ञावह्निह्रत्वीदंत्यारोपस्तत्र व्य
भिचारो दोषासमवधाने वह्निह्रत्वीदत्वप्रकारकोनेति नदर्थादित्यप्याहुः॰ न च विपरीतसमूहालंबने कथं व्य
भिचारोदाहृत्या पंचशसाध्यसत्वादितिवाच्यं॰ अंशावच्छेदेन तदनुपादानात्॰ अन्यथा विशेषणविशिष्टस्यसाध्यस्य
भावत्वेनत्वप्रसिध्यंगतापत्तेरिति॰ निश्चयपदं चेति॰ इदमुपलक्षणं निश्चयपदोपादानं संशयव्यावृत्तसाध्यसिद्ध
ये॰ वस्तुतो ज्ञानत्वमेव हेतुरित्यप्याहुः॰ ननुमानांतरादन्नेदसिद्धिर्नविष्यतीत्यत आह॰ अमुष्टेति॰ तथा च प्रवर्त्त
कत्वमेवास्तु विशेषणं॰ न च प्रमुष्टेदंताकमपि प्रवर्त्तकं येन दारुस्यादिकमर्थवस्यादिति भावः॰ पदपाति॰ संशयव्या
वृत्तमपि तेन साध्यं न वति॰ अन्यथा तत्साधारणज्ञानस्य प्रवर्त्तकत्वे प्रामाण्यानुमानवैयर्थ्यापत्तेः॰ तथा च वक्तौत्तसंश
यो निश्चयप्रकारताविशिष्टवह्नित्वाभाववत्येवेति न संशयसाधारण्यं॰ एवं च वक्तोज्जलमितिज्ञाने व्यभिचारः॰ तत्र

हि समभिव्याहारमहिम्ना तदेवज्ञानं स्वपदवाच्यं। तथा च तत्कालीनपुरुषज्ञानं प्रकारीभूतवह्नित्वाप्रसिद्ध्या
तदन्तावघटितसाध्याप्रसिद्ध्या व्यभिचारवारणाय वह्नित्वप्रकारकेति। एवं च तत्संशयेतदर्थमेव च निश्चयपद
मपि बोध्यमिति भावः। संक्षेपइति। न च निश्चयप्रकारताविशिष्टत्वं च निश्चयप्रकारतायां विशेषणत्वेन तत्का
लेति विशेषणमन्तरेणापि निश्चयविद्यमानतालाभात्तत्प्रसिद्धिर्विशेषणवैयर्थ्यमेवेति। किं च संशयजनककौ
टिस्मरणरूपनिश्चयविद्यमानतया कथमप्रसिद्धिरिति वाच्यं। साध्यविशेषणप्रवेशेन हेतुविशेषणसार्थ
कतानौचित्ये निश्चयपदोपादानेप्यप्रामाण्यशंकाकलंकितनिश्चयसाधारण्ये साध्यस्य विशेषणकोटिस्मरण
संशयसाध्यसत्त्वे परथा ऽप्रसिद्धौ तात्पर्यादिति। किं च वह्निगुंजयोर्गुंजावह्नी इति भ्रमे साध्यमेवेति तद्वारकवैय
र्थ्यं शीतत्वादिग्रंथत्वादिग्रंथेन तथा साध्यव्युत्पादनान्न चांशे साध्यविशेषणत्वे साध्यस्य विशिष्टस्य तावत्वेत
त्प्रसिद्ध्यंगतापत्तिः न हि इदं तेशाइति साध्यविशेषणमपि उतदंशमादाय साध्यमित्यत्र तात्पर्यादिति। अत्रेति।

अत एव वक्ष्यते । अप्रामाण्यसमर्थप्रवृत्तिजनकत्वाभावयोर्व्याप्तिग्रह इति । न च गुंजाविशेष्यकवह्नित्वप्रका-
रकत्वाद्बोधद्वितीयहेतावनुक्तो वह्निरित्यत्र वह्निविशेष्यके तत्रानुमत्वार्थिप्रवृत्ते के ऽवह्निवृत्तिप्रकारको नेत्य-
135 त्र साध्ये प्रथमहेतौ व्यभिचार इति वाच्यं । साक्षात्कारित्वविवक्षायां प्रथमस्य दाहार्थिदाहसमर्थविषयकप्रयत्नज-
नकत्वविवक्षया द्वितीयस्य निरस्तत्वादिति भावः । मम तु प्रतिभाति । विशेष्यवृत्तिविरुद्धप्रकारकधीत्वे तात्पर्यं । ननु साध्य-
प्रसिद्धिरिति । व्यतिरेकिणि साध्याभावज्ञानं तत्त्वेन वाज्ञाप्येत तदाभासोद्देशे साध्यप्रसिद्धिरावश्यकीति भावः । येन रू-
पेणेति । ननु सुखाभावत्वेन दुःखस्य दुःखत्वेन सुखाभावस्य वाऽर्वज्ञानात्कथं प्रथमं सुखाभावत्वप्रकारकदुःखानुमि-
तिः स्यात् तदुक्तं न स्याद्दुःखविशेषणिकानुमितिरिति । न प्रथमं दुःखविशेषणिकानुमितौ मानाभावात् । तद्विशेष्यक-
ज्ञानस्य चानयाकल्पितसामग्र्याभावात् अत एव यन्निष्ठात्यन्ताभावप्रतियोगिप्रमेयत्वं तद्वृत्तिसाधनमिति व्याप्तिज्ञा-
ने प्रमेयत्वप्रकारिकैव प्रतीतिरस्तु नु नवकलहेनायचोपनीतसामग्र्या एव नियामकत्वादिति । वस्तुत इति । यदभावोऽगृह

तद्वत्त्वयोऽभावोयस्येति बहुव्रीहिणा हेतुमत्त्वविरोधी हेत्वत्यंताभावो हेत्वाश्रयान्योन्याभावश्चोक्त इति ध्येयम्
एवं च स इत्यस्य तदभाववत्त्वपर्यस्तत्या च तादात्म्याभावको हि तदत्यंताभावस्तदात्म्यान्योन्याभावश्च सिध्यतीति भावः॥ ति
प्यावयदभावव्यापकतयाऽभावोगृहीतस्तदभावेन हेतुनासमसिध्यति। न वय व्यापकतयेसत्त्वमूलोक नियामकोऽभाव
प्रवेशोनलाघवं। तत्राप्यभावपदद्वयप्रवेशादियानेवत्तेदस्तत्रान्योन्यात्यंताभावसिद्धित्वं नैककार्यतावच्छेकमत्र चै
कमेव तन्नियामकं चैकमेवेति वदंति। तादात्म्येति। अत्र तादात्म्यं न पृथिवीत्वादिसहप्रयोगानुपपत्तेः किं तु भेदापरना
माधर्मविशेष इत्युपाध्यायस्तत्र तत्त्वं। तद्भिनाखंडोपाधिरूपं तथानुपगमात्। नापि सखंडोपाधिरूपं तस्यानिर्वचनात्तत्रापि
सहप्रयोगानुपपत्तेश्च। यावत्यन्योन्याभावप्रतियोगितावच्छेदकमानलघुधर्मः सत्र द्वौ धर्मौ लघू तत्र द्वयोतादात्म्यत्वेपि
द्वत्यभावद्वयाद्यायसंक्षेपः वह्नित्ववह्निविशेष्यकमितीति। तेन न न्वमत्वेनसिद्धसाधनं। एवं हेतौ वह्नित्वविषयतया स्वरूपा
सिद्धिवारणायसत्यंते विशेष्यत्वं। सविषयत्वं तु यथाश्रुतमेव। जन्मांतरीयेति। विषयांशे संस्कारजनेरपेक्षांपूर्वापेरूपावि

शेषः वस्तुतस्तु विशेष्यत्वं प्रकारत्वं तत्सर्वांशज्ञानमेव विषयः प्रकारो वेति मनसा वह्नौ विशेष्यत्वे गृहीतेनुमितिसाम
136 ग्रीबलवत्वेन प्रकारार्थव्यतिरेकानुपपद्यते· तथा च पक्षपरामर्शादिवेन तत्रानुमितिरितरत्र मानसज्ञानमिति· यत्तु· अप्र
वव्यक्तिप्रामाण्यस्मरणाभावादभावानुमानपूर्वकतानियम इति· तन्न· एतज्ज्ञानविशेष्यत्वमेव तद्वृत्ति एतन्निष्ठप्र
कारत्वनिरूपकत्वादित्यनुमानसंभवात्तथापि तदभावसाध्यकानुमानपूर्वता· मानससामग्रीनैरपेक्ष्यमात्रेतात्प
र्यादिति दिक्· नन्वेवं प्रथमत एव प्रामाण्यमनुमीयतां अभावानुमानेन प्रामाण्यरूपसाध्यप्रसिद्ध्यसंभवेन प्रकारान्त
रेणैव साध्यप्रसिद्धेरिष्टत्वात्· न चाप्रामाण्याभावानुमानस्याप्यप्रामाण्यशंकानिवर्तकतयाभावानुमानवैयर्थ्यं·
तथापि तदनुमानपूर्वकं प्रामाण्यानुमानं व्यर्थमेव स्यात्· किं वाप्रामाण्याभावलिंगेन प्रामाण्यमनुमीयतां नहि लिंगवि
शेषाधीनं तज्ज्ञानमुपयोगीति नियम इति· न वा तत्रैतद्व्याप्यमिति· तद्धेतोरेतत्प्रामाण्यव्याप्यत्वप्रतिसंधाने देवाप्रामाण्या
भावानुमितौ प्रामाण्यानुमितेः संभवादिति· घटवात्त्वन्तया नासाधारण्यमप्रामाण्याभाववज्ज्ञानत्वस्य साध्यतया तस्यास

परत्वादितिपरिहारेपिनिर्विकल्पकोपेक्षाज्ञानमपरत्वंतदवस्थमेवेतिदिक् । प्रयत्नोत्पत्तौकथंनयुगपदुपस्थितिः । ने
च्छासामग्रीबलवत्वादग्रिमक्षणेनुव्यवसायानुपपत्तिः ४ अन्यथातदस्वीकर्तॄणामितिः । नचेष्टसाधनताज्ञानाग्रि
मक्षणेनुव्यवसायेग्रिमक्षणेसंस्कारेच्छयोर्युगपदुत्पत्तौउपादानप्रत्यक्षाग्रिमक्षणे ४ पूर्वक्षणोत्पन्नसिद्धत्वज्ञानेनप्र
तिबंधादिच्छानुत्पत्तेः । एवमुपादानप्रत्यक्षप्रयत्नयोरपिहेतुत्वंसुगमं । प्रयत्नोत्पत्त्यनंतरमप्युपादानप्रत्यक्षप्रयत्नयोर
नयोरपियुगपदनुव्यवसायसंभवात् । नचप्रवृत्तिप्रत्यक्षत्वरूपविशेषणधीविरहात्पुनरप्यनुपपत्तिः । नचोपादा
नप्रत्यक्षतयोरुपनीतयोर्भानमितिवाच्यं । अनेवंप्रकारेपिकार्यकारणभावग्रहात् इतिवाच्यं । लाघवेनविशेषणवि
षयत्वेनजनकतयासंस्कारस्यतथाविधस्यसत्वात् । प्रवृत्तिच्छोत्पत्त्यनंतरमुपादानप्रत्यक्षंज्ञानानुव्यवसायस्यैक
मेवोपेयतामितिचेन्न तन्न । अंतस्तथाभावेपिबहिरिन्द्रियप्रणालीविरहादिति । किंचानुपादानप्रत्यक्षंज्ञानानुव्यवसायस्यैव
नुपपत्त्याज्ञानमनुमानोपस्थितमेवास्तु किंतयाप्रत्यासत्येति । अत्रगुरवः इच्छाप्रयत्नकारणभावधीरेवमप्यनुपपा

137 ऽपि तैव । तथा हि । इच्छोपादानप्रत्यक्षप्रयत्नानां क्रमे इच्छाविरहः । अथोपादानप्रत्यक्षमपेक्ष्येच्छानुव्यवसायः । प्रय
त्नस्तूपादानप्रत्यक्षं विनाशात्तु प्रयत्न इति साधकत्वं न सामान्यासत्तिनो विरुद्धेति रिति । न चेच्छोत्पत्त्यग्रिमक्षणजातप्र
यत्नाग्रिमक्षणे कथं नेच्छाप्रयत्नयोर्युगपदुपस्थितिरिति वाच्यं । तदानीं विशेषणधीविरहात्तु वलाघवेन विशेषण
विषयकत्वेन जनकताप्रत्यासत्तिज्ञायामपि तज्जनकजन्यत्वापत्तेस्तत्रास्मरणकल्पनापाताद्व्यवस्थापितं च स्मरणं नि
यतं प्रत्यासत्तिज्ञापकं वमिति । एवं चोपादानप्रत्यक्षकारणत्वकल्पनानुपपत्तिरपि सामान्यासत्तौ मानमिति दिक् । अनुमा
नावतारो व्याप्तिधीविलंबविलंबितोनुमानआलोकनं तैव निरस्त इति दिक् । घटादाविति । ननु घटेपि कथं तदुप
यनिश्चयनियमो निर्विषयत्वादीनां लिंगानां भिन्नव्याप्तिकत्वेन तन्निश्चयसामग्रीकत्वान्न वा निर्विकल्पकत्वस्योपा
स्थितिनियमो मानाभावात्तथा च साध्यवत्त्वानिर्णयादेव नासाधारणमिति । यद्यदाहेत्यादि व्यर्थं तदपि न । अखंड
नावेयप्याप्तेः । किं च समायो व्यभिचारः । न च तदाऽप्रामाण्यासावानिश्चये कथं व्यभिचार इति वाच्यं । असाधारण

शंकाद्वितीयश्यामाणपविशेषणकानुमान एवेति तत्र व्यभिचारज्ञाने बाधकाभावात्. न च प्रथमानुमान एव
कथं न शंकेति वाच्यं. साध्याप्रसिद्धेः. व्यभिचारनिश्चयस्तत्रापि साध्यव्यतिरेकस्य निश्चितत्वादत एव निश्चयत्वम
पि सार्थकमिति. न. व्यतिरेके व्यभिचारेणासाधारणत्वाभावात्. व्यभिचारस्य प्रमायामेव. व्यर्थत्वमप्येतदेव यद्वा
इत्यादिनापि व्यभिचारवारणमिति तार्किकाः. परे इति मूलं. पृथिव्यां पृथिवी जलं वेति संशये व्यभिचारवारणा
य गंधसमानाधिकरणेति. गगनत्वमिति ज्ञाने गगनप्रकारके व्यभिचारवारणाय गंधसमानाधिकरणप्रकार
केति. तथा च गंधसमानाधिकरणः प्रकारस्ततो धर्मः सामानाधिकरण्येन यस्याः सा विषयता गंधसमानाधि
करणप्रकारिका विवक्षिता. तथा च गंधसमानाधिकरणप्रकारसमानाधिकरणत्वं विषयतायां पर्यवस्यतीति
न नोक्तव्यभिचारः. न चैवं गंधसमानाधिकरणत्वमात्रमेव विषयताविशेषणमस्तु लाघवादिति वाच्यं. प्रका
रत्वविशेषणतया गंधसमानाधिकरणत्वस्य विषयतायामविशेषणत्वेन व्यर्थत्वानवकाशात्. न चासमानाधिक

रणगगनप्रकारतया गगनत्वमित्यत्र कथं व्यभिचारः । हेतावसामानाधिकरण्यस्य तदनधिकरणाधिकर
णत्वपरत्वात् । साध्ये तदधिकरणानधिकरणत्वपरत्वात् । न चायं गगनवान् पाकजरूपवांश्चेति ज्ञाने घटविशे
138 ष्यके तथापि व्यभिचारः साधिकरणमात्रप्रकारकत्वे गंधसमानाधिकरणत्वादेस्तात्पर्यादिति । मात्रपदान
र्भावेण गंधसमानाधिकरणमात्रे तस्य गंधासमानाधिकरणत्वादेरपरस्य वकारणेऽपूर्वसाधनमात्रप
दार्थविवेचनेन व्यर्थविशेष्यकत्वं तत्यागे विशेषणमात्रोपादाने हेत्वोरविशेष इति प्रांचः । उपाध्यायास्तु
संशयव्यावृत्तसाध्यत्वाभावस्य साध्ये प्रकारत्वसमानाधिकरणत्वाभ्यां पृथिवीत्वासमानाधिकरणप्रकाराव
छिन्नत्वाभावो विवक्षितः । तथा च न तत्समानाधिकरणानवात तत्प्रकारिकाया विषयता सा विवक्षिता । एवं जल
विशेष्यके पृथिवीस्मरणे व्यभिचारवारणाय गंधसमानाधिकरणेति । तथा च गंधसमानाधिकरणः प्रकारस्त
तः सामानाधिकरण्येन यत्रेति न व्यभिचारः पृथिवीविशेष्यकजलत्वभ्रमवारणाय गंधासमानाधिकरणेति । अ

समानाधिकरणत्वस्य साध्ये तदनधिकरणाधिकरणत्वार्थतया हेतौ तदधिकरणानधिकरणत्वार्थतया वा
व्यभिचारेण गगनत्वमित्यत्रेत्यवधेयं॥ अत्र घटो गंधवान्वेति विरोधभ्रमसमयकसंशयव्यवच्छेदस्तथापि नैव
तिप्रतिभाति॥ ननु प्रकारभेदेन विषयताभेदात् पृथिवीत्वमात्रप्रकारकविषयतामादाय शीनात्पृथिवीत्वनुभवे गं
धासमानाधिकरणत्वादिहेतुसत्त्वाद्व्यभिचार इत्यत आह शीतेतिमूलं॥ तथाच पृथिव्यंशे साध्यमेव शीनत्वांशे
हेतुरेव नेतिभावः॥ वस्तुतस्तु विशेष्यभेदेन विषयताभेदो न प्रकारभेदेनेतिहेत्वभावान्न व्यभिचार इत्याह॥ विशे
ष्येतिमूलं॥ मनसा चैवमितिमूले ज्ञानजन्यज्ञानत्वान्नपरतस्त्वहानिरितियुक्तः पाठः॥ ग्राह्यत्वादिति ज्ञानत्वादित्यस्य
स्थाने प्रामादिक इत्यवधेयम्॥ पृथिवीत्यनुभव इति॥ तथाच पृथिवीत्येवानुभवः पक्षो न तु शीत्यौ तेदिगर्वितोपी
तिभावः॥ विपक्षबाधकाभावेनाग्रहादिति॥ न च शाब्दं यत्र व्याप्तिज्ञानं निरूपधित्वं वा यच्च विपक्षबाधकं तच्चेवज्ञामा
एप्रधीरितिवाच्यं॥ यद्याप्यवतीत्याघाकरोक्त विपक्षबाधकविरोधस्य तथाप्यनुसारात्॥ अत एवास्वरसादाह॥

किंचेति॰ इत्यादीति॰ प्रामाण्यसंशयएवकथंस्यात्तद्वत्त्वनिश्चयनिवर्त्यत्वात्तद्वत्त्वपर्यवसन्नप्रामाण्यसंशयस्ये
त्यर्थः॰ अनुभवंदृष्टंचेति॰ ननुप्रतिबंधकविशेषदर्शनेकथंसंशयः॰ नचस्वारसिकसंशयत्वंप्रतिबध्यतावच्छेदकं
139 गौरवादिति॰ न॰ उत्पन्नेपिपरामर्शेविरोधिप्रमाणसत्त्वदशायांकयामुरुर्शमनुमितौविलंबात् इत्याचार्यग्रंथदर्श
नेनानुभवादेवदृष्टत्वात्प्रतिबंधकतावच्छेदकत्वस्यावश्यकत्वादिति॰ अपितुप्रामाण्यादर्शनादिति॰ नन्वेवंतुरी
योपिसंशयःस्यादितिसमानासाधारणधर्मदर्शनविप्रतिपत्तिजन्मानएवसंशयाइतिव्याहन्येतेतिसर्वोपिसं
शयोविशेषादर्शनमूलकएवेति॰ न॰ विभागस्योपलक्षणत्वादुभयसंशयत्विन्नसंशयत्वस्यसमानधर्मजपदार्थ
त्वाद्धा॰ परामर्शसत्त्वपिसंशयेनविवक्षायाआवश्यकत्वादिति॰ तार्किकास्तु॰ नसंशयोत्तरज्ञानमात्रेविशेषदर्शनंहे
तुरंधकारेतदनंतरंतेजोमात्रेणैवप्रत्यक्षात्॰ नचांतराव्याप्यधीकल्पधीकल्पनं॰ नवातत्त्वानेप्रामाण्यसंशयःप्रवृत्ति
सामग्र्याबलवत्त्वेनप्रवृत्तेरेवोत्पत्तेः॰ नचसंशयेनायोग्यंज्ञानंकथंप्रवृत्तिजनकं॰ गृहीतप्रामाण्यधीसमानविषयत्व

नयोग्यतासंपादनाय तच्चोपादानप्रत्यक्षविलंबेन प्रवृत्तिविलंबस्तत्र द्वितीयेपि प्रामाण्यसंशयेऽनुत्पन्नावइति· यदुक्तं·
प्रामाण्यग्रहध्रौव्यं तत्प्रामाण्यग्रहकार्यकारित्वध्रौव्यपरतया योजनीयमिति· समानप्रकारकसंशयत्वस्य प्रतिबध्यता
वच्छेदकत्वाद् घटत्वनिश्चयानंतरं प्रामाण्यसंशय इति· तथाहि· इदमुपलक्षणं· ज्ञानत्वं प्रमात्वव्याप्यमित्यनुमितौ गु
रुमते विषयत्वं सद्विषयत्वव्याप्यमित्यनुमितौ न्यायनये प्रामाण्यव्याप्यस्य न संशय इत्यत्रैवानुमितौ संशयाभावोयं
यत्रदत्तिमत इति तार्किका इति दिक्· प्रामाण्यधीप्रवर्त्तकत्वमुपेत्याह· गरितीति मूलं· स्वत इत्यस्य विवरणं ज्ञानसाम
ग्रीमात्रादिति मूलं· तन्नत्यत्व इति मूलं· नच वैयधिकरण्यं· प्रमात्वं यदि ज्ञानसामग्रीमात्रप्रयोज्यं तर्हि स्यादप्रमायां तर्हि स्या
दप्रमात्ववदिति तात्पर्यात्· दृष्टांत आपादकासिद्धिं शंकते ज्ञानसामग्र्यामिति मूलं· तां विनेतीति उपाध्यायास्तु· सामान्य
सामग्रीसत्त्वे यद्व्यतिरेकेण कार्यव्यतिरेकस्तद्विशेषकार्यप्रयोजकमित्येवं न कार्यविशेषापच्या सामग्र्योर्भेदाभावादिति
भाव इत्याहुः· तार्किकास्तु· प्रमात्वव्यापकधर्मावच्छिन्नकार्यतानिरूपितकारणताकसकलसद्भावे यदभावात्सामा

न्यकार्याभावो विशेषकार्याभावो वा तद्विशेषस्य फल एव तद्विशेषकारणताग्रहः स्यादिति· यद्वा· एकविशेषस्य
लेऽपरविशेषानुत्पत्त्या विशेषसामग्रीकल्पनं न तु यावद्विशेषानुत्पत्त्येति यावद्विशेषविनिर्मुक्तसामान्यानुत्पत्ते
140 रिति· अत एवात्रेति· साध्याभावप्रमा हि बाधो न च साध्याप्रसिद्धौ सा· न च ज्ञानाजनकं प्रसिद्धं· योगिज्ञानस्य विषय
जन्यत्वमते तस्याप्रसिद्धेः तदुक्तमप्रसिद्धेरिति· ज्ञानहेत्वजन्यत्वं साध्याभाववत्त्वेन बाधः· जन्यत्वविशेषितं साध्या
भाववत्त्वं साध्याभावव्याप्यतया विरुद्धमित्यपि प्राहुः· उपाध्यायास्तु· वस्तुगत्या ज्ञानहेतुभिन्नहेतुजत्वे बाधो न या
च विरोधोऽस्य वस्तुगर्भत्वाद्विरोधस्य त्वभ्युपगमगर्भत्वात् पूर्वाभ्युपगमविपरीताभ्युपगमात्मकत्वात् प्रतिज्ञाविरोधस्या
न्तरं चाभ्युपगमगर्भमिति तत्र प्रतिज्ञाविरोध इति मूलं योजयन्ति· व्यर्थेतीति· हेत्वजन्यत्वस्यैव सम्पत्तेः साध्ये व्यर्थ
त्वमित्यपि बोध्यं· ज्ञानत्वाभिप्रायेणेति मूलं· तथा च जातेर्नित्यत्वेनापार्थकमित्यर्थः· यत्तु साध्याप्रसिद्ध्या संशयघ
टितपक्षताविरहादाश्रयासिद्धिरिति· तन्न· पक्षताऽप्रसिद्ध्या तदभावाप्रसिद्ध्या आश्रयासिद्ध्यभावादिति· व्योमादि

तीति॰ लघुत्वं च धर्मविशेषणं॰ तेन न घटत्वसमनियतकंबुग्रीवादिमत्त्वे प्रसंगः॰ नन्वेवं लाघवेन सत्त्वैव कार्यज
न्यतावच्छेदिकास्यात्तज्जन्यता॰ उपाधित्वेन गुरुत्वादिति चेत्॰ न॰ एतन्मते इष्टापत्तेः॰ यदवच्छेदेन हीति॰ यावदाव
द्दवच्छेदकं नियम्यतायामतिसंगं क्रमवास्तामिति तं प्रति अनतिप्रसक्तमेवावच्छेदकमिति तु न रमप्रसिद्धमेवेति॰
यावतद्रूपावच्छेदकत्वे यावतः सत्त्वं नियम्यमित्येवास्तु॰ न चाग्रे सत्त्वं न कारणनियम्यमिति दोषः॰ आद्यदूषणानियम्यं
सत्त्वमादाय समाहितसंगत्वादिति॰ यावदर्थमंतर्भाव्यसिद्धांते - - - वतार इति भावः॰ अनित्यप्रमेति मूलं॰ न च
प्रागभावव्यक्तिभेदेनार्थांतरं भावत्वेन विशेषणादिति॰ ननु प्रमापदेन सर्वांशे प्रमा विवक्षितेत्यत आह कारणेति
मूलं॰ जन्यत्वविशेषणावैयर्थ्यादिति॰ यद्यपि विशिष्टाभावरूपव्यतिरेकेन वैयर्थ्यं तथापि साध्यस्यानित्यसाधारणत्वे
विजातीयकार्यत्वादित्यत्र कार्यपदवैयर्थ्यापत्तेः॰ न च जन्यत्वरूपव्यतिरेक इत्यस्य विरोधः॰ रूप्यते निरूप्यते॰ नेने
तिजन्यत्वरूपपदेन विशिष्टव्यतिरेकस्यैवाभिधानादिति भावः॰ अचाक्षुरिति॰ यद्यपि अवैजात्यमाचमापाद्यं ताव

तएवानिष्टत्वात्· तथापिव्यर्थविशेषणतासाध्येनभवत्येवेतिव्यभिचारवारणायतदुपात्तं· अतिप्रसक्तमि
ति मूलं· आत्माद्याविति शेषः आत्माश्रयश्चेत्यपि बोध्यं· यद्यपियथार्थपरामर्शादिकमनुमितिप्रमात्वनियाम
कं भवति तथापियथाऽप्रमामात्रेनुगतहेतुत्वाभावेपिनाकस्मिकत्वं तथोक्तेपीति भावः· एवमितिमूलं· यद्यप्यथ
त्वादिवादिनं तटस्थं प्रतिनायमपियोगस्तथापिमीमांसकं प्रत्येवेतदिति ध्येयम्· पित्रोत्कर्षादन्वयाद्यनुविधा
नाच्च· तस्य हेतुत्वं प्रसाध्य तटस्थमीमांसकावुभावपि प्रतीत्यन्ते· एतेनान्वयव्यतिरेकादिप्रमाणोपदर्शनेन प्र
तिबंदिमात्रं यद्यपि न भवति तथाप्युपेत्याह· प्रतिबंदिमात्रस्येति· नियमस्येति· हेतुहेतुमद्भाव इति· शेषनिय
मत इति शेषः पूरणीयः क्वचिद्यक्तिनियमस्य कार्यकारणत्वे व्याप्तत्वेच न विरोध इति भावः· पित्राद्यभावादित इति
मूलं· नच पित्राभावहेतुत्व एव मानाभावः नैयायिकमते गुणेन दोषाभावस्यान्यथासिद्धेरिति वाच्यं· भ्रमप्रतिबं
धेन भूयोवयवेंद्रियसन्निकर्षसत्वेपि पीतभ्रमोत्पत्त्याप्रमानुत्पत्त्या च दोषाभावस्यापि हेतुत्वावधारणात्· नच

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

त्वमसामग्र्येव तत्र प्रतिबंधिकाधर्मिज्ञानसमये तत्सामग्र्यसत्त्वेऽप्येतत्प्रमानुत्पत्तेरिति· वा रुषतिमूलं· वाहुं
षपदं रजतपदं च कार्यवैजात्यात्कारणवैजात्यमावश्यकमिति विपक्षे बाधकसूचनाय· अन्यत्रेत्यादीति· नन्वत्र
न्यत्रेत्यादेरवश्यकल्पनीयेत्याद्यर्थकत्वमुत्पादितमेव· तथा च रासभः कथं नान्यथासिद्धः यथाश्रुतेप्यन्यथासिद्धे
कारणताकारणतावच्छेदकत्वेनात्यनादरेपि नान्यथासिद्धो ज्ञात्यनादारस्तथा चान्यत्र तज्जातीयेनान्यथासिद्धिः
स्यादेवेति· अत्र तार्किकाः कारणतायाः साजात्यगर्भत्वमावश्यकमन्यथासिद्धः साजात्यघटितत्वे कारणतायाश्चाव
श्यकत्वस्यैव नस्यादितिदिक्· अन्ये तु यदि व्यक्त्योर्नियमः कार्यकारणभावस्तदाऽपूर्वव्यक्तेर्ज्ञाने क्वचिदपि न प्रवर्तेत·
न चान्यज्ञानादेवान्यत्र प्रवर्त्तेत तज्जातीयत्वात्तत्राह· व्यभिचारादिति· कार्यस्य प्रवृत्तेरन्वयव्यभिचारात्· न ह्यन्यदंडा
दिविषयज्ञानेनान्यत्र वेमादौ वर्त्ति प्रवृत्तिः यदि च स्यात्तदातिप्रसंगो घटज्ञानात्पटे प्रवृत्त्यापत्तेरिति) किंचेति· इदमु
पलक्षणं· नाविवेमन्त्वतपटयोरपि कारणत्वं किमापादितं· स्वरूपयोग्यत्वं फलोपधानं वा· नाद्य इष्टापत्तेः अंत्यापि

न। तच्चास्य प्रयोजकत्वे नायुक्तत्वादित्यपि दृष्टव्यं। तथा चाकस्मिकतापत्त्या कारणवैशिष्ट्यं चेत्कार्यवैशिष्ट्यप्रयो
142 जकं तदा नियतपूर्ववर्त्तितावच्छेदकरूपवत्त्वमेव कारणत्वमुच्यतां। न च तदेव ग्राह्यं ग्रा●हकं च कथं स्यात् व्याप्तौ
व्याप्यत्वासिद्धिरन्यथा धर्मावच्छेदकप्रवेशावश्यकत्वे यथावच्छिन्नानवच्छिन्नभेदेनैकस्यैव ग्राह्यग्राहकत्वे तथाप्रकृते
पीत्यर्थादिति। तथोपाधित्वमपाति। अनंतकारणताकल्पनापत्तेरिति भावः। स्वविरोधीति मूलं। पदार्थोऽस्वविरोध्यनु
न्नवाप्रसिद्ध्या व्याप्यत्वासिद्धेराह हेतावनुन्नवेति। एकव्यक्तिकत्वरूपेति। न चैकव्यक्तिकत्वेन वाबाधकं। ध्वंसेतस्यै
वावच्छेदकत्वात्। गौरवमपि बाधकमित्येतावदेवेति गगनं विरुद्धमेवेति। न। अकार्यवृत्तित्वातिरिक्तबाधका
न्तावोपलक्षणत्वात्। तथा च गौरवान्तावोपि हेतौ विशेषणमेव। एकव्यक्तिकत्वं च न कार्यवैशिष्ट्यप्रयोजकमिति त
द्यवच्छिन्नं। नन्वनियमतोनवच्छेदकं। अवच्छेदकं हि द्विविधं ग्राहकमननुगमकं च तत्रानुगमकं वक्ष्यमाणत्वं केवलं
ग्राहकं ज्ञातो व्यक्त्यादि। ज्ञातः स्वतो विलक्षणत्वेन व्यभिचारानुगमयोरप्रसंगात्। तथा च यत्रापि तद्व्यक्तिं च

मवच्छेदकंतत्रापिसंबंधग्राहकतावच्छेदकंकारणतारूपसंबंधग्रहेतदवच्छिन्नग्रहस्यप्रयोजकत्वादि
ति· नचनित्यवृत्तिधर्मस्यावच्छिन्नकार्यत्वप्रतियोगिककारणासंभवात्सर्वप्रतीके नैवज्ञानत्ववारणेविशेष्य
वैयर्थ्यं· स्यावच्छिन्नकार्यमात्रवृत्तिकार्यताप्रतियोगिककारणासंभवस्यविवक्षितत्वात्· ननुकार्यतावच्छेदकव्या
पकत्वेसाध्येपदद्वेऽनित्यपदंव्यर्थं· नचोपरंजकं· निःप्रयोजनत्वादित्यतआह· वस्तुतइति· ज्ञानत्वावच्छिन्नास्मदा
दिधीजनकात्ममनःसंयोगसत्वाद्धनानुपपत्तिरिति· उपाध्यायास्तु· अनित्यप्रमात्वंस्वाधिकरणमात्रवृत्तिध
र्मावच्छिन्नकार्यताश्रयमात्रवृत्तिस्वाधिकरणमात्रावृत्तिधर्मावच्छिन्नकार्यतानिरूपितकारणताश्रयमात्रानुत्पा
दकार्यमात्रवृत्तिधर्मत्वादप्रमात्ववदिति· अतएवपदद्वेऽनित्यपदमपिसार्थकं· अग्रिममात्रपदंसर्वप्रमाणागु
णजन्यत्वसिद्धये· तेनकिंचित्प्रमायागुणजन्यत्वेपिशाब्दप्रमायागुणजन्यत्वासिद्धेर्नपरमेश्वरासिद्धिरितिनिरस्तं
भवति· जन्यत्वावच्छिन्नकार्यताधिकरणमात्रवृत्तित्वेनसिद्धसाधनवारणायाद्यमात्रपदं· हेतावाद्यमात्रपदंनीलघ

यत्वे व्यभिचारावारणाय· द्वितीयमात्रपदं स्वरूपासिद्धिवारणाय· ज्ञानत्वे व्यभिचारवारणाय तृतीयमात्रप
दं· न चैकत्र त्रिधर्मे असंभवत्कारणके गुणे च व्यभिचारो नुत्साद्यांतविशेषणेन सर्ववारणात्· लाघवादनुगतधर्मस्या
143 वच्छेदकतया न तत्रत्वागज्ञात्वावच्छिन्नकारणतामादाय सिद्धसाधनं· न च प्रमात्वस्य ज्ञानसामान्यसामग्रीनिर्वाह्यत
यापरमते संदिग्धासिद्धिः कृतकत्ववत्प्रसाध्यांगकस्यापि संभवादिति· वस्तुतस्तु· विशेष्यवृत्तिविशेषणधीत्वमेकमवच्छे
दकमिति कथमेककारणासंभवः· न चात्र मानाभावः· जन्यविशिष्टज्ञानसामान्ये विशेषणधीत्वेन हेतुतया विशेषयोर
पि हेतुहेतुमद्भावापगमात् यत्सामान्ये यत्सामान्यमिति न्यायात्· न च लोहितः स्फटिक इत्यत्राप्रमायामन्वयव्यभिचारः
फलीभूतधीविषयसंबंधेन विशेष्यवृत्तित्वस्य विवक्षितत्वात्· न चैवं तत्तत्प्रवेशेनाननुगमो दोष इति वाच्यं· प्रमात्वस्या
ननुगतस्यैव लक्ष्यत्वात्· न च प्रतिबंदिर दूषणं· मूलकृतान्यायोपष्टंभदर्शनेन प्रतिबंदिमात्रस्यानुक्तत्वात् तत एव ग्राह्यप्र
मामात्रस्यातिप्रसक्त्या यत्र यज्ज्ञाप्यं तत्रेत्यभिधानेननुगम इत्यालोकानुपपन्नो न च घटत्ववतीत्यादिपरमवप्रमात्व

पदं तथा सतीच्छासाधारण्यैवावच्छेदकत्वे ज्ञानपदं तथापि व्यर्थमेवेति निरस्तं· इच्छासाधारण एव तात्पर्यात्· न च दोष
त्वस्यैकस्याभावात्प्रमात्वस्यानवच्छेदकत्वेन दृष्टांतासिद्धिः· स्वावच्छिन्नसंसर्गवत्कारणताकाप्रमात्वविशेषस्य दृष्टांतत्वा
त्· न च घटत्वप्रकारकत्वघटविशेष्यकत्वावच्छिन्नसामग्र्यां निर्वाहादिदमपि नीलघटत्ववद्व्यर्थं· विपरीतसमूहाल
म्बनप्रमात्वापत्त्यात तत्प्रकारकत्वावच्छिन्नतद्विशेष्यकत्वस्य प्रमात्वेनुव्याप्यतया व्यार्थत्वाभावादिति· विपक्षबाधकं च
घटप्रमात्वाकस्मिकत्वमेवेति· घटज्ञानत्वाद्यावितिमूलं· तु चान्द्राप्यर्थः तथा च धीसामग्री तत्र सति घटे तत्सत्वे ज्ञानं तस्य
त्यर्थात्· घटज्ञानत्वाद्यवच्छिन्नपपत्तिरेव तदर्थः· अस्तु वेतिमूलं· न च दोषाभावेनार्थांतरं· गौरवात्· चाक्षुषेतिमूलं· चाक्षु
षपदं कार्यवैजात्यात्कारणवैजात्यमावश्यकमिति विपक्षबाधकस्फोरणाय· एवमग्रेऽप्युक्तपदमपि· एतेन चाक्षुषत्व
मस्यैवैतन्नीलघटत्ववद्व्यर्थसमानमहिम्नैवोपपन्नत्वादवच्छेदकत्वसाधकं नेति कस्यचिद्दूषणमपास्तं· वैचित्र्यमात्रस्या
रणार्थत्वादिति· गुणाविषयत्वेति· तथा च विलक्षणकार्येणकारणं परं विलक्षणमायाति न तु गुणोपातिभावः· न तु गुण

विषयत्वेति क्वचित्पाठः सुतरांसुगम एव॰ किंच पिर्धेन्नोऽभावस्य चाक्षुषप्रत्यक्षताप्रसंगे भ्रमात्वनियतधर्मावच्छिन्नका
144 रणत्वमिति भवति प्रमामात्रवृत्तिधर्मः कार्यतावच्छेदक इति॰ अन्योन्येति मूलं॰ दोषत्वेज्ञाते तदभावत्वेन प्रमाहेतु
त्वग्रहस्तस्मान्नैवतद्ग्रह इति दोषधीरित्यन्योन्याश्रय इत्यर्थः॰ अत्रप्रमामितीति॰ इदमुपलक्षणं॰ प्रमामात्रवृत्तिज्ञान
हेतुस्थलेमण्डूकवसाञ्जनरूपदोषाभावेवंशभ्रमेतिस्वतंत्रान्वयव्यतिरेकप्रदर्शनायेतदुक्तमित्यपिप्रतिभाति॰ त
त्सत्त्वइतिमूलं॰ विशेषदर्शनसत्त्वेममशरीरमितिप्रमाया असिद्धेरित्यर्थः॰ तदसत्त्वे तदसिद्धेरित्यत्र च विशेषाद
र्शनासत्त्वे गौरोहमितिभ्रमासिद्धेरित्यर्थः॰ तावदितीति॰ नच तावद्दूरवर्त्तिस्थूलतरसवस्तुविशेषविषयकत्वमसं
भवाद्व्यभिचारः कश्चममानविषयकसाक्षात्कारसजातीयसंयोगहेतुत्वस्योक्तत्वादतदस्वरसाद्वा मूलं॰ तत्रा
पीति॰ भावत्वेनेति मूलं॰ अत्र भावधर्मो विशेषदर्शनत्वं तत्त्वेनेत्यर्थः॰ अन्यथातिप्रसंगात्॰ किंचेति मूलं नच विशेषा
दर्शनस्य तत्र दोषत्वमिति प्राचांग्रंथविरोधः तस्य मतान्तरत्वादिति॰ इत्यननुगमादित्यननुगमादित्युपगमादितिभो

दधीजनकतापत्तेरितिन्नृभ्रमः सामान्यत्वेन तत्वानंजनकंचरमाकस्मिकतापरिहारार्थमेवमभ्युपगम्यतांक
ष्यं वस्त्वाद्यपि न्‌· तस्याप्यत्रैवतात्पर्यादिति· अस्तु वेति· अयंभावः आकस्मिकतापरीहारार्थं कल्पनायांसामान्यविशे
षत्वावपुरस्कारेलाघवं· कारणत्वेनियतपूर्ववर्तितावच्छेदकरूपवत्वात्मके विशेष्यमात्रस्यकल्पनात्· अतएवका
रणतानिच्चैवतत्पावधर्मिन्नेदर्कि बाधकमित्यपास्तं· तत्पावयावद्विशेषः सामान्यंवानावच्छेदकमतिरिक्तका
रणताकल्पनापत्तेर्बाधकत्वात्· प्रमेयत्वादिनातिप्रसंगाच्च· किंतुयत्रैवसामान्यानवच्छेदकत्वेकार्याकस्मिक
कत्वंतत्रैवतत्कल्प्यत इतिवक्ष्यति· पद्म

खंडित

लपाठश्च यद्यपि तत्र तत्र विशेषहेतुतापपत्तेर्नानुगमो दोष इत्यत्र तात्पर्य·रूपावच्छिन्नाभाववत्त्वेनेति· अवच्छिन्ना
भाववत्त्वनियतधर्मेणेत्यर्थः· एवमग्रेपि· तद्दलग्नकतापत्तेरितीति· इष्टापत्तेरितिशेषः· अन्यथेतिमूलं· पित्तोत्क
145 र्षेणात्वमोत्कर्षदर्शनादवच्छेद्यत्वमहेतुनेतिभावः· यत्तु पूर्वमपीतत्त्वशंखत्वादिदर्शनात्प्रबलपित्तवशात्पीतःशं
ख इत्यप्रमानस्यादिति· तन्न· तथापि विशेषदर्शनविशेषस्याभावादिति· साक्षात्कारित्वं देतिमूलं· यावदर्थे इं
यसन्निकर्षस्य साक्षात्प्रयोजकत्वे गौरवमितिभावः· ननु विषयस्य तदजन्यत्वेपि तद्विषयत्वावच्छेदेन तज्जन्यत्वं स्यादि त
आह· अप्रमांशे चेतिमूलं· तन्मते स्वप्रकाशाद्यंशं विहाय यदंश इंद्रियसंनिकर्षजत्वं तदंश एव साक्षात्वमप्रांशे
स्मरणत्वं न्यायनये स्मरणारूपसंनिकर्षसत्त्वाद्भ्रमपिप्रमात्वं स्यादिति दूषणमितिभावः· तदुक्तत्व इतिमूलं दोषस्य
साक्षात्वहेतुत्वेनुमितौ भ्रमरूपायां साक्षात्वापत्तिस्तद्दोषस्य च हेतुत्वेननुगम इतिभावः· तथाच शाब्दज्ञानसामान्य
इति· ननु कथं पदज्ञानत्वं वा कार्यधीत्वसामान्यं तत्र तस्यारब्धेः कथं वा वह्निज्ञानं सामान्यकारणं आत्मज्ञानस्यापिशा

सिद्धसाधनं। मुक्तिप्रवृत्तिमात्रस्य पक्षत्वे चान्ततो बाध इति विशिष्टोपादानमिति भावः। इत्यर्थ इति। अतो नोद्दे
श्यासिद्धिरिति भावः। अत इति। अत एवेत्यर्थः। रञ्जनार्थिताऽन्येति। विशेषणकृत्यमाह। अत्रमुक्तेति। मुक्तिप्रवृत्ते
र्विशेषणं रञ्जनार्थिताजन्यत्वरूपमित्यर्थः। इदमुपलक्षणं। मुक्तावित्यपि विशेषणं सत्यरञ्जनप्रवृत्त्यावंशतः सिद्ध
साधनवारणायेति द्रष्टव्यं। अत्रमुक्तेरिति पाठस्तु प्रामादिकः। नन्विष्टत्वलग्नकत्वापत्तेः तथा सतीति। इदमुपल
क्षणं व्यभिचारापत्तेरित्यपि ज्ञेयं। न च व्यतिरेके दृष्टान्तत्वं रञ्जनार्थिप्रवृत्तित्वं च हेतुरिति वाच्यं। उक्तक्रमेणो
पपत्त्याविष्टपदस्य हेतोश्च विशेषपरत्वे मानाभावादिति। नन्वत्र धर्मधारयः त्वमस्य लपदयोरर्थैक्याभावा
त्। नापि द्वन्द्वः प्रमास्यत्वे पदार्थभेदाभावादित्यत आह। इष्टमिति। यथायथपदप्रतिपाद्यभेदे द्वन्द्वः साधुस्त
थानुमितिलक्षणे वक्ष्यते। पदविशेष्यभेदे द्वन्द्व इति पक्षेऽपि न क्षतिरित्यभिप्रेत्याह। इष्टमिष्टतावच्छेदकमिति। इ
ष्टस्येति। यद्यपि त्रिपदविग्रहे यं समासान साधुर्नापि पुरोवर्त्तिनि विशिष्टज्ञानं पुरोवर्त्तिविशिष्टज्ञानमिति स

प्र.म.

146

त्समीतियोगविभागेन समासं विधाय इष्टस्य पुरो वर्त्तिविशिष्टज्ञानमिति षष्ठीसमासो युक्तस्तथा सति इष्ट
स्य विषयतया ज्ञानान्वये राहोरित्यादावलग्नकत्वापत्तेस्तथापि इष्टारित्वज्ञानविषयत्वं षष्ठ्यर्थं विवक्षित्वा इ
ष्टस्य पुरोवर्त्ती इष्टपुरोवर्त्तीति समासं विधाय विशिष्टपदस्य च विशेष्यलक्षणसंबंधवदित्यर्थं विवक्षित्वा वि
शिष्टज्ञानपदेन सह सप्तमीसमासः कर्त्तव्यः तेन नियतसंबंधस्य षष्ठ्यर्थतयाऽस्य वातथात्वेन राहोरित्यादि
संगतिरिति। असदज्ञानमिति। असदो विशेषणात् दः विशेष्यतेतियावत्। तेन इष्टपुरोवर्त्तिनि विशेष्यतासंबंधव
त्ज्ञानं लभ्यते। इष्टमिति। अत्रापि इष्टतावच्छेदकसंसृष्टत्वज्ञानविषयत्वं षष्ठ्यर्थं विवक्षित्वा इष्टतावच्छेदकस्य पुरो
वर्त्तीति समासं विधाय विशिष्टज्ञानशब्देन सह सप्तमीसमासः कार्य इति भावः। संसर्गज्ञानं विशेष्यतालक्षणसं
बंधवत् ज्ञानमित्यर्थः। उक्तेषु चतुर्षु पक्षेषु वक्ष्यमाणं दोषमभिप्रेत्याह। वस्तुतस्त्विति। षष्ठीसमासः इष्टमिष्टता
वच्छेदकमित्यादिनोक्तः। अननुगमादिति। उभयसाधारणं चानुगतं नास्तीति भावः। नह्युक्तेति। ननु रजतशुक्तिमि

दमितिस्वरूपभेदात्मिकायांशुक्तौरजतत्वंप्रकारोभवत्येव·नचरजतार्थिताऽन्यप्रवृत्तौतादृशधीजन्य
त्वंबाधादेवनसिद्ध्यतीतिवाच्यं·इष्टतावच्छेदकसंसर्गज्ञानसाध्यत्वेपिसाध्येएतस्यसमाधेःसाम्यात्·किंचइष्ट
तावच्छेदकमिदंत्वमपीतितत्प्रकारकज्ञानमादायसिद्धसाधनं·नचाग्रेवक्ष्यमाणसमानाधिकरणत्वविशे
षणबलान्नेदंत्वमिष्टतावच्छेदकमितिवाच्यं·तत्रापिपुरुषेकदाचिदिदंत्वप्रकारकेच्छोत्पत्तेः·किंइष्टतावच्छे
न दकत्वाद्यस्यस्वजन्येच्छाविषयतावच्छेदकत्वपरत्वेवाननुगमः·किंचपुरोवर्तिपदस्यापिप्रवृत्तिविषयपरत्वे
रजतस्मरणमादायार्थांतरं·तत्तत्प्रवृत्तिविषयपरत्वेननुगमः·एतेनसमवायेनेष्टतावच्छेदकप्रकारकंज्ञानं
विवक्षितं·अभेदारोपेपिसमवायेरजतत्वस्यप्रकारत्वात्·अतोनाभेदसंसर्गारोपयोरननुगमोदोषइतिनि
रस्तं·पुरोवर्तीष्टतावच्छेदकपदार्थयोस्तत्तद्घटकत्वेननुगमस्यतथाप्यनुद्धारात्·परस्परासंबंधावच्छिन्नलौहि
त्यादिप्रकारकप्रवृत्तौइदंत्वादिप्रकारकप्रवृत्तौचव्यभिचाराच्चेति·एतेनेच्छाप्रकारप्रकारकज्ञानसाध्यत्वमभेद

प्र॰म॰

संसर्गारोपस्थलसाधारणं साध्यमिति केषांचिन्मतमपास्तं॰ पुरोवर्त्तिनीष्टतावच्छेदकेच्छानुगमस्यानुप्र
रादिति॰ अत्रोच्यते॰ यागुक्तिः शुक्तित्वप्रमया शुक्त्यर्थिनो रजतत्वभ्रमेण च कदाचित् रजतार्थिनो देवदत्तस्य प्रवृ
त्तिविषयः न च सा पुरुषान्तरेच्छाप्रकारेण इदंत्वादिना देवदत्तस्येच्छाविषयः तत शुक्तिविशेष्यकरजतार्थिताज
न्यतत्पुरुषीयप्रवृत्तौ तच्छुक्तिविशेष्यिकाया तत्पुरुषेच्छातत्प्रकारप्रकारकतच्छुक्तिविशेष्यकज्ञानसाध्यत्वं साध्यं॰
तच्छुक्तिविशेष्यकतत्पुरुषप्रवृत्तित्वं हेतुः॰ तच्छुक्तिविशेष्यकतत्पुरुषीयशुक्त्यर्थिप्रवृत्तिर्दृष्टान्तः॰ शुक्तित्वप्रका
रकज्ञानस्य जनकत्वात् इदंत्वस्य तत्पुरुषेच्छाप्रकारत्वाभावान्नार्थान्तरं॰ अत एव इदंत्वप्रकारकपुरुषान्तरेच्छा
प्रकारप्रकारकं ज्ञानमादायार्थान्तरशंकया समानाधिकरणत्वं तत्पुरुषीयत्वरूपमिच्छाविशेषणं वस्तुतः॰ भग
वदीपेच्छयत्न इति॰ जीवनयोनियत्ने चेत्यपि ज्ञेयम्॰ रागजत्वं च जातिविशेषश्च तत्र नास्तीति भावः॰ इदं च परकृ
यं यथाश्रुते विवक्षितं तत्तत्पुरुषीयत्वादिविशेषितहेतौ न व्यभिचारप्रसंग इति ज्ञेयं॰ न चेष्टेति॰ इष्टविषयत्वं

167

च्छाप्रकाराश्रयविशेष्यकत्वं॰ अन्यथाप्रवृत्तिविशेष्यस्य सर्वस्यैकाविशेष्यत्वादिष्टत्वे साधनव्यापकत्वप्रसं
गइतिज्ञेयं॰ सुखादाविति॰ रजतज्ञानसाध्ये निर्विषयकेऽप्रवृत्तिरूपे चेति भावः॰ मूले साधनविशेषितत्वादिति॰
साधनं विशेषितं व्याप्यीकृतं येन स साधनविशेषितस्तत्त्वादिति व्याख्यानमयुक्तं॰ इच्छाप्रकाराश्रयविशेष्यक
प्रवृत्तित्वस्य विवक्षितस्य तन्मते स्थलीयप्रवृत्तौ साधनाव्यापकत्वादिति॰ साधनं साध्यव्याप्यतया निश्चितं तद्वि
शेषितत्वं तदव्यापकत्वं तस्मात्॰ साधनविशेषितस्य सांप्रदायिकैरुपाध्यासैस्तथा गणनात्॰ साधनव्यापकतानि त्रा
वारकविशेषणस्य व्यतिरेकानुमानेऽसिद्धिवारणपर्यवसन्नस्यादानेन च प्रवृत्तित्वस्यैवोपाधित्वसंभवइ
ष्टत्वादिवैयर्थ्यात्॰ प्रयत्नत्वावच्छिन्नसाध्ये प्रवृत्तित्वस्य समव्याप्तिकत्वसंभवात्॰ हेतोः साध्यव्याप्यतया निश्चय
न विषमव्याप्तसाधनावच्छिन्नसाध्यव्यापकोऽस्त विषयत्वस्याप्युपाधित्वासंभवादिति साधनं व्याप्यमित्यादिग्रन्थ
एस्य पर्यवसितोऽर्थः॰ परविशेषणेति॰ प्रवृत्तिनिष्ठत्वादिरूपेणार्थः॰ अंशतो बाधेति॰ रजतभ्रमायामिति शेषः॰ रजतत्व

प्र॰म॰ 148

प्रकारकज्ञानविशेषणत्वविनाशुक्तिप्रमायामिच्छायांचांशतःसिद्धसाधनमितिभावः॥ पक्षविशेषणयोःप्रयो
जनमंशतोबाधसिद्धसाधनवारणमेवेतिपाठे अंशतइतिसिद्धसाधनेप्यन्वेति॥ ननुपक्षतावच्छेदकसा
ध्यसामानाधिकरण्यस्यकिंचिदधिकरणमादायसिद्धिर्नांशतोबाधोदोषइत्यतआह॥ यथाचेति॥ स्वरू
कप्योनायेति॥ अतएवायंशुक्तिनिष्ठप्रवृत्तिहेतुत्वेनेत्येवंमूलेवक्ष्यतीतिभावः॥ नचशुक्तौरजतेइतिसमू
हालंबनवारणार्थमिदमितिवाच्यं॥ समूहालंबनेच्छाजनकसमूहालंबनस्यतथाप्यवारणात्॥ समूहालंब
नमादायांशतःसिद्धसाधनस्यरजतत्वप्रकारकत्वावच्छेदेनसाध्यसिद्धेरुद्देश्यायाःप्रागसिद्ध्यानिरस्य
त्वादितिभावः॥ वस्तुतोरजतेच्छाजन्यायस्यशुक्तिनिष्ठप्रवृत्तेस्तस्ययज्जनकंज्ञानंतच्छुक्तिनिष्ठप्रवृत्तेर्जनकंर
जतत्वप्रकारकंचयत्तज्ज्ञानंतच्छापक्षइतिमूलार्थः॥ रजतार्थनीति॥ नचापिशुक्तिविशेष्यकत्वस्यत्वादितिभावः॥
ज्ञायमानेष्टतेदाग्रहकारणतावच्छेदकस्यरजतज्ञानस्यनप्रवृत्तिहेतुत्वमित्याशंक्यमूलंअवच्छेदकत्वेपीति॥

तदर्थमाह॥ कार्यत्वावति॥ प्रवर्त्तकत्वमेव प्रवृत्तिजनकत्वमेव॥ पदेपि जनकत्वं प्रसाध्यांशकमेव॥ प्रयो
जकत्वे विवक्षिते रजतस्मृतावंशे ज्ञानेनाबाधप्रसंगादिति ध्येयं॥ तथाविधमिति मूले॥ रजतेच्छाजन्यप्रवृ
त्तिजनकं शुक्तिविशेष्यकं ज्ञानमिति समुदायार्थः॥ रजतत्वादिविशेषणं विनेयं शुक्तिरिति ज्ञानं चानाबा
धः॥ शुक्तीत्यादिविशेषणं विनासत्यरजतज्ञाने ज्ञानपदं च विनाभ्रमजन्येच्छायामंशतः सिद्धसाधनमिति
भावः॥ इमं शुक्ति रजतमिति समूहालंबनेवांशतः सिद्धसाधनं पूर्वदलस्य शुक्तिविशेष्यकत्वावच्छे
दनसाध्यसिद्धरूपत्वया निरसनीयं॥ ईश्वरीयरजतेच्छायाः सर्वकार्यहेतुतया शुक्त्यपि प्रवृत्तेरपि तज्ज
न्यतया तज्जनके शुक्तिज्ञाने व्यभिचारं तयाह॥ समानाधिकरणेति॥ इदं च इच्छाविशेषणं पदं तावच्छे
दकपिदेयं॥ अन्यथांशतो बाधापत्तेरिति ध्येयम्॥ नवरजतशुक्ती इति समूहालंबनव्यभिचारः॥ तत्रसा
ध्यसत्वात्॥ अंशतः सिद्धसाधनं च निरस्तमिति भावः॥ निर्विषयचारीशादौ व्यभिचारणाय ज्ञानत्वं॥ मूले

प्र॰म॰ बाधइत्यादि॰ द्वितीयानुमाने भ्रमस्थले इदमनुभवे प्रथमानुमाने रजतस्मरणे साध्यासत्वाद्बाधः॰
उभयत्र विशिष्टज्ञानस्य पक्षत्वे ऽज्ञानरूपाश्रयासिद्धिः ज्ञाने तु सिद्धसाधनात्पक्षताविरहेणाश्रयासि
169 द्धिरित्यर्थः॰ शुक्ताविति मूलं प्रथमानुमानाभिप्रायेण द्वितीयानुमाने तथाविधत्वेनेति द्रष्टव्यं॰ ननु र
२ जतमिति विशिष्टज्ञाने ऽरजते तद्व्यावृत्ते रजतान्योन्याभावरूपाया अरजताद्वृत्तेरधिकरणतावच्छेद
करजतत्वस्य ज्ञानं विना कथं तज्ज्ञानमित्यत आह॰ अन्योन्याभावस्यापीति॰ आदिपदात्प्रतियोगिज्ञानादिसं
ग्रहः॰ नन्वेवमभावे निर्विकल्पकापत्तिः॰ प्रतियोगिज्ञानस्याभावत्वप्रकारकज्ञान एव हेतुत्वात्॰ तस्मा
ल्लाघवादभावज्ञानमात्रे प्रतियोगिज्ञानस्य हेतुत्वमुपेयमित्यस्वरसादाह॰ वस्तुतस्त्विति॰ अत एवा
गृहीतासंसर्गेत्यादि॰ ननु प्रमेयदण्डवान्पुरुष इति ज्ञाने दण्डं प्रति प्रमेयत्वस्य धर्मत्वं पुरुषस्य वा ध
र्मित्वं विषय इति प्रमेयत्वविशिष्टपुरुषज्ञानत्वापत्तिरितियापरस्परनिरूपितधर्मत्वधर्मित्वयोरवरज्ञा

नं विशिष्टज्ञानं वाच्यं॰ तथा च नेदं रजतमित्यत्र ज्ञानद्वये च परस्परगर्भत्वलक्षणं तावदगृहीतासं
सर्गैकपदव्यपदेश्य इति॰ मैवम्॰ परस्परगर्भत्वमिव लक्षणमतिमतं॰ तत्र यद्व्यक्तिनिरूपितं यस्य धर्मत्वमवग
म्यते तत्र तद्विशिष्टज्ञानं यद्व्यक्तिगतं धर्मित्वं यन्निरूपितमवगम्यते तत्र तद्विशिष्टज्ञानमिति वा धर्मि
त्वधर्मित्वान्यतरप्रवेशो न द्विधा पर्यवसितं तन्मिलितधर्मत्वधर्मित्वगर्भं व्यर्थविशेषणत्वात्॰ तथा
च तादृशपरस्परनिरूपितत्वस्य च नायैव विशेषणद्वयं॰ असंसर्गाग्रहे ज्ञानद्वये च परस्परनिरू
पित धर्मत्वधर्मित्वयोरग्रहादिति प्रामाण्यवादे व्याख्यातं॰ यद्वा॰ अधिकरणात्मकाभाववादिनो ये
नेदं रजतमित्यत्र रजतमिदं पदार्थस्यैव विशेषणं॰ अतोऽभेदसंबंधेन रजतविशिष्टज्ञानत्वं स्या
तद्व्यतिव्याप्तिस्तयेन तत्र संसर्गाभावाग्रहणात्तयागृहीतासंसर्गपदं॰ ज्ञानद्वयात्मकत्वस्य च पर
स्परनिरूपितधर्मत्वधर्मित्वगोचरत्वमेव॰ तद्धर्मप्रकारकतद्धर्मिविशेष्यकोद्बोधादिजनकत्वस्यैव परस्प

प्र॰म॰ रनिरूपितधर्मत्वधर्मित्वविषयकशाब्देन विवक्षितत्वात्। भिन्नज्ञानगोचरयोः प्रतियोग्यभावयोः पर
स्परनिरूपितप्रतियोगित्वानुयोगित्वग्रहवद्भिन्नज्ञानगोचरयोरपीदं रजतत्वयोरसंसर्गाग्रहदशा
150 यां परस्परनिरूपितधर्मत्वधर्मित्वग्रहस्यास्वीकाराद्व्याप्तिमवारणाय वैकपदमिति। प्रथमेऽनुत्त्वविशे
ष्यकत्वे। द्वितीये रजतत्वप्रकारकत्वे। अस्मन्मतेऽभ्रममूलयोरिदमनुभवरजतस्मरणयोःप्रवृत्त्यजनक
त्वान्मूलत्वं मतमित्युक्तं। तर्ह्यस्मन्मतेऽत्र साध्याप्रव्यापकत्वमत आह। मन्मते त्विति। तस्यैव विशिष्ट
ज्ञानस्यैव। तत्रैवेति हेतोः साध्यव्याप्यतानिश्चयदशायामित्युक्तं। संवादिप्रवृत्तौ विशिष्टज्ञानस्य हेतुत्वेऽपि न
ष्टसिद्धिरित्यत आह। प्रवृत्तित्वावच्छिन्नेति। तदेव। आवश्यकत्वमेव। मूलेऽप्रवृत्तिमात्र इति। यद्यपि ज्ञा
यमाने ष्टभेदाग्रहकारणतावच्छेदकं रजतज्ञानमित्युक्तं संप्रति तस्य हेतुत्वमुच्यत इति विरोधः तथापि भे
दाग्रहस्य ष्टज्ञानस्य च विनिगमनाविरहाद्धेतुत्वमिति नवीनप्राभाकरमतेनेदं। मूले लाघवेनल्स

त्वलाघवेन· मूले अप्रसिद्ध्या असत्त्वेन· ज्ञानभेदेति· रजतानुभवरजतभिन्नत्वस्मरणात्मकेत्यर्थः·
तथाच प्रतिबंधकाभावद्वयमपि तत्र गतमिति भावः· रजतनिष्ठभेदानुभवरजतप्रतियोगिकत्वस्मर
णात्मकज्ञानभेदे दोषमाह· रजतेति· तथाचात्रापि कल्पप्रतिबंधकाभावद्वयं गतमिति भावः· रजतभेदस्म
रणस्थले अभावाविशेषणत्वं रजतप्रतियोगिकत्वस्मरणस्थले अन्याविशेषणत्वं स्यात्तच्चं रजतस्य नास्ति
तात्त्वं कथं निषेधति· नच स्यात्तच्चेति· यद्यपि प्रतियोगिविशेषणे स्यात्तच्चेत् तदभावाधीनः सुतरां विशिष्टाभा
६ वस्तथापि स्यात्तच्चापस्थितेष्टे ज्ञायमाने त्वपुरोवर्त्तिमुक्ताभावद्वयं प्रवर्त्तकमिति भावः· इदं रजतं गृहेना
स्तीत्यत्राप्रवृत्त्यापत्तेरिति भावः· इदमुपलक्षणं नाप्यन्याविशेषणत्वं तत एव रजतप्रतियोगिकत्वं गृहनिष्ठ
भेदस्तीत्यत्रात्र प्रवृत्त्यापत्तेरित्यपि ज्ञेयं· किंचिदिति· यत्र रजतभेदस्मरणं तत्र पुरोवर्त्तिवृत्तित्वेन भेदस्याग्रहा
त् यत्र रजतप्रतियोगिकत्वस्मरणं तत्र पुरोवर्त्तिवृत्तित्वेन भेदमानेऽपि तद्विशेषणतया रजतस्याग्रहात् उभयत्रापि

प्र॰म॰ रजतस्य स्वातंत्र्यमस्तीति भावः॰ रजतभेदस्मरणस्थले प्रथमप्रतिबंधकाभावस्यासत्त्वमस्तीत्यत आह॰ पुरोवर्त्ति
निष्ठ इति॰ तत्रैव द्वितीयप्रतिबंधकाभावस्यासत्त्वमस्तीत्यत आह॰ एवमग्रेपीति॰ रजतेऽसंसर्गाग्रह इति॰ तथा च
151 प्रथमप्रतिबंधकाभावस्तत्र नेति भावः॰ रजतभिन्नत्वस्येति॰ तथा च द्वितीयः प्रतिबंधकाभावस्तत्र नेति भावः॰ न
नु रजतप्रतियोगिकत्वस्मृतेरित्यादिना पूर्वपक्षग्रंथेन रजतनिष्ठभेदानुभवरजतप्रतियोगिकत्वस्मृत्यात्मकं
ज्ञानद्वयमादाय दोषादन्तः समोहतइत्यतः प्रथमं प्रतिबंधकाभावमसंसर्गाग्रहाभावरूपतया व्याचष्टे॰
वस्तुतस्त्विति॰ पुरोवर्त्तीति॰ पुरोवर्त्तिनिष्ठतया ज्ञायमाने भेदे रजतप्रतियोगिकत्वज्ञानसमानकालीनो यस्त
दसंसर्गाग्रहस्तदभाव इत्यर्थः॰ यत्र इदं रजतमित्यत्र॰ यत्र तस्येति॰ पुरोवर्त्तिरजतनिष्ठभेदो रजतप्रतियोगि
कत्वाभाववानित्यत्रेत्यर्थः॰ रजतभेदः क्वचित् इदं रजतं भेदवदित्याकारकभ्रान्तिग्रहे अन्यथाख्यातिरीत्या पुरो
वर्त्तिनिष्ठतया ज्ञायमाने भेदे रजतप्रतियोगिकत्वासंसर्गाग्रहस्वीकारे तदभावाधीना भ्रान्तोपरवर्त्तिनस्यादित्या

त्वं कथं निषेधति॰ न चेति॰ अत एव॰ यत एव वस्तुतस्त्वित्यादिना असंसर्गाग्रहाभावरूपतया प्रथमप्रतिबंधका
भावस्य व्याख्यानं कृतमित्यर्थः॰ द्वितीयप्रतिबंधकाभावस्य प्रथमव्याख्यानमनूद्य तुल्यन्यायतया असंसर्गाग्र
त्य हाभावरूपमर्थमतिदिशति॰ एवमिति॰ ज्ञायमानेति॰ इष्टभिन्नत्वज्ञानसमानकालीनो यस्तदसंसर्गाग्रहस्तद
भाव इत्यर्थः॰ ननु पुरोवर्त्यग्रहीतासंसर्ग इत्यादिनोक्तः प्रथमप्रतिबंधकाभावो रजतनिष्ठभेदानुभवरजतप्र
तियोगिकत्वस्मरणस्थले अन्वयव्यभिचारी उक्त एव॰ पुरोवर्तिनिष्ठतया ज्ञायमाने भेद इत्यादिनोक्तोपि प्रथम
प्रतिबंधकाभावो रजतानुभवरजतभिन्नत्वस्मरणस्थले अन्वयव्यभिचारी पुरोवर्त्यग्रहीतासंसर्गे यदिष्टभिन्न
त्वमित्यादिना इष्टभिन्नत्वज्ञानसमानकालीन इत्यादिना च निरुक्तो प्रतिबंधकाभावो रजतनिष्ठभेदानुभवरजतप्र
तियोगिकत्वस्मरणस्थले न्वयव्यभिचारिणावित्यत आह॰ अत्र चेति॰ तथा च निरुक्तानां प्रतिबंधकाभावानां कूटस्य
हेतुत्वान्नोक्तदोष इति भावः॰ कथं तर्हि भ्रमलाभ इत्यत आह॰ ग्रंथस्त्विति॰ ननु तथापि यत्र रजतप्रतियोगिकत्वं रज

तद्भिन्नत्वं च न सम्भवतं किंतु ज्ञायमानेषु पुरोवर्त्तिनिष्ठत्वेदप्रतियोगिस्मर्यमाणस्य रजतत्वस्यासंसर्गाग्रहः यत्र ज्ञायमाने
१८ दस्मर्यमाणयोः रजतप्रतियोगिकत्वपुरोवर्त्तिनिष्ठत्वयोरसंसर्गाग्रहो यत्र वा प्रकारांतरेण घटकपदार्थानां खंडशः
स्मृतानां खंडशो ज्ञायमानेषु पदार्थेषु संसर्गाग्रहस्तत्रोक्तकूटस्याप्यन्वयव्यभिचार एव॰ अथ पुरोवर्त्तितावच्छेद
कतदगृहीतासंसर्गे धर्म्मिणि वज्ञायमाने इष्टतावच्छेदकवज्ञायमाने ज्ञायमानेन पुरोवर्त्तितावच्छेदकेनागृहीता
संसर्गो ज्ञायमानो यो धर्मो तेन सहागृहीतासंसर्गो ज्ञायमानेन भेदत्वेनागृहीतासंसर्गो ज्ञायमानो यो धर्मो तेन सहा
गृहीतासंसर्गो ज्ञायमानेन प्रतियोगित्वेनागृहीतासंसर्गो ज्ञायमानो यो धर्मो तेन सह ज्ञायमाने इष्टतावच्छेदकया
असंसर्गाग्रहो भावस्यानयैव रीत्या भेदाग्रहाभावद्वयस्य च हेतुत्वापत्तेरिति॰ सत्यं॰ एतेषां स्वतंत्रान्वयव्यतिरेकव
तां विनिगमनाविरहिणां च प्रतिबंधकाभावानां हेतुत्वस्येष्टत्वादिति॰ नन्वेवमपि किंचिद्रजतभिन्नमिति स्मरणे
इदं रजतमिति भ्रमस्य यत्र प्रसक्तो तत्रान्यथाख्यातिशीलापुरोवर्त्तिनि रजतभेदासंसर्गाग्रहस्य सत्वादुक्तप्रतिबं
स्तद्भाव एव हेतुर्नोक्तकूटोऽन्यथासिद्धेरिति चेत्॰ तथापि विनिगमनाविरहाद्विपरीतक्रमेण पुरोवर्त्तितावच्छेदके अस
सर्गाग्रहा३

धकाभावानां व्यतिरेकव्यभिचार इति चेत्. न. दोषहेतुकधर्मिभेदासंसर्गाग्रहस्य दोषहेतुकधर्मात्वंताभाव
संसर्गाग्रहस्य चाभावयोर्विद्यमानो यो धर्मिभेदासंसर्गः विद्यमानो यो धर्मात्वंताभावासंसर्गः तयोर्योऽग्रहस्तद
भावयोर्वा हेतुत्वात्. न चैवं शुक्तौ नेदं रजतमित्याकारकभेदासंसर्गाग्रहाद्दोषहेतुकत्वाभावात्प्रवृत्तिः स्या
दिति वाच्यं. धर्मिभेदविशिष्टज्ञानधर्मात्वंताभावविशिष्टज्ञानयोरनुलोमविलोमक्रमेणाभावचतुष्टयस्या
पि हेतुत्वादिति. पुरोवर्त्तिमात्रेति. एतच्च विशेष्यत्वाभिप्रायेणोक्तं. प्रकारतया रजताभेदस्यादोयस्यापि विष
यो भवत्येव तथापि अभेदाभिलापवक्ष्यमाणं समाधानमिति ह्यपि ज्ञेयं. रजतत्वस्य नेदन्ति. यथा रजतत्वस्य तैः शु
क्तौ वसंसर्गाग्रहं सहकारिणमासाद्य तत्र रजतत्वाभिलापहेतुत्वं तथैवार्थः. न चाभिन्नाभिलापे रजताभिलापव
कागतिरिति वाच्यं. तत्रापि पुरोवर्त्तिनि भेदाग्रहं सहकारिणमासाद्याभिन्नस्य नेरजतस्य तस्य हेतुत्वात्. ननु र
जताभेदवदिदं पदार्थस्य व्यवहर्त्तव्यस्य ज्ञानं तथापि न समर्थितमिति चेत्. न. अभेदज्ञानेन पुरोवर्त्तिज्ञानस्यापु

प्र॰म॰ पलक्षणात्। वैशिष्ट्यांशे चासंसर्गाग्रहस्यैव तंत्रत्वात्। तथा चाभेदज्ञानमिदं ज्ञानं तयोरसंसर्गाग्रहश्च रजताभे
दवदिदमित्यभिलापहेतव इति। ज्ञानयोरवच्छेदकत्वमसंसर्गाग्रहस्य हेतुत्वमिति कल्पान्तरपरतया व्याच
153 ष्टे। यद्वेति। मूले पात इति भेदपात्यार्थमुक्तं। मूले भेदानुमितेः पीतभेदानुमितेः। हेतुः प्रवृत्तिहेतुतावच्छेदकः। अग्र
हीतेति। स्वरूपतो विषयतश्चागृहीतभेदज्ञानद्वयेत्यर्थः। हेतुः प्रवृत्तिप्रतिबंधकतावच्छेदक इत्यर्थः। विशेषणा
दपीति। यत्रायं न श्वेत इति भ्रमस्य विषयभेदस्वरूपभेदमात्रं गृहीतं न तु विषयस्वरूपभेदगतमगृहीतत्वं विशे
षणं तत्र तादृशविषयतापन्नविशेषणाभावाद्विशिष्टेन भ्रमत्वात्मकेन विषयेण विशिष्टस्य ज्ञानस्याभावोऽस्त्येवेति
वृत्तिप्र प्रतिबंधः स्यादित्यर्थः। इदमुपलक्षणं उत्पत्तिकालीनं दोषप्रयुक्तं वा गृहीतभेदत्वं भ्रमशरीरे निवेश्यं। तथा च त
दुभयविशेषणाग्रहादपि विशिष्टाभावोऽदुष्टव्यः। गृहीतभेदेति। विषयभेदेत्यर्थः। जडतापत्तेः प्रतिबंधसत्त्वाप
त्तेः। अभेदानुमित्यव्यवहितोत्तरक्षणकार्यकालभेदाग्रहाभावोऽस्त्येवेत्यत आह। समेति। ननु विषयभेदवत्त्वया

स्वरूपभेदवत्तयाचज्ञानाभावएवप्रवृत्तिप्रतिबंधकस्तेर्वाच्यइत्यरुचेराह· प्रतिबंधेति· यद्योप्येवमपिप्रतिबंध
काभावस्यावच्छेदकत्वान्नशक्तिसिद्धिस्तथापिविषयभेदवत्तयास्वरूपभेदवत्तयावाज्ञानस्यभेदज्ञानस्याभावइष्ट
ज्ञानंपुरोवर्त्तिज्ञानंवतितिचितयादिष्टज्ञानस्येष्टभेदाविषयकपुरोवर्त्तिज्ञानस्यचलघुत्वादुक्तत्वमित्यतिसंधिनामूले
यद्वेत्युक्तं· नचशक्यासिद्धिर्दोषः शक्यभंगीकर्त्तुरेकदेशिनोमतेनास्याभिधानात्· अतएवशक्तिविशेषएवप्रव
र्त्तकतावच्छेदकइतिनोक्तं· उपस्थितेति· निरुक्तप्रतिबंधकाभावकूटसमानकालीनमित्यर्थः· अन्येष्विष्टभेदोविशिष्टो
यत्रनगृहीतः किंतुविशकलितः तत्रापीदंगतमित्यतिप्रसंगात्· इष्टेउपस्थितेभिन्नेप्यपिइष्टत्वं· त्वन्मतेनैयायि
कमतेपि· गुरुमतेसुतरामितिभावः· एवंसाध्यविरोधित्वज्ञानस्यविरोधिविषयकानुमितिप्रतिबंधकत्वे· अयइ
ति· उभयानुमितिसामग्र्योस्तुल्यत्वेसत्प्रतिपक्षः तथैवविरोधज्ञानस्यानुमितिप्रतिबंधकत्वं· एकसामग्र्यान्यूनत्वेतु
कारणाभावादेवकार्याभावइतिविरोधज्ञानस्यतैःस्वोच्येणनप्रतिबंधकत्वमितिभावः· स्वेतानुमित्यति·भेदास्संस

प्र॰म॰ गोभेदाभावः स च घटेत्यमेवेतिभावः॥ ननु घटेतः शंखवइत्यनुमित्यव्यवहितकाले कथं शंखान्यचेत इति भ्रमस्य दु
र्लभो भ्रमसंसर्गस्यागृहीतत्वादित्यत आह॥ इदं चेति॥ ननु संशय इति॥ इदं चाविद्यमानानेककोटिकसंशयाभिप्रा
154 यण॥ विद्यमानानेककोटिकस्यद्विकोटिकसंशयस्यैकस्यां कोटौ विशिष्टज्ञानतया तत्स्मरणानपेक्षणात्॥ तन्मते विशे
षणज्ञानस्याहेतुत्वादिति॥ पदेति॥ यथाश्रुतैकवर्णगोचरैः संस्कारैर्वर्णसमुदायरूपपदस्मरणं तथेत्यर्थः॥ अभ्युपेत्येति॥
भेदप्रतियोगितयास्मृतस्य कोटिमत्ता भेदाग्रहमुपेत्यान्याविशेषणत्वरूपस्वातंत्र्यविशेषणे न वारणमुक्तमित्यर्थः॥
नन्वेवमिति॥ स्वातंत्र्यमन्याविशेषणत्वं वाच्यमत एव प्रामाण्यघटकतया विशेषणस्यार्थस्य न स्वातंत्र्यमित्यन्याप
स्यतिः संशयस्यानीयाभ्युपगम्यते॥ तथा च भेदविशेषणतयोपस्थितस्य न स्वातंत्र्यमस्तीति तत्तायोयमभ्युपगमवा
ह दः कृतः स न युक्तः उक्तिसंभवाभावादिति योजना॥ उक्तिसंभवाभावमेवोत्तथाहीति॥ प्रवृत्तीति॥ प्रवृत्तिविषयाग्र
हीतासंसर्गभेदप्रतियोगित्वेनोपस्थितत्वाभावइत्यर्थः॥ नत्वभेदेति॥ न त्वन्येत्यर्थः॥ भेदग्रहणं च प्रकृतापेक्षया॥

तथा चेति । घटो वह्न्यग्रहीतासंसर्गभेदप्रतियोगित्वेनानुपस्थितत्वरूपस्वातंत्र्योपस्थित इत्यर्थः । भेदाग्रह इति । स्वा
तंत्र्यभेदाग्रहयोरभेदादिति भावः । घटो वह्न्यग्रहीतासंसर्गभेदाग्रहीतासंसर्गत्वस्याभावरूपो भेदाग्रह इति चेत्
तथापि तयोः समनियतत्वादेकसत्त्वमभ्युपेत्यापरासत्त्ववचनस्यायुक्तत्वादिति । एवमिति । धर्मात्यंताभावसंसर्गाग्र
हस्थले उक्तरूपभेदाग्रहसत्त्वेपि धर्मात्यंताभावघटितं स्वातंत्र्यं नास्तीति तत्रायमभ्युपगमवाद इति भावः । तथा
चेति । धर्मात्यंताभावमात्रोपस्थितौ तदग्रहीतत्वादिस्वातंत्र्यं विवक्षितमित्यर्थः । असंसर्गाग्रह इति । धर्मवच्छेदमा
त्रोपस्थितौ तादृशाभेदत्वादिस्वातंत्र्यं विवक्षितमित्यर्थः । तादृशात्वं च घटो वह्न्यग्रहीतासंसर्गत्वं । तथा च क्वचि
त्किंचित्स्वातंत्र्यपदेन ग्राह्यमिति भावः । व्यावर्तकधर्माग्रहो व्यावर्तकधर्माग्रहोपि । तथा च तदसत्त्वादेव नसं
न्नायप्रसंग इति भावः । वस्तुतस्तु धर्मिभेदविशिष्टज्ञानं धर्मात्यंताभावविशिष्टज्ञानं दोषहेतुकधर्मिभेदासंस
र्गाग्रहो दोषहेतुकधर्मात्यंताभावासंसर्गाग्रहश्च प्रतिबंधकाविति विशिष्टज्ञानयोरभावरूपं भेदाग्रहमुप

प्र॰म॰ ल्पदोषहेतुकयोरसंसर्गाग्रहयोरन्यथारूपं स्वातंत्र्यं नास्तीत्यभिप्रेत्य यावंतः प्रतिबंधकाभावास्तावत्तु मध्ये
155 येनात्र संततिभेदाग्रहत्वादेन यत्तु न संति तत्स्वातंत्र्यवादेन विवक्षिता इत्यभिप्रेत्य वा मूलेऽभ्युपगमवाद इति॰ रज
तज्ञानस्य तदितरकारणस्य च सत्वे तदुत्तरक्षणे नेदं रजतमिति ज्ञानेऽयुगपत्प्रवृत्तिनिवृत्त्यापत्तिरिति शंकते॰ नचे
ति॰ यद्यपि नेदं रजतमिति ज्ञानोत्पत्तिक्षणे प्रवृत्त्यापादनं तदुत्तरक्षणे तु निवृत्त्यापादनमिति न यौगपद्यं॰ नवा ज्ञा
नोत्पादकाले प्रवृत्त्यादीनं संभवति ज्ञानप्रयत्नयोरसमानकालोत्पत्तिकत्वनियमात्तथापि क्षणद्वयात्मककालो
पाधिमादाय यौगपद्यं ज्ञानोत्पादकालेऽपि प्रवृत्त्युत्पादसंभवं चाभ्युपेत्येदमाशंकितं॰ वस्तुतस्तु नेदं रजतमिति ज्ञाना
त्पत्त्याप्रयत्वेनाभिमतेरूणोप्रवृत्तिसामग्रीबलवत्वात्तत्सामग्रीतः प्रवृत्तिरुत्पद्येत ज्ञानं च नोत्पद्येतेति शंकार्थः॰
निवृत्तिपदेन ज्ञानानुत्पादस्य विवक्षितत्वात्॰ प्रथमव्याख्याने प्रवृत्तौ हेतुमाह॰ रजतस्मृतेरिति॰ इतरकारणस
त्वेन चेति शेषः॰ निवृत्तौ हेतुमाह॰ नेदमिति॰ आवश्यकत्वे हेतुमाह॰ प्रतियोगीति॰ द्वितीयव्याख्याने तु प्रवृत्तौ निवृत्तौ

चहेतुमाह॥ आवश्यकत्वेनेति॥ प्रवृत्तिहेतोरितरस्य चसत्वेनेति शेषः॥ आवश्यकत्वे हेतुमाह॥ नेदमिति॥ तथा
पि कथमावश्यकत्वमत आह॥ प्रतियोगीति॥ किंतु शुक्तिरिति नेदंधीतात्पर्यमुक्तं॥ भेदादीत्यादिपदेन संसर्गाभा
वसंग्रहः॥ भेदाग्रहो हीति॥ धर्मात्यंताभावो ह्यग्रहोपि द्रष्टव्यः॥ स्वतंत्रोपस्थितावपि भेदाग्रहसहितस्वतंत्रोपस्थि
तावपि॥ तदसत्वादिति॥ इष्टभेदमात्रोपस्थितौ नेदंगतत्वस्वातंत्र्यसत्त्वेपि धर्मात्यंताभावाग्रहरूपप्रतिबंधका
भावस्यासत्वादित्यर्थः॥ द्वितीयव्याख्याने तु ज्ञानानुत्पादप्रवृत्तिसामग्री तस्यां च ज्ञानानुत्पाद इति अन्योन्याश्रयेता
त्पर्यं॥ धर्मिभेदमात्रोपस्थितौ नेदंघटितं स्वातंत्र्यं विवक्षित्वा परंतु तरमाह॥ वस्तुतस्त्विति॥ इदमुपलक्षणं धर्मात्यन्ता
भावमात्रोपस्थितौ च स्वत्यंताभावगतस्वातंत्र्यविवक्षयापि पक्षांतरं द्रष्टव्यं॥ मूले कचिदिति॥ निर्वह्नावित्यर्थः॥ मू
लेवह्न्यनुमितिरिति॥ तथा चान्यथाख्यातिः सिद्धेति भावः॥ मूले नियमत इति॥ स्वतंत्र निर्वह्निवस्मृतिसाहित्यात्मकेन
केवल्येन तात्पर्यः॥ नन्वत्र विवक्षितविवेकेन कैवल्यमेव लिंगत्रमस्य साध्यं न तु तद्विशिष्टावह्निस्मृतिः॥ तत्रापि विशेष्य

प्र॰म॰ 158

भावस्यासाध्यतयाख्यातंअविशेषणाभावएवसाध्यः सचनिर्वह्नित्वाभावासंसर्गाग्रहपर्यवसितइतिभानसिद्ध
त्वाह॰ अयमिति॰ त्वयापि॰ नैयायिकेनापि॰ प्रतिबंधकत्वेति॰ निष्कंपप्रवृत्तिप्रतिबंधकत्वेत्यर्थः॰ एवमग्रेपिप्रवृत्ति
पदे निष्कंपप्रवृत्तिपरः॰ ज्ञानिकाप्रतिबंधकनिरासमुखेनप्रयोजिका॰ सानिर्वह्नित्वाभावविशिष्टधीः॰ असंसर्गाग्रह
स्यानतिरिक्तानिर्वह्नित्वाभावासंसर्गाग्रहोमयाख्यानेतिरिक्तोयस्याः सा तथा चास्मन्मते निर्वह्नित्वाभावासंसर्गा
ग्रहएवनिष्कंपप्रवृत्तिप्रयोजकइतिभावः॰ ज्ञानद्वयेति॰ तथा च न वह्निविशिष्टपर्वतानुमितौ न वा निर्वह्नित्वाभावविशि
ष्टधीः॰ असंसर्गाग्रह[स्य] पर्वतानुमितौ लिंगत्वमस्य जनकत्वमितिभावः॰ तदनन्तरभावित्वमात्रमिति॰ तदनंतरवर्त्ति
त्वमात्रं न तु तज्जन्यत्वमित्यर्थः॰ तथा चेति॰ अत एव तदनन्तरभावित्वप्रतिसंधानाप्रतिसंधानेनेति तृतीयेतिभावः॰
मूले अन्यथेति॰ रजतत्वेन नसह रजतस्य तेदाग्रह इत्यर्थः॰ भेदासंसर्गाग्रहादित्यस्य तात्पर्यमाह॰ ख्यातंख्याता
यादिति॰ रजतस्य पुरोवर्त्यगृहीतासंसर्गभेदप्रतियोगित्वेनानुपस्थितत्वाभावादित्यर्थः॰ अन्यथाख्यातिविर

ह हेतुं स्फुरयति । तेदाग्रहादिति । पुरोवर्त्तिनिरजतत्वेदवत्वाग्रहादित्यर्थः । इत्यर्थः इतितात्पर्यार्थः । यथेति । प्र
तिबंधकाभावानां मध्ये कस्यचित्किंचित्स्वातंत्र्यात्तत्राब्दार्थ इत्युपपादितं संप्रति तेषामन्यदेवकिंचित्स्वातंत्र्यं प्रसंगा
दुच्यत इत्यर्थः । तत्रेदग्रहस्य शुक्तित्वादिधर्मितेदधर्मात्यंताभावग्रहाभावस्य । तस्मादिति । अन्नेदसंबंधेनअन्य
विशेषणत्वेनानुपस्थितस्यानुपलब्धितेउपस्थिते चेष्टतद्व्यावर्त्तकधर्माग्रहः प्रवृत्तौतारद्योऽनिष्टे तद्व्यावर्त्तक
धर्माग्रहो निवृत्तौ हेतुरित्यर्थः । नन्वेवमपि सर्वेषां प्रतिबंधकाभावानां अनुगमो न ज्ञात इति चेत् । सत्यं । धर्मितेद
शुक्तित्वादिधर्मात्यंताभावानां व्यावर्त्तकत्वेनानुगमे तद्ग्रहरूपप्रतिबंधकाभावमात्रानुगमस्य विवक्षितत्वादि
ति । ग्रहनिष्ठात्यंताभावप्रतियोगिनिरजतेग्रहनिष्ठात्यंताभावाप्रतियोगीदं रजतमिति ज्ञायमाने स्वातंत्र्येना
स्वीकाराशंक्य निषेधति । नचेति । नहीति । नन्विदमयुक्तं विशेषणविशेषणस्यापि विशेषणत्वात् । नचसाक्षाद्विशेष
णत्वघटितमेव स्वातंत्र्यं निर्वाच्यमिति वाच्यं । ग्रहनिष्ठात्यंताभावप्रतियोगिरजतात्मकमिदमित्यत्र स्वातंत्र्याभावा

पत्तेरिति·मैवं·अग्रे विवरणीयस्य स्वातंत्र्यस्य पक्षे तत्रापि सत्वादिति·ननु स्वातंत्र्यं न तावदन्याविशेषणत्वं स्मृत
स्य रजतेतात्मकस्य शुक्तौ भेदाग्रहे प्रवृत्त्यभावापत्तेः·न च प्रवृत्तिविषयत्वाभिमतान्यत्वेन यदुपस्थितं तद्विशेषण
तयाऽनुपस्थितत्वाभाववत्त्वं·इमानि रजतानीति समूहालंबनादप्रवृत्त्यापत्तेः·न च तन्मात्रविशेषणतयाऽनुपस्थि
तत्वाभाववत्त्वं·यत्र शुक्तौ रजतमिति रजते च किंचिदिति ज्ञानं तत्र रजते प्रवृत्त्यापत्तेः·न चान्यत्राऽगृहीतभेदकत्वे स
ति अनुपस्थितत्वस्याभावः स्वातंत्र्यं·रजतमिति गृह्यमाणायां शुक्तौ सहाऽगृहीतभेदे रजते प्रवृत्त्यभावापत्तेः·
न च प्रवृत्तिविषयाभिमतान्यत्वेन यदुपस्थितं तत्राऽगृहीतभेदकत्वे सत्युपस्थितत्वस्याभाववत्त्वं·शुक्तिषु इमा
नि रजतानीति समूहालंबनादप्रवृत्त्यापत्तेः·न च तन्मात्रइति विवक्षितं यत्र शुक्तौ रजतमिति रजते च किंचिदि
ति ज्ञानं तत्र रजतेऽपि अगृहीतभेदकत्वे सत्युपस्थितत्वस्य सत्त्वादप्रवृत्त्यापत्तेः·न च तन्मात्रे दोषादगृहीतभेद
कत्वं विवक्षितं स्वातंत्र्ययोरननुगमापत्तेरिति वाच्यं·किंचित्त्वोपस्थितिविषये रजते शुक्तौ वा तदन्यत्वोपस्थि·

तिविषयमात्रविशेषणतया दोषात्तदगृहीतभेदकतया वा रजतोपस्थितिदशायां न प्रवृत्तिरिति प्रवृत्ति
विषयत्वाभिमतान्यत्वेन यदुपस्थितं तन्मात्रविशेषणतया उपस्थितत्वाभावः तन्मात्रे दोषागृहीतभेदकत्वेस
तिउपस्थितत्वाभावश्च मिलितएवस्वातंत्र्यशब्देन विवक्षित इति गृहनिष्ठात्यन्ताभावप्रतियोग्यात्मकतय
गृह्यमाणे रजते सोस्त्येवेति तात्पर्यं· अत्रेदं प्रतिभाति· एवं सत्यपि रजते रजतमिति धीकाले रजतमिति ज्ञा
तायां शुक्तौ शुक्तौ रजतमिति धीकाले रजतत्वेन ज्ञाते रजते च प्रवृत्तिर्न स्यात्· न च प्रवृत्तिविषयत्वाभिमत
रजतविशिष्टज्ञानदोषहेतुकरजतभेदाग्रहयोरभावाभ्यां सह तत्तस्य तदन्यत्वेनोपस्थितिविषयविशे
षणतया उपस्थितत्वस्याभावः तदन्यत्वोपस्थितिविषये दोषादगृहीतभेदकत्वे सत्युपस्थितत्वस्याभावः स्वा
तंत्र्यशब्देन विवक्षित इति वाच्यं· एवं सति विशिष्टाभावधावनवैयर्थ्यात्· प्रवृत्तिविषयगतस्याभावद्वयरूप
विशेषणाभावस्यैव लाघवेन वक्तव्यत्वादिति· उच्यते· रजतविशिष्टज्ञानाभावः रजतत्वविशिष्टज्ञानाभावः

प्र· म·

158

दोषहेतुकरजतभेदाग्रहाभावः दोषहेतुकरजतत्वांशसंसर्गाग्रहाभावश्च मिलिताः प्रवृत्त्यभावनियताः त
त्राद्यद्वयस्य छित्वावच्छिन्नाभावो भेदाग्रहः सत्यसंवादिप्रवृत्तौ कारणं· अंत्यद्वयस्य छित्वावच्छिन्नाभावः स्वा
तंत्र्यं तत्रविसंवादिप्रवृत्तौ कारणं· नतु प्रवृत्तित्वावच्छिन्ने भेदाग्रहस्वातंत्र्ययोर्मिलितयोरपेक्षितेति तात्पर्यं· वस्तु
तस्तु उक्ताभावचतुष्टयाभाव एक एव प्रवृत्तित्वावच्छिन्ने कारणमतो न स्वातंत्र्यमुपादेयं न वा सर्वांकाभावा
नां कारणतायां नानात्वगौरवमिति तत्त्वं· एकदेशिसमाधिमनूद्य दूषयति· यत्त्विति· तथाज्ञानात्· इदं रज
तं गृहे नास्तीति ज्ञानात्· तदप्युक्तमित्यत्र हेतुः कार्येति· तत्र हेतुमाह· रजतएवेति· स्वतंत्ररजतोपस्थित्या इ
तरहेतुसत्त्वेन चेत्यर्थः· सहभावेत्यत्र नायं दोषः प्रवृत्तिकाले भेदाग्रहस्यासत्त्वादिष्टत्वादिति भावः· अल
इति· यथात्र व्यावर्तकधर्मो भेदत्वेनास्तिमतः तथा इष्टभेदाविषयकं ज्ञानं प्रवर्तकमित्यत्रापि भेदपदेन स
व विवक्षितायत इत्यर्थः· नत्विति· यथा चैतत्तथोक्तं· यथाश्रुतमूलशंकते· नन्विति· ननु स्वातंत्र्यं पुरोवर्त्ति

त्त्वेन ज्ञातयोर्भेदः तत्प्रतियोगित्वेनानुपस्थितत्वं पुरोवर्त्तिनिष्ठभेद इत्यादिफक्किकाव्याख्यावसर उ
क्तं· तच्च रंगं प्रति रंगस्य रजतं प्रति रजतस्यास्त्येवेत्यत आह· नहीति· अविशेषणत्वेति· पुरोवर्त्तिरजतत्त्वेन गृ
हीतयोर्भेदस्तत्प्रतियोगित्वेनानुपस्थितत्वेत्यर्थः· रजतभेदस्मरणे इदंत्वप्रकारकरजतानुभवरूपे रजते
नेदं रजतमिति ज्ञाने रजतस्य स्वातंत्र्यापत्तेरिति भावः· भेदाग्रहविशेषरूपं स्वातंत्र्यमाह· किंत्विति· यस्य य
द्गृहीतासंसर्गभेदप्रतियोगित्वेनानुपस्थितिस्तस्य तत्प्रति स्वातंत्र्यमित्यर्थः· अस्त्वेवेति· नन्वेवं रजतं प्रत्य
पि रंगस्य स्वातंत्र्यं न स्यात्· अन्यथाख्यातिस्थले रजते रंगभेदस्यासंसर्गाग्रहस्वीकारादिति चेत्· न· दोषव
उक्तभेदासंसर्गाग्रहस्य विवक्षितस्य रजतं प्रत्यसत्वात्· रंगं प्रति च सत्वादिति· नन्वेवं दोषस्यावच्छेदकत्वे
स एव संवादिप्रवृत्तिनिवृत्त्योः प्रतिबंधकोस्त्वित्याशयेन शंकते· भवतु वेति· विसंवादिप्रवृत्तेरिति· विसंवा
दिप्रवृत्तिजनकस्य च संवादिप्रवृत्तिप्रतिबंधकत्वमर्थसिद्धमिति भावः। इदमेव दोषनियामकत्वमेव· वस्तुनि·

प्र॰म॰

159

एवंविधत्वमेव प्रसक्तेति मूलं । अख्यातौ नेदाग्रहरूपत्वमपदे बाधो न युज्यते प्रसक्तस्य तदधिकरणतया
गृहीतस्य तस्मिन्नधिकरणे तावन्निश्चयालाभ इत्यर्थः । नहि परातमिति मूलं । अन्यथाख्यातिपक्षे बाधो न यु
ज्यते ज्ञानतः सन्नेदाग्रहमेव साधयतीत्यर्थः । तत्र हेतुमाह मूले परस्परेति । विरुद्धार्थकतयेति । विरोधिविषय
कज्ञानकालोत्पन्नत्वमित्यर्थः । इत्थमिति । बाधकप्रयोजकमित्यर्थः । उभयज्ञानसाधारणत्वाभावादन्यथाख्या
वष्टे । अव्यवस्थापकतयेति । पूर्वेति । यथा पूर्वोक्तं विरुद्धार्थकत्वं न बाधकत्वनियामकं तथेदमपीत्यर्थः । मूले
बाधादिति । अप्रामाण्यज्ञापनरूपादित्यर्थः । अख्यातिपक्षे बाधव्यवस्थामाह मूले तस्मादिति । मूले व्यव
हार इति । प्रवृत्त्यादिरूप इत्यर्थः । उपपद्यते न भ्रमे प्रवृत्त्याद्यभावात्कथं बाध इत्यत आह । मूले उपपद्यते इति । अन्यथा
ख्यातौ दोषान्तरमाह । मूले तदीयत्वेनेति । तदन्तदनतद्भिन्नावगाहित्वस्वभावत्वाच्च इत्थंत्वेन तदन्यानवगा
हित्वस्य भावत्वाद् इत्यर्थः । नचोत्तरीयमिति मूलं । स्वतंत्रोत्तरयविषयकमेव न वेत्यर्थः । मूले सम्मूढेति । इदं रजतं

इदं रजतत्वेऽ इत्याकारकत्वापत्तेरित्यर्थः· मूले परस्मिन्निति· तद्भिन्नेतदनाश्रये वा तद्भिन्नं तदवृत्ति वा तदभे
देन तदवृत्तितया वा न प्रकारतेत्यर्थः· विषयमिति मूलं· यस्मिन् यत्संबंधावच्छिन्नो यस्य सा वस्तुस्मिंस्तेन
संबंधेन ज्ञानस्य तद्विषयकत्वासंभवेन ज्ञानाकारस्य तमेव रजतमुद्दिश्य व्यवहारेति साकारत्वापत्तिरित्यर्थः· दो
षादन्यत्वं स्वरूपसत् ज्ञानं वा विश्वासबीजं· आद्ये मूले त्वमादिति· द्वितीयं निषेधति मूले नापीति· प्रवृत्तोत्वि
ति· न च त्वाद्वाभासादिस्थले शाब्दज्ञानाद्यनुपपत्त्यायोग्यत्वासंसर्गाग्रहादेर्हेतुत्वं कल्प्यतामिति वा वी·
ज्यसंसर्गाग्रहेण व्यवहारोपपत्तेस्तत्र शाब्दज्ञानाद्यनुपपत्तावपि द्रुतत्वाभावात्· प्रवृत्तेस्तु सर्वजनीनतया·
पत्त्यायोगादिति भावः· ननु नस्मकृदोषस्य बहुतरान्नपानतदाद्रूपविपरीतकार्यजनकत्वं दृष्टमित्यत आ
ह मूले न सम्यक्त्वमिति· मूले नूकृवदिति· स्पर्शाविशेषानन्यतोव्याहतेत्यर्थः· मूले साकरेति· साकारत्वेत्यर्थः· मूले
संविदिति· संविदित्याभावेनार्थः· मूले यतोऽन्यथाख्यातिरिति· ख्यातिरन्यथाव्यधिकरणप्रकारिकाय तो नष्टेतियोजना·

प्र॰म॰ यत्किंचिद्व्यधिकरणप्रकारकत्वस्य सत्यज्ञानेपि सत्त्वान्निषेधायोग इत्यत आह॰ नपरस्यरेति॰ स्वप्रकाराधिक
रणावृत्तिप्रकारकं स्वविषयताधिकरणावृत्तिप्रकारकं वा नेत्यर्थः॰ तत्रपदेति॰ सुखत्वदुःखाभावत्वप्रकारकत्वे
160 नेत्यर्थः॰ नवाननुगमः॰ निरूपधीच्छाविषयतावच्छेदकत्वेन द्वयोरनुगमादित्यर्थः॰ पदविकल्पनियाधर्मपदकं
प्रयोगमाह॰ मूलेज्ञानत्वमिति॰ व्यधिकरणप्रकारकेच्छावृत्तिगुणत्वादौ व्यभिचारान्मूलेमात्रपदं॰ नचवज्ञानवृ
त्तित्वांशवैयर्थ्यादाह॰ ज्ञानान्येति॰ यद्यपिविषयतयानिरस्तत्वान्न द्वारितु साध्यस्याप्रसिद्ध्यानेदमनुमानंतथा
पिविषयतावादिमतेनेदमुक्तमितिभावः॰ प्रमात्वेत्वमनिष्ठतयासाध्यासंदेहादाह॰ इदंप्रमात्वेति॰ सकलांश
प्रमामात्रवृत्तिधर्मवदित्यर्थः॰ नचवस्तुरितिमूलेप्रथमज्ञानपदंसंपातायातं॰ द्वितीयंसंयोगमादायप्रसिद्धसा
धनवारणाय॰ विषयतानापन्नस्यचजनकत्वंविवक्षितमतःसामान्यप्रत्यासत्तीभूयवस्तुषामानसज्ञानजन
नान्नदोषइतिध्येयं॰ अत्रचाक्षुषातिरिक्तज्ञानजनकत्वेबाधादसत्यज्ञानजनकत्वंपदधर्मताबलाल्लिध्य

ति। न च शरीरत्वं भवतीति। वस्तुतश्चारं चरणत्वेन तत्तादात्म्यारोपे शंकायां दोषाभावात्। न च विषयतयेति
मूलोपरिदं न भवतिशारीरांश इति पंक्तिकयोर्व्यत्ययश्च लेखकप्रमादकृतः। ननु। अभावद्वयाघटितः क
रचरणवद्विशेष्यकशरीरज्ञानत्वरूपः। विशेषादर्शनमूलकत्वात् विशेषदर्शनाजन्यत्वात् एवमयेपि। अ
नवस्थैवेति मूलं। अनुव्यवसायस्य प्रामाण्यमनुव्यवसायान्तरग्राह्यमिति मिश्रमतेप्यनवस्थाऽदुष्टा। ननु
हेतौ ज्ञानपदस्यानुव्यवपरत्वात्तस्मात्तो व्यभिचार इत्यरुचेराह। साध्य इति। अनुव्यवसायाग्राह्यत्वेनेति। ग्राह्य
त्वे वा धूमवत्वांशे संशयानिश्चयाभावादसिद्धिरेवेति भावः। करादिमद्विशेष्यकत्वमिति विशेष्यत्वांशस्याग्रहात्
ग्रहेपि वा तद्वत्वांशे संशयानिश्चयोऽभावादिति भावः। इदं चोपलक्षणं करादेः पुरुषत्वव्याप्यत्वाग्रहेपि विपद्बा
धकान्तरेणाप्तवाक्येन वा करादिमद्विशेष्यकपुरुषत्वज्ञानत्वस्य प्रामाण्यव्याप्यत्वग्रहसंभवात् पूर्वपक्षाशं
कितमपि कश्चित्संभवतीति ध्येयम्। उपनीतप्रामाण्यभानात्त्वतस्त्वं। अग्निमात्रनिश्चयप्रमात्वस्येति शेषः। धूमवद्वि

शेष्यकत्वमिति · न च धूमवद्विशेष्यकत्वस्यानुव्यवसायेनग्रहेऽपि प्रामाण्यव्याप्यत्वेनाग्रहात्कथं प्रामाण्यशं-
कानिवृत्तिरिति वाच्यं · धूमवद्विशेष्यकत्वावच्छेदेन वह्निज्ञानस्य प्रामाण्यग्रहाद्व्यावर्त्तकधर्म्मग्रहस्यापि सं-
शयविरोधित्वात् · प्रामाण्यव्याप्यत्वमपि यत्र देववशोपनीतमनुव्यवसाये भातं तदभिप्रायो वायं ग्रन्थ इत्यपा-
स्तः · प्रामाण्यज्ञाने प्रामाण्यशंकानिरासे · यत्तु व्यवसाय इति मूलं · व्यवसाये क्वचिद् प्रामाण्यशंकाकृत्विन्नेति
यत्तत्त्वयापि वाच्यमिति योजना · एवमनुव्यवसायस्येति मूलं · अनुव्यवसायत्वस्येत्यर्थः · न ह्यानं च व्यावर्त्तकधर्म्मा-
ज्ञानत्वेन शंकाविरोधीति भावः · विशेष्यनिष्ठेति मूलं · तद्वति तत्प्रकारकत्वादिकमादिपदार्थः ॥ छ ॥ ॥ छ ॥
इति ज्ञप्तिवादः ॥ छ ॥ ॥ छ ॥ उत्पादकस्य यथार्थविशेषदर्शनादेः सार्वत्रिकत्वाभावादरुचिप्रकाशायत्व-
न्यत्त्विति · मूले स्वतस्त्वस्य विवरणं ज्ञानसामग्रीमात्रादिति · ननु प्रमाऽप्रमयोर्वैलक्षण्याद्गुणदोषजन्यत्वे उक्तो
अप्रेत्यादिना · अन्वयव्यतिरेकान्यथासिद्धिप्रतिपादनमसंगतमित्यत आह · नत्विति · अनन्यथासिद्धान्वय

तीतिभावः· इंद्रियत्वादितिमूले शब्देतरेत्याद्यंशवैयर्थ्यात् ज्ञानकारणमनःसंयोगाश्रयत्वादित्येवविव
क्षितं· तत्रपरमाण्वादौव्यभिचाराज्ज्ञानकारणेति· अनुत्पादिततादृशज्ञानेचक्षुषिघटादौवस्वरूपयोग्य
तासत्वान्नांशतोबाधव्यभिचारौ· प्रतिरोधइतिमूलं· अत्रपरस्पराभावप्रकारकत्वसमानविशेष्यकत्वाभावेपि
विषयविरोधमात्रेणकेवलान्वयिनावसत्प्रतिपक्षत्वं द्रष्टव्यं· निरुपधित्वमेवविपक्षबाधकमित्यतआह· चाक्षु
षेतिमूलं· बाधइति· रासनादेरजनकत्वादित्यर्थः· ज्ञानेत्युपलक्षणं· चाक्षुषसत्यज्ञानातिरिक्ताजनकत्वेनेत्यपिद्र
ष्टव्यं· तत्रापिसंयोगादिकमादायसिद्धसाधनसंभवात्· ननुविषयभेदाग्रहसत्वेज्ञानयोर्भेदग्रहेकथंतत्प्रवृ
त्तिरित्युपसंहारमुखेनतन्निरस्यति· मूलएवमिति· मूलेतादृगिति· तथाव्यवहारजनिकेत्यर्थः· मूलेअतइति·
संवादग्रहादित्यर्थः· मूलेतद्योग्यत्वादिति· योग्यतावच्छेदकेचाविद्यमानासंसर्गाग्रहत्वविद्यमानासंसर्गाग्रहत्वे
इतिभावः· अतिप्रसंगेतिमूलं· भेदग्रहस्थलइतिशेषः· धर्ममात्रेति· अवच्छेदकमात्रेत्यर्थः· नहीति· तद्वांशस्य

प्र॰म॰

162

सत्त्वानिश्चयाभावाद्विशेष्यत्वांशस्य ग्रहाभावाद्वानस्य तत्त्वमित्यर्थः॰ असंभवेनिश्चयासंभवेन॰ यथा चैतत्तथोक्तम॰
शक्तिवादे॰ ननु परमते वैशिष्ट्यस्य विशिष्टज्ञानाविषयतया कथं ज्ञानविशेषत्वं उच्यते॰ तन्मते विशिष्टधियो वैशि
ष्ट्यांतराविषयकत्वेपि धर्मधर्मिभावरूपवैशिष्ट्यविषयकत्वमस्त्येव॰ कथमन्यथाप्रामाण्यं स्वतो ग्राह्यमिति॰ ला
घवमिति॰ तद्धेतोर्नियतपूर्ववर्त्तित्वमन्यथासिद्धिचतुष्टयरहितत्वं च लक्षणं॰ न तु तस्यातिलाघवमित्यर्थः॰ तत्कार्येति॰
नियतपूर्ववर्त्तित्वेनान्यथासिद्धिचतुष्टयरहितत्वेन च तद्धेतोरुपस्थापकं तत्कार्यातिरिक्तं च यत्तज्जन्यत्वस्य
र्थः॰ तथा च गेदाग्रहस्य प्रकारांतरेणाकविदुपस्थितावपि न तद्धेतोरिति न्यायावतारः॰ उक्तलाघवाभावादिति भा
वः॰ हेतुरिति॰ केषांचिन्मतमिति शेषः॰ मूले तत्कल्पनेति॰ विशिष्टज्ञानोपस्थित्यधीनोपस्थितिकत्वेन प्रथमोप
स्थितविशिष्टज्ञानकारणताग्रहसमये गेदाग्रहस्यानुपस्थितेरित्यर्थः॰ अत्राशंकां निराकरोति मूले नन्वेति॰ न
न्वेवं द्वित्वादौ कर्तृद्वयसिद्धिरपि स्यात्॰ तादृशफलेसति गौरवप्रतिसंधानात्॰ अपतत्र तज्जातीयस्यान्यत्वेव

गुरुत्वग्रहस्तदात्मसापेक्षयाकल्प्यजातीयस्याप्यन्यत्रैव गुरुत्वग्रहः स्यादत आह· मूले प्रमाणवदिति· लाघ
वोपष्टब्धप्रमाणेन विषयीकृतेर्थे उत्तरकालीनं तज्जातीयविषयकं गौरवज्ञानं न दोषाय· न च कल्पनीयं तादृ
शप्रमाणविषय इति भावः· तर्कितं च गौरवं यथा न दोषस्तथा परामर्षे वक्ष्यते· प्राथमिकत्वनियमेपीत्यपिरभ्यु
पगमवादे· भावे इति· भ्रमस्थले परस्परवैशिष्ट्यविषयकत्वस्य ज्ञानवित्तिवेद्यत्वसत्त्वादित्यर्थः· किमनेन
त्युक्तं उपायस्योपायान्तरादूषकत्वादित्यरुचेराह· किं चेति· चरमोपस्थितेः सहकारित्वाभावादिति दूषय
ति· नेदं ग्रह इति· द्वितीयं सामग्र्यात्मकं· तद् संसर्गाग्रहस्येति· योग्यतालिंगयोरसंसर्गाग्रहस्येत्यर्थः· उक्तेति·
प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुत्वेत्र भ्रमस्थले विशिष्टधीहेतुत्वाभावरूपाया अनुपपत्तिरुक्ता तस्या इत्यर्थः· वै
षम्यं चोक्तं· अथेति· पश्चादुपस्थितस्य सहकारित्वमेवेत्युक्तमाशंक्य निषेधति· न चेति· बाधकं यावदस्तु अनव
स्थानं· वैपरीत्यमिति· दंडिनिष्ठहेतुत्वं ज्ञाननिष्ठवैशिष्ट्यविषयकत्वं कारणं दंडज्ञानेतु कारणतावच्छेदकेत्यर्थः·

प्र॰म॰

163

कारणमात्रेति॰ विनिगमनाविरहादुभयोर्हेतुत्वे हेतुतावच्छेदकत्वेच सर्वकारणामवच्छेदकमिति कारण
मात्रं किमपि न स्यादित्यर्थः॰ चक्राभावाभावादेरिति॰ चक्रस्याभावो यस्मात्स चक्राभावस्य चक्रविरोधी तदभावस्ये
त्यर्थः॰ आदिपदाद् दण्डत्वविरोध्यभावसंग्रहः॰ अयं भावः अवच्छेदकसत्वं कारणसत्वं च कार्यप्रयोजकं ननु
तदुभयविरोध्यसत्वं दण्डत्वविरोध्यभावस्य चक्रविरोध्यभावस्य च प्रयोजकत्वापत्तेरिति॰ दण्डत्वाभावे चक्रस
द्भावे च फलाभावे चक्राभावादेरिति पाठेपि चक्रपदयोः पूर्वं नञोः प्रश्लेषात्स एवार्थः॰ अचक्राभावादेरित्य
त्र चक्रविरोध्यभावस्य आदिपदेन दण्डत्वविरोध्यभावस्य च विवक्षितत्वादिति॰ भेदग्रहे भेदग्रहस्य लाघववि
शिष्टज्ञानाभावे॰ किं चेति॰ योग्यत्वासंसर्गग्रहस्य योग्यभेदग्रहस्य योग्यत्वात्यंताभावासंसर्गाग्रहस्य योग्यभे
दासंसर्गाग्रहस्य च प्रतिबंधकस्य बहुविधत्वादिति भावः॰ अवच्छेदकचकल्पने पूर्वोक्तं दोषद्वयमुद्धरति॰ न
चेति॰ नञ्चिति॰ भ्रमस्य लघवृत्तिप्रतियेन कारणत्वं कल्प्यतेन तस्य वैशिष्ट्यविषयकत्वमुपस्थितमित्यर्थः॰

प्रामाण्येति· निश्चयं प्रवृत्तिं प्रति प्रामाण्यग्रहस्य प्रयोजकत्वादिति भावः· ननु सकंप प्रवृत्तिं प्रत्येव यदि
प्रथमं कारणत्वं गृह्यते तदा का गतिरित्यत आह· आद्येति· अप्रमापि भ्रमेत्यवगृह्यत इति वदतोर्महं मुरारि
मिश्रयोर्ज्ञानविज्ञेयघटत्ववादिनश्च नैयायिकस्य तत्रापि प्रथमोपस्थितत्वाद्वैशिष्ट्यविषयकत्वमेव कारणताव
च्छेदकमित्यर्थः· गुरुविप्रतिपत्त्याल्याह· मा वास्त्विति· अनुभवबलेन पूर्वोक्तां वस्तुगतिं दृढीकरोति· विसंवादी
ति· गौरवं लाघवोपन्यासे· आदिपदेन पौनरुक्त्यमग्रेतनप्रत्यक्षोपन्यासे· अनुभूयत इति· विप्रतिपत्त्यान्न
नुभवस्योपन्यासानर्हतया लाघवोपन्यासेन गौरवं· अत्र लाघवस्यैव प्राधान्यादनुभवतात्पर्याभावान्न पौन
रुक्त्यमित्यर्थः· तदभावेति· तदभावं रूपयति साधयतीत्यर्थः· स्मृत्योरिति· स्मृतिविषययोरित्यर्थः· अयुगपज्ज्ञा
वेति· अयुगपत्स्मर्तृत्वे त्वर्थः· नियमात् नानापदार्थविषयकसमूहालंबनं विनागत्यभावात्· प्रथमं संस
र्गस्य परान्वयपदार्थद्वयघटितं तद्वाक्यार्थबोधे· चरमं परस्परान्वितबहुपदार्थघटितवाक्यार्थबोधे· त

प्र·म· त्रसमूहालंबनस्मृतिं विनागत्यभावादिति भावः· अत्र वदंति· योग्यताविशिष्टज्ञानं शाब्द इव विशिष्टज्ञानं
प्रवृत्तौ कारणमिति प्रतिबंदिरयुक्ता योग्यताविशिष्टज्ञानस्य कारणत्वकल्पने नानावाक्यस्थले तत्कल्पनागौ
16५ रवाभावात्· तत्र शाब्दानुत्पत्तेरिष्टत्वात्· प्रवृत्तिं प्रति तु विशिष्टज्ञानस्य हेतुत्वकल्पने भ्रमस्थले प्रवृत्त्यनप
लापात्तदनुरोधेन विशिष्टज्ञानकल्पनायां गौरवात्· यत्र भेदग्रहासंसर्गग्रहादीनां बहुविधतया तावदभा
वहेतुत्वे गौरवमुक्तं· तेषामवच्छेदकत्वेपि गौरवं सूचितं· तन्न· प्रवृत्त्यभावनियतानामभावानामेकस्यैवाभाव
स्य हेतुत्वमित्युक्तत्वात्· यद्वा मण्याद्यभावस्येव अभावस्य न हेतुत्वं तदवच्छेदकत्वे· किंतु शक्तेरवच्छेदकत्व
मिति तत्सिद्धांतात्· सा च नगरीयसी· न च सा नास्त्येवेति वाच्यं· वादांतरत्वात्· यद्वा स्मृतिरूपान्यथाख्यातिरि
वि ति· तन्न· शक्तिविशेषस्यावच्छेदकत्वात्· तेषामप्रतिबंधकत्वात्· विषयविरोधं विनापि अनुमितौ सिद्धेरिव
प्रतिबंधकत्वसंभवाद्वा· यद्वा शाब्देपदयालघुवैशिष्ट्यमवच्छेदकमिति· तन्न· वैशिष्ट्यशाब्दोपस्थितिव

त्वकृतंलाघवंशरीरकृतंवा॰नाद्यः॰नहिवैशिष्ट्यविषयकत्वमात्रंकारणतावच्छेदमपितुपरस्परनिरूपित
वैशिष्ट्यसत्तानिश्चयत्वं॰नचैतावतज्ञानविशिष्टवैयर्थ्यं॰नांत्यः॰परस्परादिघटितत्वेनाखंडशक्त्यपेक्षयास्यैवगुरु
त्वादिति॰अत्रोच्यते॰यत्रइष्टतावच्छेदकप्रकारकत्वेनपुरोवर्तिविशेष्यकत्वेनचज्ञानस्यकारणताकल्प्यतेतद
वावच्छेदकद्वयपुरस्कारेणकारणताद्वयद्वयकल्पनेगौरवादिष्टतावच्छेदकप्रकारकपुरोवर्तिविशेष्यकज्ञानत्वे
नलाघवादेकस्याःकारणतायाःकल्पनमुचितं॰नचयस्यपुंसोभ्रमस्थलेप्रथमंकारणत्वग्रहःसकथंविशिष्टमवच्छेद
कंगृह्णीयादितिवाच्यं॰गृहीतस्यापिकारणताद्वयस्यप्रमास्थलेलाघवादेककारणताग्रहेतेनत्यागात्॰तथाचप्रा
थमिकमेवयदुभयसिद्धोपस्थितिकमेववावच्छेदकंपुरस्कृत्यलाघवंज्ञेयम्॰नचातिप्रसंगानंतरंकारणताग्रहेन
त्वानुभयसिद्धोपस्थितिकंवैशिष्ट्यविषयकत्वमवच्छेदकंपुरस्कृत्ययेनभेदाग्रहादिप्रसक्तिःस्यात्॰नचेदंज्ञानमेवप्र
वृत्तिकारणमिष्टज्ञानंतुभेदाग्रहहेतुतावच्छेदकंतुउभयमपिवाज्ञानमवच्छेदकमेवतन्मतेऽतःकथमेतदितिवाच्यं॰

प्र॰म॰ एवं सति वह्निनिष्ठप्रतिबंधकाभावस्य हेतुत्वापत्त्या वह्न्यादेरहेतुत्वापत्तेः सुतरां गौरवाच्च· प्रवृत्तिजनन
इवेच्छाजननेपि लाघवं दृष्टत्वं· यत्र परस्परनिरूपितधर्मत्वधर्मित्वाभानं भिन्नज्ञानविषययोरपि तयावता द्व
याधर्मत्वविषयकत्वमेव कारणतावच्छेदकमिति मतं· तन्न· तन्निरूपितधर्मत्वस्याभावादभानेन तदगृहीतासं
सर्गधर्मत्वे वक्तव्ये गौरवादिति· किंचागृहीतासंसर्गोभयविषयकस्मृतेस्तादृशधर्मत्वधर्मित्वावगाहित्वमपि
मेतव्यमेव· असंसर्गाग्रहस्यैव तत्र नियामकत्वादिति सैव स्मृतिरन्यथाख्यातिरिति ध्येयम्· किंचातीतानागतका
लानवगाहिज्ञानसामग्र्याः स्वातंत्र्येणैव वर्त्तमानकालग्राहकतया अतीतानागतत्वेनागृह्यमाणस्यावर्त्तमानस्य
ग्रहे वर्त्तमानत्वमवश्यं भासत इति सामग्र्या बलादेवान्यथाख्यातिसिद्धिः· किंच योग्यतायामुपस्थितायां तदसंस
र्गाग्रहस्य शाब्दबोधहेतुत्वं त्वया वाच्यं· न तु योग्यताविशिष्टज्ञानस्य प्रागनुपस्थिते पूर्वे स्वर्गकामनियोज्यकत्वज्ञाना
संत्वेव प्रसंगात्· तत्र योग्यताविशिष्टज्ञानाभावादिति शाब्दसामग्र्याः सत्वादनाप्तवाक्यादन्यथाख्यातौ न बाधकमि

165

तिदिक्॰ प्रमाणमेवाह॰ मूले एवं वेति॰ हेतुत्वाभावं निरस्यति॰ मूले अनन्यथासिद्धेति॰ दोषस्य विपरीतकार्य
जनकत्वे मानहेमो॰ मूले सर्वत इति॰ मूले विपरीतवद्व्यक इति॰ रंगरजतयोरिमे रजते रंगेन मे रंगरजते
इत्यत्र सम्मुग्धालंबनात्मके भ्रम इत्यर्थः॰ ननु निषेधांशस्योपादानं व्यर्थं॰ रंगे रजतभेदाग्रहात् रंगत्वे भेदाग्रहा
द्धि रजतार्थिप्रवृत्तिनिवृत्त्योः रजते रंगभेदाग्रहात् रजतभेदाग्रहाच्च रंगार्थिप्रवृत्तिनिवृत्त्योर्विध्यंशमात्रेणैव सं
भवादिति चेन्न॰ न॰ निषेधानुपादाने परेणानैयायिकं प्रति रजतस्य संशयापादनस्य ममेत्यादिना वक्ष्यमाणो
निरासो न स्यादिति निषेधोपादानादिति॰ ननु तदुपादाने पुरोवर्तिन्यग्रहीतासंसर्गानिष्ठरंगभेदस्याग्रह
सत्वात् निष्ठस्य रंगस्य नास्तित्वख्यातंत्र्यमिति कथं रजतार्थिनिवृत्त्यापादनं॰ किंच रजतार्थिप्रवृत्तिमात्रापादनयुग
पद्दित्ययुक्तं निषेधोपादाने रजतं नेति रजतादिरूपोपस्थितस्य रजतभेदस्यान्यथाख्यातित्रिया रंगअसंस
र्गाग्रहसत्वात् रजते स्वातंत्र्याभावात्॰ एवं रजतेऽपि कथं रंगार्थिनिवृत्तेरापादनं॰ कथंच रंगार्थिप्रवृत्त्यासह

प्र·म· युगपदितियुक्तमितिचेत्· न· पुरोवर्त्तिनिवृत्तित्वेनानुपस्थितत्वं स्यात्तं प्रमादाय प्रवृत्तिमुपेत्य निवृत्त्यापा
दनसंभवादिति· वस्तुतस्तु निषेधांशोपादानमनकार्यमेव· कथं तर्हि ममेत्यादिग्रन्थः· इत्थं· दोषमहिम्नानिश्च
165 यजनकदोषविशेषमहिम्ना न संशयः भेदग्रहादिवेति तदर्थः· एवं सति मूले वक्ष्य पदं कथं योग्यमिति
चेत्· रंगे रजतार्थिप्रवृत्तिः रंगार्थिनिवृत्तिः रजते रंगार्थिप्रवृत्तिः रजतार्थिनिवृत्तिश्चादाय वक्ष्य निर्देशाः· न
तु विधिद्वयं निषेधद्वयं वादाय· अत एव इमे रंगरजते इत्याकारकमेव मूलमिति· एतच्च सर्वमापाततः· यदीमे
रजतरंगे नेमे रंगरजते इति भ्रमस्तदा पुरोवर्त्तिग्रहीतासंसर्गभेदाविशेषणत्वरूपस्यातत्त्वं रंगादिशिरंगस्य नास्ती
ति तत्र रजतार्थिनिवृत्त्यादनासंभवात्· न च रजतस्याप्यन्यथाख्यातित्रियापुरोवर्त्तिग्रहीतासंसर्गभेदविशेषणे
त्वादस्यातत्त्वाद्रंगे रजतार्थिप्रवृत्तिर्न स्यादिति वाच्यं· दोषात्पुरोवर्त्तिन्यगृहीतासंसर्गोयो भेदः तदविशेषणत्वस्य
विवक्षितस्य सत्वात्· एवं रजतादिस्थपि ज्ञेयम्· यदि तु इमे रजतरंगे इत्येव भ्रमः तदा रंगस्य च तत्त्वोपस्थितावपि द्वा

षहेतुकानिष्टप्रसंगस्य हस्यनिवर्त्तकत्वेनाभिमतस्य रंगत्वादिव्याप्यभावान्न रजतार्थिनिवृत्त्यापादनं·एवं रजतेपि नरं
गार्थिनिवृत्त्यापादनमिति·तस्मात्सर्वोक्तमुक्तावेव तात्पर्यमिति दिक्·ननु न्यायनये द्वित्वस्य व्यासज्यवृत्तितया
यावदाश्रयग्रहविषयतास्तु·प्रत्येकपरिसमाप्तद्वित्ववादिमते तु कथमित्यत आह·तस्येति·स्मरणद्वयस्येति·
इदंत्वेन धर्मिद्वयगोचरस्य रजतत्वेन रजतगोचरस्य रंगत्वेन रंगगोचरस्येति भावः·उक्तेति·क्रमोत्पन्नत्वादि
नोक्तस्य रजतरंगस्मरणयोः क्रमिकत्वस्येत्यर्थः·अनेन·इदं रजतयोरिदं रंगयोश्चैकैकस्मृतिविषयत्वेन·द्वयोः
इदंत्वावच्छिन्नयोः रजतत्वावच्छिन्नरंगत्वावच्छिन्नयोश्चेत्यर्थः·मूले अन्यथेति·रंगधर्मेण रंगरजतयो रजतधर्मेण
रजतरंगयोश्चोपस्थितावित्यर्थः·मूले उभयज्ञानमिति·रंगं रजतं चेति संशयरूपमित्यर्थः·यद्यपीदं दोषविशेष
महिम्नापरिहृतं तथापि विलक्षणदोषमानं नास्तीत्यभिमानादेवमुक्तं·मूले त्राद्वेति·ननु प्रवृत्तिविषयप्रत्यक्षस्य
हेतुत्वात्कथमेतत्·मैवम्·प्रत्यक्षोपस्थितधर्मिणि इष्टतावच्छेदकोपस्थितिः प्रवर्त्तिका न तु तस्याः प्रत्यक्षत्वमपि तु

प्र॰म॰ त्वमितिभावात्॰ अनुभूयमानारोपस्य प्रामाणिकत्वमभिप्रेत्याह॰ मूले ममत्वितिति॰ एकधर्माद्युभयोपस्थिता
वपीत्यभ्युपगमवादः॰ भ्रमस्थले एकधर्माद्युभयोपस्थित्यभावादिति॰ ननु दोषस्याननुगमेभ्रमं प्रत्यपि कथं
186 हेतुत्वमित्यत आह॰ मूले तत्रान्येति॰ जातिभेदघटितभ्रमत्वरूपभ्रमत्वावच्छेदेन तेषां हेतुत्वमितिभावः॰ संवादी
ति॰ तथा च प्रतिबंधकतानानुगतानामपीतिभावः॰ मूले उत्कटत्वेति॰ जातिद्वयस्य समूहालंबनोभयरूपेच्छायां
संकरादितिभावः॰ मूले स्यादेतदिति॰ अत्र संवादिविसंवादिप्रवृत्त्योरित्युपलक्षणं॰ ताहशनिवृत्त्योरित्यपि
द्रष्टव्यं॰ तेन पूर्वप्रस्तुतेन प्रवृत्तिनिवृत्त्यापादनेन सह संगतिः॰ यथ द्वारंगत्वे दाग्रहस्य रजतार्थिनिवृत्तिजनक
त्वं रंगार्थिप्रवृत्तिसामग्रीत्वेन अंतस्तद्वद्दूष्यत इति भावः॰ मूले लाघवात्त्वादिति॰ सत्यस्थले विशिष्टज्ञानस्यासत्य
स्थले तदाग्रहस्योभयसिद्धत्वादित्यर्थः॰ मूले सत्यत्वासत्यत्वे इति॰ प्रयोजक इति शेषः॰ मूले गौरवादसिद्धेश्चेति॰
भ्रमास्थले सत्यत्वविशेषणाप्रवेशे गौरवात् भ्रमस्थले सत्यज्ञानासिद्धेरित्यर्थः॰ मूले प्रवृत्तिनिवृत्तीति॰ वैशि

ध्यस्यावच्छेदकत्वे गौरवादिति भावः॰ कारणतेदव्यवस्थापनफलमाह मूले एवमिति॰ कारणसत्त्वे कार्या
वश्यकत्वमभिप्रेत्य शंकते॰ मूले अथेति॰ तत्र गुरुणाभिसंधिराह॰ मूले विसंवादिनीति॰ अभिसंधिमविद्वानाह॰ अ
मूले अत एवेति॰ अभिसंधिमुद्घाटयति॰ मूले मैवमिति॰ ननु निवृत्तिप्रवृत्त्योरिष्टानिष्टविषयकत्वमपि बलात्स्यादिति
चेत्॰ न॰ नहि सामान्यकारणमात्रात्कार्योत्पादनमपि तु विशेषकारणसहितात्॰ अन्यथा रजतविशेष्यकरजतत्व
प्रकारकज्ञानादपि रंगे संवादिनी प्रवृत्तिः कुतो नापाद्यते॰ रंगविशेष्यकरंगत्वप्रकारकज्ञानस्य तादृशप्रवृत्ति
प्रति विशेष्यकारणस्यासत्त्वादिति चेत्॰ तर्हि हापिततत्र विद्यमानभेदाग्रहस्य विशेष्यकारणस्यासत्त्वान्न विसं
वादिनी प्रवृत्तिरिति तात्पर्यं॰ मूले ज्ञानं स्वविषय इति॰ अत्र फलेच्छाद्वारा फलज्ञानं प्रवर्तकमिति मतं तन्निवर्त्यं ज्ञा
न विशेषणं देयं॰ वस्तुतः फलज्ञानस्य फलेच्छाद्वारा न प्रवृत्तिहेतुत्वं इष्टसाधनताज्ञानेऽवच्छेदकतया अन्यथासि
द्धत्वेन फलेच्छाया एव हेतुत्वात्॰ न च पाकसाध्यत्वज्ञानविषयोदनेच्छाया एव हेतुत्वे साधनत्वज्ञानस्यावच्छेदकत्वे

प्र·म·

साधनत्वज्ञानस्यावच्छेदकत्वे वैपरीत्यमेवास्त्विति वाच्यं· भिन्नविषयत्वादिति भावः· कारणतावच्छेदकमिति मूले·
यद्यपि ज्ञायमानेष्टभेदग्रहाभावस्य कारणत्वे रजतादौ ज्ञानभेदच्छायामपि प्रवृत्त्यापत्तिः· तथापीष्टज्ञानकालीनइष्ट
भेदाग्रहः कारणमित्यनुयोगग्रंथो इष्टज्ञानस्यावच्छेदकत्वं इष्टत्वं· ज्ञानद्वयापत्तिः ज्ञानविषयभेदापत्तिः इष्टज्ञान

167

स्य इदं विषयकत्वाभावापत्तिरितियावत्· अन्यथा ज्ञानभेदे न ज्ञानभेदापादानस्यासंगतेः· ननु विशिष्टज्ञान
स्य हेतुत्वेपि कथमिष्टज्ञानाभिन्नत्वस्यावच्छेदकत्वमित्यत आह· त्वन्मत इति· तथाप्येकत्वस्यावच्छेदकत्वेपि ना
भेदस्य तत्त्वमित्यत आह· एकत्वस्येति· इष्टज्ञानाभिन्नत्वस्यावच्छेदकत्वाभावमुपपादयति· इहचेति· नन्विदम
युक्तं इष्टज्ञानाभिन्नत्वस्यावच्छेदकतायामात्माश्रयाभावात्· न चेदं ज्ञानाभिन्नत्वस्याप्यवच्छेदकत्वापत्तिरस्म्या
दिति वाच्यं· तथापीष्टज्ञानस्यावच्छेदकत्वानपायात्· इदं ज्ञानस्य विसंवादिप्रवृत्तौ कारणत्वकल्पनेन विनि
गमनसंभवाच्चेति· मैवम्· इष्टज्ञानस्यावच्छेदकत्वेपि इदं ज्ञानत्वेन कारणत्वात्· पुरोवर्त्तिविषयकत्वसिद्धेरि

तिभावात्। वस्तुतस्तु इदंज्ञानस्य इष्टविषयकत्वमेव कारणतावच्छेदकं लाघवात् न तु विषयकज्ञानादि
न्नत्वं गौरवादिति भावः। अत्र प्रथमव्याख्याने ऽभेदेनेत्यादिमूलस्य कारणताभेदेन अवच्छेदकत्वमात्राभा
वात्। इदंज्ञानत्वेन तस्यैव कारणत्वादित्यर्थः। द्वितीये ऽभेदेन रूपेण अवच्छेदकत्वाभावात्। इष्टविषय
कत्वस्यैव लाघवादिदंज्ञाने कारणतावच्छेदकत्वादित्यर्थः। न त्वितरेति मूलं। न हेतुतावच्छेदकमात्रमित्य
र्थः। तदाग्रहत्वेनैवेति। स्वतंत्रान्वयव्यतिरेकाननुविधायित्वे सति यदवच्छेदकत्वं तदेव कारणे इष्टज्ञाने
वार्यते। न तु सामान्यतस्तत्त्वावच्छेदकत्वं इष्टाज्ञानकाले तदाग्रस्यातिप्रसक्त्या इष्टज्ञानावच्छेदकत्वस्या
वश्यकत्वादिति। मूले इष्टज्ञानमिति। स्वतंत्रान्वयव्यतिरेकाननुविधायीतिशेषः। स्वतंत्रान्वयव्यतिरे
काननुविधायिनोऽप्यन्यथासिद्धौ तेजोगतानुद्भूतरूपादेरपि तत्तापत्तिरिति भावः। न हीति नापि मूलयोः साहित्य
प्रतियोगिनोऽन्वयाद्यनुविधायिनोऽन्वयाद्यनुविधायिनः साहित्यप्रतियोगिनान्यथासिद्धिरित्यन्यथासिद्धौ

प्र॰म॰

168

र्भेदः॥ अन्यथापीति॥ नियमं विनापीत्यर्थः॥ प्रकारांतरेति॥ नन्विदमयुक्तं॥ एतावता हि प्रतियोग्यंशे रजत
ज्ञानमवच्छेदकं लभ्यते॥ तत्र च रजतताज्ञानकाले ऽतिप्रसंगात् अनुयोग्यंशे रजतज्ञानमवश्यमादरणीयं॥
तस्य चावच्छेदकत्वाभावेनान्यथासिद्धत्वादिति चेत् न॥ यज्जातीयस्यान्वयाद्यनुविधायितावच्छेदक
त्वं तज्जातीयं सर्वमन्यथासिद्धमित्याशयात्॥ दृष्टविशिष्टेति॥ इदं च प्रागुक्तविशिष्टज्ञानकारणतास्मा
रणपरत्वं किं चेति मूलस्याभिप्रेत्योक्तं॥ वस्तुतस्तु दृष्टज्ञानं प्रथमत एव कारणत्वेन गृह्यते कारणताद्व
यगौरवादिति यन्मयोक्तं तत्परतयाप्याहुस्तत एव मूलग्रंथः॥ मूले ऽत एवेत्याद्यन्यथाख्यातिसाधनं न संभवती
तियोजना॥ मूले विपरीत इति॥ न च दत्तिमतव्याप्तावितिशेषः॥ मूले सामग्रीसत्त्व इति॥ व्याप्तेः कारणविघ
टकत्वादिति भावः॥ मूले स्मरतेति॥ प्रमुष्टतत्ताकस्य स्मरणस्य रजतत्वेन रंगत्वेन च विषयाभ्यां रजतरंग
विशेषाभ्यामित्यर्थः॥ अन्यथा इदं रजतं तत इदं तत्त्वमित्याद्याकारकभेदग्रहस्य प्रतिबंधकत्वापत्तेरि

ति॰ सामान्यस्य प्रत्यासत्तेरिति कोर्थः॰ संस्काराधायकज्ञानजनकसामान्यस्येति वा सामान्यप्रकारकसंस्का
रस्येति वा स्मरणजनकमनःप्रत्यासत्तीभूतसामान्यस्येति वा स्मरणजनकसंस्कारप्रत्यासत्तीभूतसामान्य
स्येति वा॰ तत्राद्ययोः संस्कारस्य सकलगोचरत्वपर्यवसानेपि प्रतिबंधान्न सकलस्मृतिरित्याह॰ मूले तत्रांश
इति॰ तत्र रजतत्वाभ्यां सह संस्कारसंयुक्तसमवाययोः सत्त्वेपि प्रमुष्टतत्ताकस्मरणे रजतगोचररंगज्ञाने
च तयोः स्मृत्यनुभवप्रतिबंधवदित्यर्थः॰ तृतीयमादाय शंकते॰ नन्विति॰ इति भाव इति॰ इदं च समाधिसौ
कर्यादुक्तं॰ सकलरजतप्रत्यक्षेण सकलरजतसंस्काराधानेपि दोषात्तत्प्रतिबंधस्योक्तत्वादिति ध्येयं॰
चतुर्थमाशंकते॰ नन्विति॰ शाब्दस्थल इति॰ शाब्दोपस्थितसामान्यप्रत्यासत्तिस्थल इत्यर्थः॰ शाब्देति॰ शाब्दो
पस्थितसामान्यधर्मावच्छेदेन मानसव्याप्तिग्रहापादावित्यर्थः॰ तत्र रंगत्वाश्रयभेदवदित्यादिज्ञानस्याविरोधि
तया रंगत्वावच्छिन्नप्रतियोगिकभेदवदित्यादिज्ञानस्य स्वाकारेऽन्यथाख्यात्यापत्तिरिति दोषं स्फुटतयोपद

प्र.म.

169 दोषांतरमाह· मूले तन्नेति· मूले अग्रहरूपमिति· अग्रहेणारूप्यते विशिष्यत इति व्युत्पत्त्या ज्ञानसामानाधिक
रण्यमिति ध्येयं· मूले रजतवृत्तितयेति· यो घटादिभेदो रजतवृत्तितयोपस्थितस्तस्य रजतभेदेन सह विद्यमानो
पि भेदो न गृह्यत इति तादृशाभेदाग्रहः प्रतिबंधक इत्यर्थः· मूले पुरोवर्त्तिनिष्ठतयेति· यावतीति भेदविशेषणं·
मूले प्रत्यासत्त्यापीति· इदं च पूर्ववद्व्याख्येयं· मूले अन्ये त्विति· इष्टमिच्छाविषयः सत्यस्थले रजतं भ्रमस्थले रं
गमित्यर्थः· मूले हेतुत्वादित्युपलक्षणं· शाब्दाभासस्थले उक्तसमाधानाभावादित्यपि द्रष्टव्यं· मूले संस्कारेति· इदं
च संस्कारजनकत्वपक्षे स्मृतिजनकत्वपक्षे तु स्मृतीन्द्रियाभ्यामिति द्रष्टव्यं· ननु गुरुमते प्रत्यभिज्ञापि भ्रमव
त्स्यान्न द्वयात्मिकैवेत्यत आह· मूले तस्या इति· एकैकज्ञानस्याभेदानवगाहित्वादिति भावः· ननु तत्तासंस्का
रस्य धर्म्यंशे समानविषयत्वमस्ति· नतु रजतसंस्कारस्य क्वचिदप्यंशे समानविषयत्वमित्यत आह· मूले गौ
रवादिति· एकविषयकत्वस्याप्रयोजकत्व इति शेषः· मूले भेदाग्रहस्येति· इदमुपलक्षणं· दोषस्यापीत्यपि द्र

ष्टव्यं· न चोपनीतेति· न च वक्तव्यमिति योजना· ननूपनीतप्रमायां तथा नतूनीतभानमात्रं इत्यत आह·
उपनीतेति· चंदनांतरेपीति· अगृहीतसौरभेपि चंदने इत्यर्थः· एतच्च वस्तुगतिमनुरुध्योक्तं· सर्वमुपनेयं
स्यात् ज्ञतभानादरेपि इदानीं श्याम इत्यादावन्यथाख्यातौ बाधकाभावात्· नन्वनुव्यवसाये विषय उपनी
तो भासते न च तत्र विषयवत्वग्रहावच्छेदकः कश्चन धर्मो व्यवसाये गृह्यते अतो व्यक्तिचाराज्ञेदमुपनीतभा
नकारणमित्यभिप्रेत्याह· वस्तुतस्त्विति· असंसर्गाग्रहायेति· भेदाग्रहायेति च इष्टव्यं· तादृशधर्मवत्वग्रह
स्योभयप्रयोजकतामाह· अवच्छेदकांतरेति· भेदग्रहसंभवेनेत्युपलक्षणं· असंसर्गग्रहसंभवेन चेत्यपि द्र
ष्टव्यं· ~~तादृशधर्म~~ भेदाग्रहादिति· असंसर्गाग्रहादित्यपि ध्येयं· सवतिः· असंसर्गाग्रहो भेदाग्रहश्चेत्यर्थः· मूले
तच्चेति· तत्तांश इत्यर्थः· इदं च न्यायमतेनोक्तं· गुरुमते मूले तत्तानेत्ति· संस्कारद्वारा प्राचीनतत्ताभासविकल्पकजन्यो
सविकल्पकान्यत्वरूपं साक्षात्वं नास्तीत्यर्थः· षष्ठीसमासत्वमंचारयति· पुरोवर्त्यंशे इति· जातिसंकरमाशंक्याह·

प्र· म·

170

मूले स्मृतित्वमिति· यद्यप्यव्याप्यवृत्तिजातिद्वयपक्षेपि परस्परात्यंताभावसमानाधिकरणजातिद्वयस्यैकत्रस
त्वाज्जातिसंकर एव तथापि तन्मते स्मृतेरपि स्वांशात्मांशयोरनुभवरूपतया जातिसंकरापत्त्या परस्परात्यंताभा
वसमानाधिकरणजातिद्वयस्यैकावच्छेदेनैकस्मिन्नधिकरणे सत्त्वं प्रतियोगिव्यधिकरणपरस्परात्यंताभावसमा
नाधिकरणजातिद्वयस्यैकस्मिन्नधिकरणे सत्त्वं वा संकीर्णत्वम् अवश्यं वाच्यं तच्चात्र नेति भावः· मूले एकं ज्ञानमिति· इ
दमंशेऽनुभवरूपं रजतांशे स्मृतिरूपमित्यर्थः· अनुभवत्वपर्यन्तस्यान्यथाख्यातिशरीरत्वाभावादिति भावः· मनो
जन्यत्वमनुमित्यादावपीत्यत आह· इंद्रियत्वेनेति· अनुव्यवसायेति· तं इमं देवदत्तं साक्षात्करोमीत्याकारानुव्यवसा
यानुरोधेनेत्यर्थः· तथा च गौरवं प्रामाणिकमिति भावः· मूले जात्यसंकरादिति· अव्याप्यवृत्तिजातिपक्षेपि जातिसं
करएव न्यायमते लाघवात्परस्परात्यंताभावसमानाधिकरणजात्योरेकाधिकरणस्यैव तच्छरीरत्वादिति भावः·
रजतरजतत्वयोरारोपमाहेति· मूले नन्विति· मूले रजतेनेत्युपलक्षणं रजतत्वेनेत्यपि ज्ञेयं· स्वमते न दूषयति·

मूलेप्रत्यक्षिज्ञायामिति। तथा च रजतताद्यात्मकतत्तायानामन्यथाख्यातिरूपे साक्षात्कारे बाधकाभावस्त
द्विषयकसाक्षात्कारे तत्संनिकर्षस्य हेतुत्वाभावादिति भावः। यदि च तत्ता~~याद्यात्म~~न्यथाख्यातिरूपे साक्षा
त्कारे बाधका~~भाव~~दिना संस्कारः स्मृतिर्वा सन्निकर्षः कल्प्यस्तदा तन्त्रतेऽपि तथास्त्वित्याह। मूले संस्कारेति। न
च तद्धर्मिकसंस्कारादेस्तद्धर्मिकविशिष्टज्ञानजनने सन्निकर्षत्वात्कथं प्रकृते संगतिरिति वाच्यं। समानधर्मिक
त्वस्य तंत्रत्वे गौरवादिति प्रसंगस्य नेदाग्रहादिहेतुत्वे नासत्त्वादेवमपीदानीं रूपामहं स्यादाद्वन्यथाख्यातौ बाध
काभावाच्चेति। प्रकारान्तरेण कारणबाधमाशंक्य निषेधति। मूले नचेति। मूले रजतत्वप्रत्यक्षे रजतत्वविशेषण
कप्रत्यक्षे। इदमुपलक्षणं रजतविशेषणकप्रत्यक्षे रजतसंयोगस्य हेतुत्वात् तं विना न तदित्यपि द्रष्टव्यं। विशेषण
ज्ञानसामग्रीत्वमिति वस्तुगत्यानुरोधेनोक्तं। प्रकारांतरेणापि सन्निकर्षत्वनिर्वचने तस्यापि हेतुतावच्छेदकत्वे
प्रकृते तद्रूपाभावात्। संस्कारादेः सन्निकर्षस्य सत्त्वात्संयुक्तसमवायस्य तेनान्यथासिद्धत्वाच्चेति। ननु विशेषणज्ञानेति।

ननूपजीव्यत्वेपि रजतात्मतावगाहित्वप्रत्यभिज्ञायां रजतत्वाभावप्रत्यक्षे च रजतसंयोगस्य रजतत्वसंयु
क्तसमवायस्य च व्यभिचारात् रजतविशेषणके रजतत्वविशेषणके च प्रत्यक्षे तयोर्न हेतुत्वमिति कथमस्य वि
षयमिति चेत्. न. गुरुमते तदुभयप्रत्यक्षास्वीकारादस्य विसंवादित्. नन्वेवं विशेषणसन्निकर्षः सामान्य
तो विशेषतश्च न हेतुरित्यागतं. तथा च वह्नेरसन्निकर्षे न वह्निप्रत्यक्षमिति ग्रन्थविरोध इति चेत्. न. न्यायनये
यथार्थं तन्नहि विशिष्टप्रत्यक्षे तत्र तत्संयोगादेर्गुणतया विशेषतो हेतुत्वमिष्यतान्यायेन तदभिधानात्. इदानीं रज
तत्वे वैशिष्ट्यविषयकप्रत्यक्षे रजतत्वसंयुक्तसमवायो रजतवैशिष्ट्यविषयकप्रत्यक्षे च रजतसंयोगो हेतुरित्य
शंकोत्तरत्वेन मूलमवतारयति. नन्विति. घटविशिष्टज्ञानकाले वा कुतो न रजतत्ववैशिष्ट्यविषयकप्रत्यक्षमि
त्यपि द्रष्टव्यं. मूले रजतसाक्षात्कार इति रजतत्वसाक्षात्कारस्याप्युपलक्षणं. मूले रजतसंयोगस्येति. रजतत्वसंयु
क्तसमवायस्याप्युपलक्षणं. एवमग्रेपि मूले टिप्पण्यां च रजतत्ववैशिष्ट्यविषयकप्रत्यक्षे रजतत्वसंयुक्तस

मवायो बोध्यः॥ न त्वेनं रजतसंयोगत्वेनेति॥ विशिष्टज्ञानेति॥ विशिष्टप्रत्यक्षसामान्ये विशेष्यसन्निकर्षत्वेन हे
तुसंयोगत्वेन॥ रजतेति॥ रजतवैशिष्ट्यविषयकप्रत्यक्षस्य यद्विशेष्यं तत्संयोगत्वेनेत्यर्थः॥ नडतत्वेनेत्युक्तौ
मेव विशदयति॥ न रजतहेतुत्वे रजतवैशिष्ट्यावगाहिप्रत्यक्षरूपविशेषतादृशप्रत्यक्षविशेष्यसंयोगत्वे
न विशेषस्य हेतुत्वं ननु रजतसंयोगत्वेनेत्यर्थः॥ ननु रजतवैशिष्ट्यप्रत्यक्षविशेष्यसंयोगत्वेन हेतुत्वेपि रज
तसंयोगत्वेन हेतुत्वे किं बाधकमित्यत आह॥ मूले संयोगस्य विशेष्यत्वानुति॥ विशेष्यसन्निकर्षान्तर्गतत्वेन
कारणत्वे प्रकारान्तरेण हेतुत्वाकल्पनादित्यर्थः॥ अग्रेतनचकारस्य पूर्वत्रानयनात्॥ अत्र हेतुर्गौरवादिति
मूलं॥ तदिदं संयोगस्येत्यादिमूलं योजयति॥ संयोगस्य विशिष्टज्ञानेति॥ गौरवं स्पष्टयति॥ मूलप्रत्यक्षेति॥ मु
क्तौतिप्रकृताभिप्रायेण॥ नन्विति॥ रजतविशेष्यकप्रत्यक्षस्यत्वे विशेष्यसंयोगस्यान्वयव्यतिरेकाग्रहे रजतवि
षयकप्रत्यक्षत्वं कार्यतावच्छेदकं॥ रजतसंयोगत्वं च कारणतावच्छेदकं कल्प्यते॥ आर्षस्य सामान्यरूपत्वात्॥ कि

प्र॰म॰

172 तीयस्य लघुशरीरत्वादिति भावः ॥ अत एव न यत्सामान्य इति न्यायः ॥ शरीरगौरवे रस्य तत्र बाधकत्वात् ॥ अत ए
व च निर्विकल्पकेऽपि संयोगो हेतुः ॥ न चैतदनुपसर्जनत्वे विशेष्यत्वम् अत एव रजततादात्म्यारोपे रजतत्वं प्रति र
जतस्य विशेष्यत्वात् तत्संयोगस्य हेतुत्वापत्तिरिति त्वपास्तमिति वाच्यं ॥ इदं रजतं एतद्रजतवदहमिति समूहालं
बने रजतसंयोगस्याहेतुत्वापत्तेरिति भावः ॥ रजतसंयोगे तदुक्तं न्यायं द्रव्यसंयोग इति दिशति ॥ एवं चेति ॥ अयं
चास्त्वरसो रजतविषयकसाक्षात्कारे रजतसंयोगत्वेन कारणत्वस्यैव निषेध्यत्वात् ॥ न वाऽन्यथाख्यातौ ॥ तथा हि
रजतसंयोगस्य हेतुत्वे × निवारणार्थमुक्तायां युक्तौ न तु रजतसंयोगत्वेन कारणत्वाभावे ॥ किं चेत्यादिनापि र
जतसंयोगत्वेन कारणत्वस्य × व्यनुभूयमानरजतारोपे रजतसंयोगस्य सत्त्वात् न किंचिद्बाधकं ॥ स्मर्यमाणारो
पेऽपि रजतान्तरस्य पुरुषान्तरेंद्रियेण सह कचित्संयोगसत्त्वात् नास्ति बाधकं ॥ ननु तत्पुरुषीयतद्रजतविषयकप्र
त्यक्षे तद्रजतनिरूपिततत्पुरुषेंद्रियसंयोगः कारणमिति वाच्यं ॥ तत्पुरुषीययथार्थप्रत्यक्षविषयरजतविशेष

स्यतत्पुरुषीयान्यथाख्यातौ बाधकाभावात्तच्चोक्तरूपकारणविशेषाकल्पनात्· एतेन द्रव्यसंयोगहेतुत्वमन्य
थाख्यातौ बाधकं परास्तमिति· किंच रजतानुव्यवसाये न्यायनये रजतानुमितौ च गुरुनये रजतसंयोगस्य व्यभि
चारः· न च रजतानुव्यवसायो रजतांशे न लौकिकः लौकिके च रजतसाक्षात्कारे रजतसंयोगस्य हेतुत्वमस्तिमतमि
तिवाच्यं· रजतत्वमस्याप्यलौकिकतया तत्रापि तदसत्त्वस्यादोषत्वात्· न च रजतांशेनुमितेः सविकल्पकजन्यत
यान साक्षात्त्वमिति वाच्यं· रजतत्वमेपि सविकल्पकजन्यतया त्वन्मते साक्षात्त्वं नास्तीति रजतसंयोगस्य रजतसाक्षा
त्कारहेतुत्वेप्यन्यथाख्यातौ बाधकाभावात्· तस्मात्पूर्वोक्तयुक्तिमात्रेऽस्वरसोयमिति· मूले नहेतुत्वस्येति· भेदाग्रहहेतु
प्रवृत्तिजनकत्वं कल्प्यमिति गौरवमिति भावः· ननु भेदाग्रहस्य दोषजन्यत्वांशे लक्षस इति साम्यमिति चेत्· न· विशिष्ट
ज्ञानापेक्षया भेदाग्रहस्य शरीरगौरवादिति· असंसर्गाग्रहरूपतयेति· इदंपदार्थादौ रजतत्वप्रकारकज्ञानविषय
त्वाद्यसंसर्गाग्रहरूपतयेत्यर्थः· मूले भेदाग्रहेति· शुक्तिरजतयोर्भेदाग्रहदशायामित्यर्थः· मूले भेदाग्रहेपीति· शुक्ति

प्र·म·

रजतत्वेदंत्वग्रहेपीत्यर्थः· नचेदमिति· यथाशुक्तिकायां रजतत्वमेसति इदं रजतवद्गृहमिति ग्रहविशेषणइदंपद
र्थेरजतत्वासंसर्गाग्रहान्नतुविशिष्टंज्ञायते· तथात्मविशेषणरजतत्वप्रकारकज्ञानेशुक्तिविशेष्यकत्वासंसर्गाग्रहे
नतुविशिष्टंज्ञायतइतिनचेत्यर्थः· रजतत्वप्रकारकत्वस्येति· रजतत्वप्रकारकत्वस्यविशेष्यज्ञाननियतज्ञानतयारज
173 तविशेष्यकत्वंशुक्तिविशेष्यकत्वंवारजतप्रकारकेज्ञानेवश्यंज्ञेयम्· तन्नाद्यविशेषदर्शनान्नासंसर्गाग्रहइत्यर्थः·
तन्नाशानेपि· शुक्तित्वादिज्ञानेपि· रजतमेवप्रकारि विशेष्यं रजतप्रकारि· रजतज्ञानवत्· रजतव्यवहारास्पद
शुक्तिज्ञावेनेतः· द्वितीयेत्र्याह· शुक्तीति· अन्यथाख्यातिसिद्धिरितिभावः· यदिचात्मविशेषणेदंज्ञानेरजतत्वप्रकार
कत्वासंसर्गाग्रहरूपतोच्यतेपरैस्तदाइदंविशेष्यकत्वस्यप्रकारज्ञाननियतज्ञानतयारजतत्वप्रकारकत्वंतद्विरो
धिप्रकारकत्वंवाइदंविशेष्यकज्ञानेवश्यंज्ञेयमितिविशेषदर्शनात्समाहितासिद्धिर्वाज्ञापिनयुक्तेतिभावः· एतद्बस
र्वज्ञानेस्वतोग्राह्यंरजतत्ववद्विशेष्यकत्वमितिमतेनोक्तं· न्यायनयेतुकिंचिद्विशेष्यकत्वमादायापिरजतत्वप्रका

रकत्वग्रहात् किंचित्प्रकारकत्वमादायापि वद्दं विशेष्यकत्वग्रहात्· अन्यथानुव्यवसायस्य प्रामाण्यग्राहक
त्वापत्तेर्न्नेदं समाधानं किंतु बाधकाभावादेव नासंसर्गाग्रहरूपतेति ध्येयम्· अप्रामाण्यज्ञप्तीति· अप्रामाण्य
ज्ञापकत्वं रजतत्वाभावोपस्थापकतयाज्ञेयम्· द्वितीये नैवेत्युत्सर्गाभिप्रायेणैवकारः· आकृतित्यस्वरसबीजं
यदि संसर्गमर्यादयान्नमेऽत्यंतासतो विषयत्वं तदा उपनीतस्य तस्य विशेषणत्वविशेष्यत्वे अपि स्यातामिति प
राभिमतासत्ख्यात्यापत्तिः· नचभानसामग्रीसत्वे पराभिमतासत्ख्यातिर्वाच्यं· विशिष्टज्ञानसामग्री हि विषयनि
रूपितं संसर्गं बोधयति नतु संसर्गमात्रमतिप्रसंगात्· नच यस्य संसर्गस्याभावाग्रहस्तत्संसर्गस्य बोधयतीति क
ल्प्यमिति वाच्यं· अन्यथाभावस्यालीकाप्रतियोगिकत्वात्· अलीकसंसर्गस्य तथापि विषयत्वालाभादिति॥ छ॥ ॥
समाप्तेयमन्यथाख्यातिः॥ छ॥ ॥ बहुविधमिति मूले· यद्यपि प्रत्यक्षकरणत्वादिना शरीरादिकमपि संगृह्यते
तथापि बहुविधत्वमद्भुतमेवेति भावः· वस्तुतस्तु करणपदेनासाधारणं करणं विवक्षितं· असाधारणकारणत्वं च

प्र॰म॰

174

जन्यानुगतवत्वसाक्षाद्व्याप्यजात्यवच्छिन्नकार्यतानिरूपितकारणत्वमितिनव्याशीरादिसंग्रहः॥ अर्थपदेन तत्तज्ज्ञानविषयो ज्ञानमात्रविषयो वा विवक्षितः॥ आद्ये मूले आत्मेति। द्वितीये मूले ज्ञानमात्रमिति। परोक्षज्ञानमात्रमित्यर्थः॥ मूले ईश्वरेति। यद्यपि करणलक्षणाय फलीभूतसाक्षात्कारस्यैव लक्षणमिति नेयमव्याप्तिर्युक्ता तथापि फलस्यापि लाघवात्सामान्यत एव करणलक्षणप्रविष्टतया प्रत्यक्षसामान्यमेव लक्ष्यमित्यभिप्रेत्यैतदुक्तं। अन्यतमपदेनान्यान्यविवक्षायां दोषमाह। मूले इतरेति। मूले प्रत्यक्षस्येति। तथा च प्रमारूपतत्करणत्वं प्रत्यक्षप्रमाणलक्षणं फलिष्यतीति भावः॥ मूले तथेति। अनुगतबुद्धिविषय इत्यर्थः॥ साक्षात्प्रतीतिसाधनत्वादन्येन प्रकारेणेन्द्रियनिर्वचने दोषमाह। मूले इन्द्रियस्येति। चक्षुःकरणकानुगतवत्वस्यातीन्द्रियतया गुरुतया च व्यंजकत्वानुपपत्त्या चाक्षुषत्वजातिपरतया व्याचष्टे। चक्षुःप्रयोज्येति। यद्यपि चाक्षुषालौकिकसाक्षात्कारे साक्षात्करोमीत्यनुगतबाधा चाक्षुषत्वं व्यंजकं तथापि लौकिकत्वसहितं तथा द्रष्टव्यं। मूले योगिप्रत्यक्षग्रहणं ज्ञानसामान्यप्रत्यासत्तिजन्यप्रत्यक्षयोरप्युपलक्षणं।

विशिष्टप्रत्यक्षस्येति। यद्यप्यनुमित्यादेरप्यंशे निर्विकल्पकतया तद्वैजात्यमपि न स्यात्। न च समस्तनिर्वि-
कल्पके तद्वैजात्यमिति वाच्यं। तादृशोपप्रत्यक्षवैजात्यस्यापि वक्तुं सुकरत्वात्। तथापि सन्निकर्षादिरूपप्रत्य-
प क्षासाधारणकारणजन्यत्वात्प्रत्यक्षत्वमित्यत्र तात्पर्यं। एतावतापि निर्विकल्पको धर्मिग्राहकप्रमाण-
न साक्षात्त्वाग्रहादाह। यद्यपीति। ईश्वरे ज्ञाने योगिप्रत्यक्षे च धर्मिग्राहकमानसिद्धमेव प्रत्यक्षत्वं। द्विति-
रूपापादनगोचरप्रत्यक्षजन्यापरमाणवः कस्यचित्प्रत्यक्षा इत्यनुमानात्। तयोः सिद्धेः ज्ञानसामान्यलक्ष-
णाजन्ययोः सुरभिचन्दनं प्रमेयमितिज्ञानयोस्तु निर्विकल्पकत्वपरिशेषात्प्रत्यक्षत्वं इष्टव्यं। तपास-
तीति। स्वविषयकसविकल्पकत्वेन जन्यज्ञानाजन्यत्वे सतीत्यर्थः। ननु स्वविषयकसविकल्पकत्वेन ईश्वर-
ज्ञानस्य जन्यप्रत्यक्षमात्रे जनकत्वादसंभववारणाय जन्यपदमत आह। नहीति। अतिप्रसंगोऽव्याप्तिः प-
दाभ्यामिति। जन्यसविकल्पकपदाभ्यामित्यर्थः। स्वविषयकपदं च स्वविषयविषयकार्यकमंत्राद्येतलाभाय।

प्र॰म॰

175

तेनयदंशो ज्ञानप्रत्यासत्त्यजन्यत्वं तदंशे लौकिकमिति पर्यवसितम् सुरभिचंदनं घटो नास्तीति प्रत्यक्षयोश्च
दनांशे अभावांशे च लौकिकत्वं भवतीति ध्येयं· जन्यसविकल्पकत्वेन स्वविषयविषयकाजन्यत्वरूपमर्थमाह·
वस्तुतस्त्विति· प्रथमकल्पे जन्यदिति· अत्र कल्पे कारणादिविषयस्य प्रवेशाइति भेदः· प्रत्यासत्तितावच्छे
दकमिति· जन्यसविकल्पकमात्रस्य स्वरूपयोग्यत्वादिति भावः· तथा च तेन रूपेणाजनकत्वं नाप्रसिद्धमित्या
शयः· स्वगोचरेति· प्रत्यासत्तीभूयस्वविषये ज्ञानाजननादित्यर्थः· ज्ञानत्वेन स्वविषयविषयकाजन्यत्वं चाप्र
सिद्धमित्याह· तथा चेति· ज्ञानप्रत्यासत्त्यजन्यत्वे ज्ञानत्वेन स्वविषयविषयकाजन्यत्वं· प्रत्यासत्तितेति· इदमु
पलक्षणं· प्रकारांतरेणापि जनकतानवच्छेदकत्वादित्यपि द्रष्टव्यं· जन्यपदमुपलक्षणं· सविकल्पकपदम
प्यप्रसिद्धिवारकं द्रष्टव्यं· सविकल्पकत्वेनेत्युपलक्षणं· जन्यज्ञानत्वेनेत्यपि द्रष्टव्यं· स्वगोचरेति· स्वगोचर
स्य प्रत्यक्षं स्वगोचरप्रत्यक्षं· तथा भावादासत्तितावच्छेदकत्वात्· स्वविषयकपदप्रयोजनमाह अत एवेति·

जन्यस्वविषयकसविकल्पकेनेतिस्वरूपकथनं जन्यसविकल्पकतयास्वविषयविषयकेणयन्नजनित
मित्येवलक्षणेविवक्षितं· एवमग्रेपिजन्याभावेत्यस्याभावविषयकेणेत्यर्थ इतिध्येयं· दंडीपुरुष इत्यत्र दंडगो
चरस्यजन्यविशेषणतावच्छेदकप्रकारकज्ञानस्यधारावाहिकघटादिज्ञानेचजन्यघटादिगोचरसविक
ल्पकस्यजनकतयाऽव्याप्तिमाशंक्यनिराकरोति· नचेति· सामान्येति· विशिष्टज्ञानविशेषणज्ञानयोः सा
मान्यकार्यकारणभावेनैव दंडीपुरुष इत्यादिविशिष्टवैशिष्ट्यज्ञानस्यधारावाहिकघटादिज्ञानस्यचनि
र्वाहे जन्यसविकल्पकत्वेन हेतुत्वस्योभयत्राकल्पनादित्यर्थः· इदमुपलक्षणं दंडिज्ञानादौ दंडज्ञानादेः
कारणतायांजन्यत्वमपिनावच्छेदकप्रविष्टं तत्पुरुषीयत्वेनैवातिप्रसंगभंगादित्यपिज्ञेयं· विशिष्टबुद्धा
विति· यथार्थविशिष्टप्रत्यक्ष इत्यर्थः· दंडीपुरुष इत्यत्र दंडज्ञानस्यप्रत्यासत्तितयाज्ञानप्रत्यासत्त्येश्चजन्य
सविकल्पकत्वेनजनकतयादंडांशेपुनरव्याप्तिमाशंक्यनिराकरोति· नचदंडीति· प्रत्यासत्यंतराभावमिति·

प्र·म·

176

लौकिकप्रत्यासत्त्यभावइत्यर्थः· अन्यथासामान्यज्ञानयोरेकत्रप्रत्यासत्तितानस्यादितिध्येयम्· स्वायोग्ये
ति· महत्त्वोद्भूतरूपवत्त्वसमानाधिकरणवर्तमानत्वादिकं यत्तदिन्द्रियग्राह्यत्वप्रयोजकं तद्रहितं स्वायोग्यं·
अतएवातीतदंडादेर्ज्ञानं प्रत्यासत्तिरेवेतिध्येयं· बहिरिति· बहिरर्थस्मरणोसतिमनसो बहिरर्थप्रत्यक्ष
जननेप्रत्यासत्त्यंतराभावावच्छिन्नस्य स्वायोग्यगोचरस्य च ज्ञानस्य प्रत्यासत्तित्वकल्पनादित्यर्थः· अत्र कल्पेस्वा
योग्येत्यादिनियमपरं· तथेति· प्रत्यासत्त्यंतराभावस्यानावश्यकत्वादित्यर्थः· उभयजन्यत्वेपीति· इदं च संयु
क्तसमवायस्य तत्त्वेतरप्रज्ञानजनकत्वमुपेत्योक्तं· पूर्वमभावप्रत्यक्षे प्रतियोगिज्ञानस्यान्वयव्यतिरेका
भ्यां जन्यसविकल्पकत्वं जनकतावच्छेदकमित्यभावांशे अव्याप्तिवारणाय स्वविषयकपदमित्युक्तं· इदानीं प्र
तियोग्यंशेज्ञानस्य प्रत्यासत्तित्वात्तत्प्रत्यासत्तितावच्छेदकीभूतजन्यसविकल्पकत्वं जनकतावच्छेदकमित्याद
यतत्रैवाव्याप्तेर्वारणाय स्वविषयकपदमित्याह· इतोपीति· प्रत्यासत्तितयैवेति· तथा च जन्यसविकल्पकत्वेन

वच्चपं तज्ज्ञानकं तस्यैवासन्निनावच्छेदकत्वादिति भावः॥ नेदगर्भेति॥ इदं च जन्यसविकल्पकत्वेन ज्ञानस्य प्रत्य
क्षयोग्यतावच्छिन्ने अन्यथेश्वरज्ञाननिर्विकल्पकयोरपि प्रत्यक्षयोग्यतापत्तेरिति मते॥ यदा तु तयोरपि यो
ग्यत्वमेव कारणान्तरविरहान्न फलोपधानं नित्यस्य स्वरूपयोग्यस्येत्यादिव्याप्तावपि निर्विकल्पकयोग्यत्वेन
बाधकमिति मतं तदानाव्याप्तिशंकानवासमाधानमिति [redacted]स्वरूपयोग्यस्येत्यादिव्याप्तावपि निर्विकल्पक
योग्यत्वे[redacted]तिध्येयं॥ निराकृतमपि दोषांतरदानायाशंक्य निराकरोति॥ न चेति॥ किं न ब्रूया इति॥ न चेष्टापत्तिः॥
निर्विकल्पकेश्वरज्ञानयोरपि प्रत्यासत्तित्वादिति वाच्यं॥ घ्राणजसौरभसविकल्पकाभावे सौरभोपनयादर्शना
दिति भावः॥ विजातीयत्वे लौकिकत्वासंभेदः॥ यथाश्रुतं॥ नन्वन्तद्विषयनिरूपितयोगजधर्मप्रत्यासत्त्यजन्यत्वं
विवक्षणीयमिति भावः॥ अयं चाभ्युपगमवादः परमार्थतस्तु योगजज्ञानस्यापि लौकिकत्वसंभेदात्तद्विषयनि
रूपितेत्यादिकं वक्तव्यमेवेति ध्येयम्॥ धूमत्वांशास्तूपलक्षणं॥ संयुक्तधूमांशाद्यपि दृष्टव्यं॥ यदंशे सामा

न्या·म· न्यप्रत्यासत्त्यजन्यत्वं तदंशे लौकिकत्वमिति विवक्षां दूषयति· न च तदंशा इति· तथा चेति· यथा तद्विषयनिरू
पितसामान्यप्रत्यासत्त्यजन्यत्वं धूमधूमत्वांशे व्याप्तिनियोज्यं तथा तद्विषयनिरूपितज्ञानप्रत्यासत्त्यजन्यत्वं सु
१७१ रभिचंदनमित्यादौ चंदनांशे व्याप्तिनियावाच्यमित्यर्थः· दंडी पुरुष इत्यत्र दंडांशे पूर्वोक्तमव्याप्त्युद्धारं
एतस्मिन्व्याख्याने स्मारयति· एवमिति· पूर्वोक्तमेव स्मारयति· न च ज्ञानत्वेति· तच्च ज्ञानस्य उनीततयापि न
नादित्याशंकितुर्भावः· भेदगर्भत्वेपि आत्मानं जानामीत्यत्राव्याप्तेरपरिहृष्यन्प्रकारांतरमाह· स्वविषयके
ति· अत्र लौकिकप्रत्यासत्तेरपि जनकत्वादिति भावः· प्रसंगादाशंक्य निराकरोति· न चेति· तच्चेति· ज्ञानत्वसा
मान्यलक्षणाजन्यज्ञानस्यानुव्यवसाय इत्यर्थः· न चेति· उक्तस्थलद्वय इत्यर्थः· विशेषणविशेष्यत्वेनेत्युपल
क्षणं· ज्ञानविशेषणत्वात्स विशेषणत्वेप्यपि स्पष्टत्वं· ननु तद्विषयनिरूपितज्ञानप्रत्यासत्त्यजन्यं ज्ञानं तद्विषये
लौकिक~~त्वमसाचाप्यत्वेति~~मित्युपक्रम्य अनयोर्लौकिकत्वाभिधाने विरुद्धं· न च तद्विषयनिरूपितज्ञानप्र

त्यासत्तिमात्राजन्यत्वे लौकिकत्वं· तथा सत्यलौकिकत्वाभावापत्तेरिति· मैवं· तद्विषयनिरूपिततद्विषयताप्र
योजकज्ञानप्रत्यासत्त्यजन्यं ज्ञानं तस्मिन्विषये तद्विषयतावच्छेदेन लौकिकमिति विवक्षितं· तथा च ज्ञानवि
शेषणतारूपविषयताप्रयोजिका तस्मिन्विषये यद्यपि ज्ञानप्रत्यासत्तिरस्ति तथापि ज्ञानस्यात्मविशेषण
तायामात्मनश्च ज्ञानविशेष्यतायां सा न प्रयोजिकेति विषयतान्तरावच्छेदे लौकिकत्वमुक्तं· तदभावादिति·
विषयतान्तरेदाभावादित्यर्थः· ननु दंडी पुरुष इत्यत्र दंडस्य संयोगप्रयोज्यायां विशेषणतारूपविषयता
यामपि ज्ञानप्रत्यासत्तिः प्रयोजिकेति दंडांशेऽव्याप्तिस्तदवस्थेत्यत एवमित्यादिना पूर्वोक्तं स्मारयन्नाह· ज्ञा
नेति· प्रत्यासत्त्यंतराभावे तद्विषयताप्रयोजकलौकिकप्रत्यासत्त्यभावे· तेन पूर्वोक्तज्ञानात्मांशयोर्ज्ञानप्रत्यास
त्तिर्वं न विरुध्यत इति ध्येयं· तत्रेति· तथा च योग्यत्वाभावात्तद्विषयताप्रयोजकत्वमेव संयुक्तसमवायस्य तु त्वन्ना
स्तीति भावः· संयुक्तसमवायस्य व्यभिचारादपि तद्विषयताप्रयोजकत्वाभावमाह· किंचेति· इदं चापाततः वर्त्तमान

प्र·म·

178

स्थलेग्राहकत्वसंभवादिति ध्येयम्· अत एव योग्यत्वाभावादेव· जनकत्वेपि सौरभांश इति शेषः· तथात्व इति· त
त्र संयोगस्याभ्यसन्निकर्षरूपत्वे ततद्रव्यं घ्राणयोग्यं ज्ञानमिति घ्राणेन तद्विशेष्यकं प्रत्यक्षं स्यादित्यर्थः· अतएव
त्ति· तद्विषयताप्रयोजकलौकिकप्रत्यासत्त्यभावएव ज्ञानस्य प्रत्यासत्तित्वात्· तादृशप्रत्यासत्त्यभावस्य चायोग्यता
नियतत्वादयोग्यस्य चाविशेष्यत्वादित्यर्थः· नन्वेवं मानसं बहिर्विशेष्यकमुपनीतभानं न स्यादित्यत आह· मानसे
त्विति· तथा चोपनीतं विशेषणतयैव भासत इति बहिरिन्द्रियजज्ञाने नियम इति भावः· स्वायोग्यगोचरज्ञानस्यैव प्र
त्यासन्नित्वमिति पूर्वोक्तं द्वितीयं ज्ञानासन्निता नियामकं स्मारयति· वस्तुतस्त्विति· ज्ञानलक्षणायामिति· अयोग्यगोच
रैव ज्ञानलक्षणा न त्वयोग्यगोचरेति यो विभागः कृतस्तदभावप्रसंगादित्यर्थः· ज्ञानप्रत्यासत्त्योपनीतविशेष्यकज्ञा
नजनने उपनीतस्यापि योग्यत्वापत्तेरिति भावः· प्रत्यासत्त्यन्तराभावे ज्ञानस्य प्रत्यासत्तित्वं स्वायोग्यगोचरस्यैव ज्ञान
स्य प्रत्यासत्तित्वमिति नियमद्वयमुक्त्वा बहिरिन्द्रियजज्ञाने बहिरिन्द्रियप्रत्यासत्त्यभाव एव ज्ञानस्य प्रत्यासत्तित्वमि

तिनियममनभिप्रेत्याह· वस्तुत इति· यद्वा चक्षुषा सौरभविशेष्यकं ज्ञानं जन्यतामित्यत्र बाधकान्तरमाह· वस्तुत इति·
तदिन्द्रियजन्यज्ञानविशेष्यतायां तदिन्द्रियप्रत्यासत्त्याश्रयत्वं तन्त्रमिति भावः· शब्दविशेष्यकेति· वीणायां शब्द इति
श्रोत्रज्ञानस्यानन्यगतिकतया वीणासन्निकृष्टमनोजन्यतया मानसत्वापत्तिभयेन मनोमात्रजन्यत्वमेव मानसत्वमि
त्यामकं स्वीकार्यमित्यर्थः· अत्र वदन्ति· यदंशे ज्ञानप्रत्यासत्त्यजन्यं यज्ज्ञानं तदंशे तल्लौकिकमित्याद्यकल्पार्थः स
वायुक्तः· ज्ञानस्य निरंशत्वात्· विषयरूपस्यांशस्य सुरभिचन्दनमित्यादावपि ज्ञानप्रत्यासत्त्यजन्यत्वात्· न च
यद्विषयकत्वावच्छेदेन ज्ञानप्रत्यासत्त्यजन्यत्वं तस्य तत्र विषये ज्ञानस्य लौकिकत्वमिति विवक्षितमिति वाच्यं· आ
त्मानं जानामीत्यादिना वक्ष्यमाणस्य दोषस्य तथाप्यनुद्धारादिति· जन्यसविकल्पकत्वेन रूपेण स्वीय यद्विषयक
जन्यं यत्ज्ञानं तत्ज्ञानं तस्मिन्विषये लौकिकमिति द्वितीयकल्पार्थः· सोप्ययुक्तः· आत्मानं जानामीत्यत्र ज्ञानत्वस
सामान्यलक्षणाजन्यज्ञानानुव्यवसाये च आत्मज्ञानरूपस्वकीयविषयविषयकस्य जन्यसविकल्पकत्वेन जन

प्र॰म॰ कतयाऽऽत्मज्ञानयोर्लौकिकत्वाभावापत्तेः तद्विषयनिरूपितज्ञानादिप्रत्यासत्त्यजन्यं ज्ञानं तद्विषये लौकिकमिति
तृतीयविकल्पार्थः सोऽप्यत एवायुक्तः न च जन्यसविकल्पकत्वेन तद्विषयविषयकमात्राजन्यत्वं तद्विषयनिरूपित
179 ज्ञानादिप्रत्यासत्तिमात्राजन्यत्वं वा विवक्षितं तथा च तदुभयत्र संयोगसंयुक्तसमवाययोरपि जनकतया नाव्याप्ति
रिति वाच्यं ज्ञानविशेषणतारूपायामपि विषयतायां तयोर्लौकिकत्वापत्तेः उक्तं च तत्रालौकिकत्वं न च तत्तद्विषय
तायां तद्विषये तन्मात्राजन्यत्वं विवक्षितमतो विषयताभेदात् लौकिकत्वालौकिकत्वे इति वाच्यं संयुक्तस्य मांशे धू
मांशे धूम इति सामान्यजज्ञानस्य संयुक्तात्मनि योगजधर्मजज्ञानस्य संयुक्ते दंडे दंडीति ज्ञानप्रत्यासत्तिजज्ञानस्य
धारावाहिकघटादिप्रत्यक्षस्य च विषयताभेदाभावादसंग्रहापत्तेः। न च तत्र प्रत्यासत्त्यन्तराभावस्य स्वायो
ग्यगोचरत्वस्य बहिरिंद्रियजज्ञाने बहिरिंद्रियप्रत्यासत्त्यभावस्य वा ज्ञानादिप्रत्यासत्तित्वनियामकस्यास
त्वान्न ज्ञानादिकं प्रत्यासत्तिरिति वाच्यं वस्तुत्वज्ञातसामान्याधारत्वज्ञातत्वावच्छेदेन योगजधर्मादीनां प्रत्यास

प्रत्यासत्तित्वकल्पनान्तु प्रत्यासत्त्यंतराणां वादिकं नियामकं गौरवादिति॰ अत्रोच्यते॰ केवललौकिकप्रत्या
सत्तिजन्यं एकविषयकैकविषयताकमुत्तयासत्तिजन्यं॰ भिन्नविषयकभिन्नविषयताकमुत्तयासत्तिजन्यं ए
कविषयकं भिन्नविषयताकमुत्तयासत्तिजन्यं भिन्नविषयकमेकविषय[illegible]ताकमुत्तयासत्तिजन्यमिति पंच
धा जन्यप्रत्यक्षं॰ तत्राद्यं समस्तविषयावच्छेदेन॰ द्वितीयमपि समस्तविषयावच्छेदेन॰ तृतीयं विषयविशेष
विषयताविशेषावच्छेदेन॰ चतुर्थं विषयताविशेषावच्छेदेन॰ पंचमं विषयविशेषावच्छेदेन लौकिकमिति
स्थितिः॰ तत्रोदाहरणानि॰ अयं घट इति॰ एतदुत्तरमयं घट इति सुरभिचंदनमिति आत्मानं जानामीति रू
पवत्सुरभिचंदनमिति॰ तथा च तद्विषयताप्रयोजकतद्विषयनिरूपितज्ञानादिप्रत्यासत्तिचयान्यतरमा
त्राजन्यं ज्ञानं तद्विषयतावच्छेदेन तद्विषये लौकिकमिति विवक्षितोर्थः॰ सौरभांशेन संयुक्तसमवायस्य प्रत्या
सत्तित्वे न तत्रातिव्याप्तिरिति॰ रजतत्वमस्य रजतत्वांशे ज्ञानरूपसन्निकर्षजन्यत्वाद संग्राह्य एवेति भावः॰ कवि

प्र॰म॰ 180

न्नु तद्विषयनिरूपितज्ञानादिप्रत्यासत्त्यजन्यं प्रत्यक्षं तद्विषये लौकिकमिति लक्षणार्थः तथा च केवलतद्विष
यकज्ञानादिप्रत्यासत्तिजन्यस्य लौकिकप्रत्यासत्तिसंवलिततत्तद्विषयज्ञानादिजन्यस्य चात्मानं जानामीत्यादेर
लौकिकत्वमेवेत्याहुः वस्तुतस्तु तद्विषयनिरूपितज्ञानादिप्रत्यासत्तिविषयान्यतरमात्राजन्यं जन्यं प्रत्यक्षं त
द्विषये लौकिकं तेनात्मानं जानामीत्यादौ आत्मांशे लौकिकत्वमेव एवं सामान्ययोगजलक्षणाजन्यज्ञानयो
र्लौकिकसन्निकर्षबहिर्भावयोस्तदंशे लौकिकत्वमेवेति ध्येयं आसत्तित्रयं योगजधर्मज्ञानसामान्य
रूपं तदजनकेति साऽजनिका प्रत्यासत्तिर्यस्य तत्तदजनकप्रत्यासत्ति अलौकिकप्रत्यासत्त्यजन्यमिति य
वत् अव्याप्तिश्चेति अंशे संयोगसत्त्वे धूम इति सामान्यलक्षणाजन्यज्ञानेऽलौकिकसन्निकर्षसत्त्वे योग
जधर्मज्ञाने संयोगसत्त्वे ज्ञानप्रत्यासत्तिजधारावाहिकज्ञाने चाव्याप्तिरिति निपित्राव्यं न च प्रत्यासत्तेनेति नत्रा
व्यत्यासात्तज्ज्ञानत्वसामान्यलक्षणाजन्यज्ञानानुव्यवसाये तज्जन्यस्य लक्षये च नाव्याप्तिरिति भावः नन्वेवं प्रप

मस्यविषयतावच्छेदेन लौकिकत्वालौकिकत्वयोरुक्तत्वादलौकिकांशे उत्तरविकल्पस्य चालौकिकांशेतिव्याप्तिरि
ति चेत्·न·तद्विषयताप्रयोजिकातद्विषयनिरूपितताया अनागतगोचरसाक्षात्कारहेतुः प्रत्यासत्तिस्तज्जन्यं त
द्विषयतावच्छेदेन तद्विषये लौकिकमित्यर्थात्·उक्तस्य लक्षये लौकिकसन्निकर्षवद्विषये लौकिकत्वस्येष्टत्वात्·
न चैवं यथाश्रुतमेवास्तु·उक्तत्रिविधसामान्यलक्षणादिजज्ञानस्य संग्रहाय मात्रपदस्याधिकस्य दानापत्तेः·
न चैवं नञ्प्रत्यासे एकं जन्यपदं मूले व्यर्थं स्यादिति वाच्यं·मूले अनागतगोचरसाक्षात्कारहेतुप्रत्यासत्त्यज
न्यजन्यत्वरूपत्वमित्येव पाठात्·अत एवेश्वरप्रत्यक्षे तिव्याप्तिवारणमपि नञ्प्रत्यासे बीजान्तरं·द्वितीयजन्यपद
पाठे तु तस्य नञ्प्रत्यासे तात्पर्यं·भ्रमस्य च रजतांशे ज्ञानरूपप्रत्यासत्तिजन्यतया न लक्ष्यत्वमित्युक्तं·उक्तदोषः
अतिव्याप्तिरव्याप्तिश्च·अव्याप्तिं वारयति·स्वयोग्येति·अतिव्याप्तिं वारयति सामान्येति·अत्रापीति·तद्विषय
निरूपिततद्विषयताप्रयोजकप्रत्यासत्तिलाभाय स्वविषयकपदमिति भावः·केचित्तु तद्विषयनिरूपितानाग

प्र·म·

तगोचरसाक्षात्कारजनकप्रत्यासत्त्यजन्यं जन्यं प्रत्यक्षं तद्विषये लौकिकमिति निर्वाच्यं· ननु नञ्व्यत्यासः· उक्ताव्या
प्तिस्थलानीकासंग्राह्यत्वमेवेत्याहुः· वस्तुतस्तु योगजधर्मादीनां लक्ष्यतावच्छेदकप्रत्यक्षत्वे लक्षणेनानुगतरूपेण प्रवे
१४ शाद्यत्वेवद्व्याविशेषः· तथा च तद्विषयनिरूपितानागतगोचरसाक्षात्कारस्वरूपयोग्यप्रत्यासत्तिमात्राजन्यं जन्यं
प्रत्यक्षं तद्विषये लौकिकं· तेनात्मानं जानामीत्यादेर्लौकिकसंन्निकर्षवद्धर्मिविषययोर्योगजधर्मसामान्यप्रत्यासत्ति
जन्यप्रत्यक्षयोर्व्यवस्थापितं लक्ष्यत्वं न विरुध्यत इति· आम्नाय इति· न च लक्ष्यतावच्छेदकलक्षणयोरभेदः· योगजधर्म
त्वसामान्यज्ञानभिन्नानागतगोचरसाक्षात्कारहेतुप्रत्यासत्तित्वाभ्यां प्रवेशेन अन्योन्याभावात्तं तादात्म्यभेद न चाभे
दसंभवादिति· ननु विशेष्यत्वेनेत्यादिलक्षणं यदि जन्यप्रत्यक्षमात्रस्य तदा यद्वृत्यसंगतं समानविषयकत्वाभावेनावि
कल्पानुपपत्तेः· किं चाऽलौकिकप्रत्यक्षे निर्विकल्पकाव्याप्तिः· तस्माल्लौकिकप्रत्यक्षस्यैव लक्षणमिदं मूले वद
न्नपदं लौकिकपरमित्यभिप्रेत्य व्याचष्टे· विशेष्यत्वेनेतीति· विशेष्यत्वस्य विवक्षायां बीजमाह· यथाश्रुत इति·

ननु पूर्ववर्त्तितानियमः कारणे नष्ट कारणतावच्छेदकेपि मानाभावात् · न च कारणे प्रवृत्त्यनुरोधात्तथाउ
पनीतधर्मावच्छेदेनापि प्रवृत्तिसंभवात् विषयस्य प्रवृत्त्यविषयत्वाच्च · न चाकाशादौ विषयत्वमतिप्रसक्तं जनक
तावच्छेदकमिति वाच्यं · लौकिकप्रत्यक्षविषयत्वस्य विवक्षितत्वात् · तथापि इंद्रियप्रत्यासत्त्याश्रयत्वस्यातिंस प्र
क्ततया लौकिकप्रत्यक्षजनकेंद्रियप्रत्यासत्त्याश्रयत्वस्य वाच्यत्वात् · अंशभेदविवक्षायां चोभयत्रसाम्यात् · त
था च विशेषणाद्यंशप्रत्यक्षनिर्विकल्पकयोः संग्रहाय विशेषपदस्य विषयपरतया विषयत्वेन विषयजन्य
मित्येव लक्षणमस्तु · इंद्रियाद्यप्रवेशेन चात्र लाघवमिति · उच्यते · दोषादसन्निकृष्टमेव रजतं त्वमनसा सतत्त्वम
श्चतस्मिन्नंशे लौकिकमिति मते लौकिकप्रत्यक्षविषयत्वस्यासन्निकृष्टतया अतीतादिरूपतया चाजनके रजते
ति प्रसक्तत्वात् पूर्वमपि लौकिकप्रत्यक्षजनकेंद्रियप्रत्यासत्त्याश्रयत्वमादृतं · किंच तत्र लौकिकप्रत्यक्षत्वप्रवेशे गौ
रवं · मम त्वनागतगोचरसाक्षात्कारहेतुप्रत्यासत्त्यप्रत्यासत्त्याश्रयत्वस्य विवक्षितत्वाल्लाघवमिति दिक् · कार्य

प्र·म· पूर्ववर्त्तिमात्रवृत्तेरेवेतिपाठवृत्तिपदं धर्मपरं· तथा च कार्यपूर्ववर्त्तिधर्ममात्रस्येत्यर्थः· योगपद्यारूपतयेति
मतभेदेन· तेनान्यत्रयोगपद्यावच्छिन्नं स्वरूपमेव विषयतेत्युक्त्या सह न विरोधः· तथात्वात्तस्य जनकेन्द्रियप्रत्या
182 सत्त्याश्रयत्वात्· स्वजनकेन्द्रियप्रत्यासत्त्याश्रयेण इन्द्रियेण जनितत्वेपि तादृशज्ञानविषयेण जनितं कथमतिव्या त्वा
प्तिरिति चेद्यमित्यत आह· न हीति· वक्ष्यमाणप्रकारेणोपपत्तेरितिभावः· अत्रेदं तत्त्वं· लौकिकप्रत्यक्षलक्षणपर
त्वे यथाश्रुतमूलविरोधः· जन्यप्रत्यक्षमात्रलक्षणपरत्वे च ये दोषास्ते उक्ताः· तथाहि· यद्येतस्यासंगतिर्नवन्मते
प्यग्रिमलक्षणोक्त्या· ननु सा प्रकारान्तरेण निरसनीया· तथाहि· करणलक्षणे येन रूपेण फलस्य प्रवेशस्तद्रू
पावच्छिन्नं प्रथमं लक्षितं· ततो यद्विषयत्वाविषयत्वाभ्यां प्रत्यक्षत्वाप्रत्यक्षत्वव्यवहारो घटादावाकाशादौ च प्रसंगो
न्नध्वक्षितं· पुनरपि विशेष्यत्वेनेत्यादिना तदेव लक्षितं· ततश्च सामान्येनापि रूपेण करणलक्षणे यावत्यो व्यक्त्यो
यः प्रविष्टास्तासां लक्षणं किमित्याकांक्षायां यद्वा जन्यप्रत्यक्षमेव लक्ष्यमिति लक्ष्यपदमध्याहृत्य लक्ष्यविकल्पप

रतया चरमो यद्वेति योऽप्य इति चेत् । सत्यं । एवं लक्ष्यविकल्पपरतया प्रथमयद्वाशब्द एवयोऽप्यन्तौ । तथा च चर
मेद्वफलीभूतयावच्छिन्नलक्षणपरे प्रथमेवद्वे लक्षणत्वं तु कार्यपरेऽस्त्वेवास्तु यथाश्रुतमूलानुरोधात् । अलौ
किकप्रत्यक्षाव्याप्तिरपि न । सर्वमलौकिकं लौकिकसंवलितमेवेति मतेन सर्वस्य जन्यप्रत्यक्षस्य विशेष्यजन्यत्वा
त् । विशेष्यत्वं वानागतगोचरसाक्षात्कारहेतुप्रत्यासत्त्यन्येन्द्रियप्रत्यासत्त्याश्रयत्वमुक्तमेव । प्रत्यासत्तितावच्छेद
कधर्मावच्छेदेन वर्त्तमानगोचरप्रत्यक्षस्वरूपयोग्याया प्रत्यासत्तिस्तदाश्रयत्वं वा तादृशप्रत्यासत्तिजन्यप्रत्यक्षवि
षयत्वं वा । अतो न निर्विकल्पकाव्याप्त्यादीति दिक् । विषयत्वेन यद्विषयजन्यं अनुभवत्वव्याप्यजातितज्जातीयत्वे
सति जन्यत्वं लक्षणमिहाभिमतमिति केचित् । स्वजनकेति स्वजनिकालक्ष्यत्वाभिमतजनिकाया प्रत्यासत्तिस्तत्
प्रतियोगित्वेनेत्यर्थः । ननु प्रत्यासत्तेः स्वजनकत्वमिन्द्रियविषयप्रत्यासत्तित्वेन ग्राह्यं । तत्र च स्मृत्यजनकेत्यादिरू
पस्येन्द्रियत्वस्य प्रवेशो प्रथमोपस्थितस्य तस्यैव जन्यप्रत्यक्षहेतुतावच्छेदकत्वापत्तिरिति स्वजनकप्रत्यासत्तिप्र

तियोगित्वमेवेंद्रियत्वं वाच्यं तथा चात्माश्रय इत्यत आह तथा चेति यथाग्रे वाच्यमिति स्मृत्यजनकेत्यादिरूप

मित्यर्थः अन्योन्याश्रयादिति नन्विंद्रियमनःसंयोगत्वेन कारणतायां स्वजनकप्रत्यासत्तिप्रतियोगित्वरूपमेवें

द्रियत्वं प्रवेश्यं न तु स्मृत्यजनकेत्यादिरूपं तथा च नान्योन्याश्रय इति चेत् न तथा सति प्रत्येकोपस्थितस्य स्मृत्यजन

केत्यादिरूपस्यैवेंद्रियत्वस्य जन्यज्ञानत्वसहेतुतावच्छेदकतौचित्यादिति भावः वस्तुतो मनोयोगत्वादिनेति तथाप्य

नान्योन्याश्रयः अत एवेंद्रियलक्षणग्रहेपि नान्योन्याश्रय इति भावः तथापीति अन्योन्याश्रयाभावेपीत्यर्थः

सहकारीति आश्रयत्वं कारणप्रत्यासत्तितया सहकारि तस्मिंश्च सति अकारप्रतियोगिकस्य कारणप्रत्यासत्ति

त्वाभावात् न सहकारित्वमिति भाः

खं दि ७

पत्रे
१८८